अह नन्नयस्स पुत्ता पयडा सावित्तिकुच्छिसंभूया ।
दोन्निवि य उप्पन्ना गोवाइच्चो कवडी य ॥
सत्तुंजयपमुहसमत्थतित्थजत्ता पयट्टिया ।
जेण पढमं चिय तस्स कवडिसेट्ठिणो को समो होज्जा ॥
पुरिसत्थकरणनिरयस्स जज्जनागस्स पवरसेट्ठिस्स ।
अत्थि जिणधम्मनिरया कलत्तमिह सुंदरी नाम ॥
जाउ तीसे सुंदरविचित्तलक्खणविराइयसरीरो ।
जिट्ठो सिद्धो पुत्तो वीउ पुण वीरनामोत्ति ॥
को तेसिं नाणविन्नाणबुद्धिसुविसुद्धधम्मगेहाण ।
निउणो वि गुणलवंपि हु होज्ज समत्थो पवित्थरिउं ॥

नागो इव पिडिज्जइ वंभंडकरंडए अमायंतो ।
जसि जसोहो सायरनिसिछणलंछणच्छाउ ॥
जिणविंवाइं सुसुए सुत्थातित्थजत्ताइधम्मकरणेण ।
धम्मियजणाण मज्झे जेहिं पत्ता पढमरेहा ॥
अन्नाणतह्मसमणो सुयनाणपवा पयट्टिया जेहिं ।
सयलागमपोत्थयलेहणेण निच्चंपि भव्वाण ॥
तेहिं वि तित्थाहिवपरमभत्तिसव्वस्समुव्वहंतेहिं ।
वीरजिणचरियमेयं काराविय्यं सुद्धवोहकरं ॥
जमजुत्तमेत्थ भणियं नियमइदुव्वलउ मए किंपि ।
तं सोहंतु गुणड्ढा उच्छाइयमच्छरा विउसा ॥
छत्तावल्लिपुरीए मुणिअं केसरगिहंमि रइयमिमं ।
लिहियं च लेहएणं माहवनामेण गुणनिहिणा ॥
नंदसिहिरुद्दसंखे वोक्कंते विक्कमाउ कालंमि ।
जेट्ठस्स सुद्धतइयातिहिंमि सोमे समत्तमिमं ॥
निहयसयलविग्घोणग्घमाहप्पजुत्तो ।
जयइ जयपसिद्धो वद्धमाणो जिणिंदो ॥
तयणु जयइ तस्सासंखमोक्खेक्कमूलं ।
गहयभवभयाणं नासणं सासणं च ॥
सिक्खगमणदक्खो पाणिणं कप्परुक्खो ।
जयइ जयपयासो पासनाहो जिणेसो ॥
तयणु जयइ वाणी दिव्वपंकेरुहत्था ।
सुयरयणचरित्तीपंकयालीणहत्था ॥
इय जिणवरवीरस्सट्ठमो ताव वुत्तो ।
परमपयपयाणो नाम पत्थावु एसो ॥

चरियमवि समत्तं एय संकित्तणाउ ।
हवउ सुहकरं वो नूणमाचंदसूरं ॥
एयं वीरजिणेसरस्स चरियं जे भावसारं जणो
वक्खाणंति पढंति निच्चलमणो निच्चं निसामंति य ।
तेसिं इट्ठविउगणिट्ठघडणादोगच्चरोगादये
आ मोक्खं खयमेइ दुक्खमखिलं सोक्खाणि वड्ढंति य ॥
मंगलं महाश्रीः ॥

---

**No. 21. Kumarapalapratibodha,** by Somaprabhacharya [कुमारपालप्रतिबोधः—मा॰—सोमप्रभाचार्यः].

Leaves 1 to 255; 21 inches long, 2 inches broad. Written in the time of Jayatilaka.

Begins:

ओं नमो वीतरागाय ॥
चउसु दिसासु पसरियं मोहबलं निज्जिउं पयट्टो व्व ।
पयडियधम्मचउक्को चउदेहो जयइ जिणनाहो ॥ १ ॥

Ends:

स्तुमस्त्रिसंध्यं प्रभुहेमसूरेरनन्यतुल्यामुपदेशशक्तिम् ।
अतींद्रियज्ञानविवर्जितोपि यः क्षोणिभर्तुर्व्यधित प्रबोधम् ॥
सत्त्वानुकंपा न महीभुजां स्यादित्येष क्लृप्तो वितथः प्रवादः ।
जिनेंद्रधर्मं प्रतिपद्य येनं श्लाघ्यः स केषां न कुमारपालः ॥
विचित्रवृत्तांतसमेतमेतयोश्चरित्रमुत्कीर्तयितुं क्षमेत कः ।
तथापि – – – – – – भार्थिना समुद्धृतो बिंदुरिवांबुधेर्मया ॥
इति सोमप्रभकथिते कुमारनृपहेमचंद्रसंवादे ।
जिनधर्मप्रतिबोधे प्रस्तावः पंचमः प्रोक्तः ॥
सूर्याचंद्रमसौ कुतर्कतमसः कर्णावतंसौ क्षिते-

धुर्यौ धर्मरथस्य सर्वजगतः सुत्त्वावलोके दृशौ ।
निर्वाणावसथस्य तोरणमहास्तंभावभूतामुभा-
वेकः श्रीमुनिचंद्रसूरिरपरः श्रीमानदेवप्रभुः ॥
तयोर्बभूवाजितदेवसूरिः शिष्यो बृहद्गच्छनभःशशांकः ।
जिनेंद्रधर्मांबुनिधिः प्रपेदे घनोदकः स्फूर्तिमतीव यस्मात् ॥
श्रीदेवसूरिप्रमुखा बभूवुरन्येपि तत्पादपयोजहंसाः ।
येषामबाधारचितस्थितीनां नालीकमैत्री मुदमाततान ॥

विशारदशिरोमणेरजितदेवसूरेरभूत्क्रमांबुजमधुव्रतो विजयसिंहसूरिः प्रभुः ।
मितोपकरणक्रियारुचिरनित्यवासी च यश्चिरंतनमुनिव्रतं व्यधित दुःखमा-
यामपि ॥

तत्पट्टपूर्वाद्रिसहस्ररश्मेः सोमप्रभाचार्य इति प्रसिद्धः ।
श्रीहेमसूरेश्च कुमारपालदेवस्य चेदं न्यगदच्चरित्रम् ॥
सुकविरिति न कीर्तिं नार्थलाभं न पूजा-
महमभिलषमाणः प्रावृतो वक्तुमेतत् ।
किमुत कृतमुभाभ्यां दुष्करं दुःखमायां
जिनमतमतुलं तत्कीर्तनात्पुण्यमिच्छुः ॥
धर्मे निर्मलतामवाप्तुमतुलां श्रीहेमचंद्रप्रभो-
र्भक्तिं व्यर्जितुमद्भुतां भणितिषु द्रष्टुं पराभौचितीम् ।
श्रोतुं चित्रकवेश्चमत्कृतिकृतः काव्यं च लोकोत्तरं
कर्तुं कामयसे यदि स्फुटगुणं तद्ग्रंथमेतं शृणु ॥
प्राग्वाटान्वयसागरेंदुरसमप्रज्ञः कृतज्ञः क्षमी
वाग्मी सूक्तिसुधानिधानमजनि श्रीपालनामा पुमान् ।
यं लोकोत्तरकाव्यरंजितमतिः साहित्यविद्यारतिः

श्रीसिद्धाधिपतिः कवींद्र इति च भ्रातेति च व्याहरत् ॥
पुत्रस्तस्य कुमारपालनृपतिं प्राप्तः पदं धीमता-
मुत्तंसः कविचक्रमस्तकमणिः श्रीसिद्धपालोऽभवत् ।
कृतं तद्रसताविदं किमपि यच्चायुक्तमुक्तं मया
तद्युष्माभिरिहोच्यतामिति बुधा वः प्रांजलिः प्रार्थये ॥
हेमसूरिपदपंकजहंसैः श्रीमहेंद्रमुनिपैः श्रुतमेतत् ।
वर्द्धमानगुणचंद्रगणिभ्यां साकमाकलितशास्त्ररहस्यैः ॥
यावन्निहताखिलसंतमसौ नभसि चकासते रविचंद्रमसौ ।
तावत् हेमकुमारचरितं – – –
विमलमतिसुधार्चिर्नेमिनागांगजन्मा-
ऽभवदभयकुमारश्रावकः श्रेष्ठिमुख्यः ।
अथ निजकरपद्मप्राप्तधर्मार्थपद्मा
विजितपदगपद्मा तस्य पद्मीति पत्नीं ॥
तत्पुत्रा गुणिनो ऽभवन्भुविहरिश्चंद्रादयो विश्रुताः
श्रीदेवी – – – बहु सोलेखयत् ॥
शशिजलधिसूर्यवर्षे शुचिमासे रविदिनासिताष्टम्याम् ।
जिनधर्मप्रतिबोधः कृतोयं गूर्जरेंद्रपुरे ॥ १४ ॥
प्रस्तावपंचकेप्यत्राष्टौ सहस्राण्यनुष्टुभाम् ।
एकैकाक्षरसंख्यातान्यधिकान्यष्टभिः शतैः ॥

– – – ने श्रीस्तंभतीर्थे बृहद्पौषधशालायां भट्टा० श्रीजयतिलकसूरीणां उपदेशेन श्रीकुमारपालप्रतिबोधपुस्तकं लिखितमिदं कायस्थज्ञातीयमहं मंडलिकसुतखेता लिखितं चिरं नंदतु ॥

No. 22. **Navapadaprakaranam** by DEVAGUPTA with a Commentary by a pupil [नवपदप्रकरणं सटीकम्—मू०मा० देवगुप्तसूरिः टी० तस्य शिष्यः]

Leaves 1 to 237; 30½ inches long, 2 inches broad.

Commentary begins:

ओं नमो वीतरागाय ॥

शुद्धध्यानधनप्राप्त्या कर्मदारिद्र्यविद्रुतौ ।
निर्वृत्तिः साधिता येन तं नमामि जिनप्रभुम् ॥१॥
जयति जितकर्मशत्रुर्लब्धातुलमाहिमकेवलपताकः ।
त्रिदशासुरकृतपूजः सत्तत्वनिवेदको वीरः ॥ २ ॥
यस्याः प्रसादयानेन लीलया ज्ञेयसागरम् ।
तरंति विबुधाः सा मे सन्निधत्तां सरस्वती ॥ ३ ॥
मम बुद्धिः कुमुदिनीयं यत्संगमशशधरोदये सद्यः ।
अलभत विकाशमसमं तान्भक्त्या निजगुरून्नौमि ॥ ४ ॥
श्रीदेवगुप्तसूरिर्विरचितवान्नवपदप्रकरणं यत् ।
विवृतिं तस्य विधित्सुर्विज्ञपये सज्जनानेवम् ॥ ५ ॥
वृत्तिर्यद्यपि विद्यतेत्र विहिता तैरेवमुच्चैः स्वयं
संक्षेपेण तथापि या न सुगमा गंभीरशब्दा यतः ।
विस्पष्टार्थपदप्रबंधरुचिरा तेनेयमारभ्यते
किंचिद्विस्तरशालिनी तनुधियामिच्छानुवृत्त्या मया ॥ ६ ॥
यच्चासमंजसं किंचिज्जायतेत्र प्रमादतः ।
पुत्रापराधवत्सर्वं तद्बुधैर्मम सह्यताम् ॥ ७ ॥

इह चादावेव प्रकरणकारोभीष्टदेवतास्तवमभिधेयादित्रयं च प्रतिपादयितुकामः ॥

नमिऊण वद्धमाणं मिच्छं सम्मं वयाइ संलेहा ।
नवभेयाइं वोच्छं सड्ढाणमणुग्गहट्ठाए ॥ १ ॥
इतिगाथामाह ॥

---

**No. 23. Sangrahanivivriti,** by PURNABHADRA's pupil [संग्रहणी विवृतिः--पूर्णभद्रसूरिशिष्यः].

Leaves 21 to 163; 13 inches long, 2 inches broad.

**Ends:**

जं उद्धरियमित्यादि । यदुद्धृतं श्रुतात्प्रज्ञापनादेः कालांतरप्राप्यं पूर्वाचार्यकृतं वा यदुद्धृतमथवा स्वमत्या क्षंतव्यं श्रुतधरैस्तथैव श्रुतदेवतयेति ॥
यदनवबोधानुपयोगतः किमपि विवृतमन्यत्र मया ।
तच्छोध्यं सूरिवरैः कृतांजलिः प्रार्थयेऽहमिति ॥ १ ॥
संग्रहणीविवृतिमिमां कृत्वा यदवापि पुण्यमत्र मया ।
तेनागमसंग्रहप्रवणोस्तु स चैव भव्यजनः ॥
स्थारापद्रपुरीयगच्छनलिनीखंडैकचंडद्युतिः
सूरिः पंडितमूर्द्धमंडनमणिः श्रीशालिभद्राभिधः ।
आसीत्तस्य विनेयतामुपगतः श्रीपूर्णभद्राह्वय-
स्तेषां शिष्यलवेन मंदमतिना वृत्तिः कृतेयं स्फुटा ॥ ४ ॥
एकादशवर्षशतैर्नवाधिकत्रिशताधिकैर्यातैः ‒ ‒ ‒

---

**No. 24. Katantrapanjikodyota,** by TRIVIKRAMA [कातन्त्रपञ्जिकोद्योतः--त्रिविक्रमः].

**Begins:**

ओं नमः शिवाय ॥ अथ ॥ अविदितानीति । नञ् न पठितव्यः सूत्रकारस्य विदितत्वात् ॥...

इति श्रीवर्द्धमानशिष्यत्रिविक्रमकृते पंजिकोद्योते प्रत्ययपादः समाप्तः ॥
उक्तं यदालूनविशीर्णवाक्यैर्निरर्गलं किंचन फल्गु पूर्वैः ।
उपेक्षितं सर्वमिदं मया तत्प्रायो विचारं सहते न येन ॥
आसीदियं पंजरचित्रसालिकेव हि पंजिका ।
उद्योतव्यपदेशेन त्वया पूर्णोज्वलीकृता ॥...

इति श्रीमत्कर्णोपाध्यायश्रीवर्द्धमानशिष्यश्रीत्रिविक्रमकृते कातंत्रपंजिकोद्योते द्विउक्तिपादः ॥...

इति श्रीवर्द्धमानशिष्यत्रिविक्रमकृते पंजिकोद्योते संप्रसारणपादः सपादः समाप्तः ॥

उक्तं यदालूनविशीर्णवाक्यैर्निरर्गलं किंचन फल्गु पूर्वैः ।
उपेक्षितं सर्वमिदं मया तत्प्रायो विचारं सहते न येन ॥...

इति श्री० पंजिकोद्योतेऽनुषंगपादः – – –

---

**No. 25. Dansanasattaripagaranam** [दंसणसत्तरिपगरणं].

Leaves 1 to 6; 12 inches long, 1½ inches broad. In 71 gathas.

---

**26. Upadesakandali,** by Asada. With the Commentary of Balachandra [उपदेशकन्दली सटीका मू० आसडः टी० बालचन्द्रः].

Leaves 1 to 284; 32 inches long, 2½ inches broad. Dated Samvat 1296 = A. D. 1240.

Begins:

यन्नाभीनासिकाभ्रूदृगलिकमुखहृत्तालुमौलिश्रवस्सु
ध्यानस्थानेषु रुध्वा निरवधि मरुतः पंच पश्यंति किंचित् ।
तस्माद्दृप्यत्यदंतः किमपि गुरुगिरा लक्ष्यते लक्ष्यरूपं
यत्तेजः सर्वतेजोमदकदनमहं प्रत्यहं तन्महेहम् ॥ १ ॥

वसन्शैवे मूर्ध्नि प्रतिदिशमुदस्ताखिलतमाः
क्षपायां तन्वानो रुचिमुपचितां शैत्यनिचिताम् ।
कलाशाली कामं कुवलयसमुल्लासरसिको
मृगांकः श्रीशांतिर्भवतु भवतांतिप्रशमनः ॥ २ ॥
धर्मे निर्मलभासि दासितसिताभीषुप्रभासंपदि
क्षीरक्षालननिस्तुषात्रिजगतीनेत्रभ्रमं बिभ्रति ।
यस्तारातुलनां महोत्पलमहःसंदोहसंदेहकृ-
द्देहश्रीरभजद्विभुः स भवतु श्रीपार्श्वनाथः श्रिये ॥ ३ ॥
कंदाद्विनिर्गत्य मृणालमूर्त्तिर्या ब्रह्मरंध्रांबुरुहे निलीना ।
सा योगिनां कुंडलिनीति नाम शक्तिः प्रसूते कवितामधूनि ॥ ४ ॥
आत्महितहेतवेहं सोदर्यायां विवेकमंजर्याः ।
वक्ष्ये श्रुतवनमल्लयां विवरणमुपदेशकन्दल्याम् ॥ ५ ॥

इह किल कलिकालगौतमश्रीमदभयदेवसूरिसुगुरूपदेशपरिशीलितसकल-सर्वज्ञसिद्धांतसारः । सारस्वतज्योतिरुद्योतमानकविताडंबरः । विवेकमंजरी-प्रकरणकरणप्रवणसुकृतसौरभवासितवसुंधरः। बंधुरोपजातगृहमेधिगुणः। प्रगु-णसम्यक्त्वानिःसीमः । श्रीमदासडकविः कविसभाशृंगार इत्यपरनामधेयः स्वश्रेयःसमुदयायोपदेशकंदलीप्रकरणचिकीः श्रीमंतमिहावसर्पिण्यामाद्यम-र्हतुंमभिष्टुवन् विहिताभीष्टसिद्धिप्रथाभिमामादौ भावमंगलगाथामाह ॥

तिहुयणमंगलतिलयं कयदुज्जयभाववेरिभयविलयं ।
केवलसिरिकुलनिलयं रिसहं पणमामि मुनिवसहं ॥१॥

व्याख्या—ऋषिगतावित्यनेन ऋषति गच्छति परमपदमिति ऋषभः । यद्वा । सर्वे गत्यर्था ज्ञानार्थाः । ऋषति जानाति त्रैकाल्यमिति ऋषभः । ऋषिवृषिलुसिभ्यः कित् । इत्यनेन अभः । तं प्रणमामि ॥

Ends:

अथ ग्रंथसमाप्तौ मंगलमाह ॥

रइयं पगरणमेयं जिणपवयणसारसंगहेण मए ।
सम्मं समत्तवियासडंवरं दिसउ भवियाण ॥१२४॥

व्याख्या—एतत्प्रकरणं मया रचितं केन कृत्वा । जिणपवयणसारसंगहेण जिनानां प्रवचनं सिद्धांतस्तत्र सारभूतानां पंचानामपि व्रतानां चतुर्णां च धर्मांगानां दानशीलतपोभावनाख्याणामपरेषां च चतुर्णां क्षांतिमार्दवार्जेवसंतोषाणां संग्रहः एकत्र मीलनं जिनप्रवचनसारसंग्रहः तेन । अन्यदपि प्रकरणमुत्सवो विवाहादिः सारसंग्रहेण द्रव्योच्चयेन क्रियत इत्युक्तिलेश :। किं करोतु। दिसतु ददातु । कथं । सम्मं सम्यक् । किं तत् । संमत्तवियासडंबरं सम्यक्त्वस्य सुदेवसुगुरुसुधर्मप्रतिपत्तिरूपस्य विकाशाडंबरो विस्तरस्तं सम्यक्त्वविकाशाडंबरं । केभ्यः । भवियाणं भव्येभ्यः भद्रकेभ्यः इति कवेरुक्तिः । वयं तु ब्रूमः-एतत्प्रकरणं भव्येभ्यः आसडं आसडनामानं सुकविं वरं प्रधानं दिशतु कथयतु । यतः कवयः काव्यकीर्त्तनैरेव परां प्रसिद्धिमायांतीति । किं विशिष्टमिदं प्रकरणं । सम्मत्तवि । वी प्रजनकांत्यशनखादनेषु इत्यनेन सम्यक्त्वं वेति समुद्दीपयति अवगमयति वा सम्यक्त्ववि क्विपा सिद्धमिति ।

अथ प्रशस्तगाथामाह ॥

सिरिभिल्लमालनिम्मलकुलसंभवकडुयरायतणएण ।
इय आसडेण रइयं गुरूपएसाणुसारेण ॥१२६॥

व्याख्या—इति पूर्वोक्तमुपदेशकंदलीनामधेयं प्रकरणं आसडेन रचितं रचनामानीतं । किंविशिष्टेन । सिरिभिल्लमालेति निर्मलं निर्दूषणं च तत्कुलं निर्मलकुलं श्रिया उपलक्षितं च तत् भिल्लमालाख्यं निर्मलकुलं च तत्तथा तस्मात्संभवति श्रीभिल्लमालनिर्मलकुलसंभवः स चासौ कटुकराजस्तस्य तनयः पुत्रो यः स तथा तेन । तद्यथा ।

श्रीभिल्लमालनामा हिमाद्रिरिव गोत्रशेषरो जयति ।
यस्य प्रजा महेशप्रिया न कैर्वर्ण्यतेऽपर्णा ॥ १ ॥
गंगाप्रवाह इव तत्र बभूव पुण्य-
भावोत्कटः कटुकराज इति प्रसिद्धः ।
यः सर्वदा जिनपदाश्रयणप्रवीण-
माहात्म्यतः पदमदत्त भवस्य मूर्ध्नि ॥ २ ॥
अर्णीलितेति (आनल्देवी) दयिताऽस्य बभूव सीता-
रेखास्पदं वसुमतीव सती बभौ या ।
व्योमावनीव च जिनत्रिपदीविविक्ता
पुन्नागनंदनवती त्वमरावतीव ॥ ३ ॥
तयोरजनिषातां द्वौ सुतावासडजासडौ ।
सत्पथं न व्यलंघेतां धुर्यौ धर्मरथस्य यौ ॥ ४ ॥
आसडः कालिदासस्य यशोदीपमदीपयत् ।
मेघदूतमहाकाव्यटीकास्नेहनिषेचनात् ॥ ५ ॥
श्रुत्वा नवरसोद्गारकिरोऽस्य कविता गिरः ।
राजसभ्याः कविसभाशृंगार इति यं जगुः ॥ ६ ॥
जिनस्तोत्रस्तुतीः पद्यगद्यबंधैरनेकशः ।
चक्रे यः कर्मकृष्णाहिजांगलीमंत्रसंनिभाः ॥ ७ ॥
विवेकमंजरीनामधेयप्रकरणच्छलात् ।
कल्याणसिद्धये येन कृता सिद्धरसप्रपा ॥ ८ ॥

तेन सदा जिनगुणप्रगुणांतःकरणकशाऽनुशासितहृषीकाश्वगडेन । श्रीमतासडेन महाकविनेदमुपदेशकंदलीप्रकरणं किं स्वमनीषया विरचित-मित्याह । गुरूवएसाणुसारेण । गुरवोऽत्र श्रीमदभयदेवसूरिनामानस्तेषा-

मुपदेशा गुरूपदेशास्तेषामनुसारोऽनुवादस्तेनेति संक्षेपार्थो व्यासार्थस्तु
प्रशस्तेरवसेयः ॥ सा चेयम्—

श्रीवीरसेन इति वज्रमुनीश्वरस्य
पट्टे बभूव दशपूर्वधरस्य पूर्वम् ।
शाखा य एष जिनशासनकल्पवृक्ष-
स्कंधो दिगंतरगतीः सुषुवे चतस्रः ॥ १ ॥
शाखांकुरा गणभृतोऽत्र बभूवुरेते
नागेंद्र इत्यमलकीर्तिनदीनगेंद्रः ।
चंद्रश्च सांद्रमतिभागथ निर्वृतिश्च
विद्याधरश्च भुवि विश्रुतनामधेयः ॥ २ ॥
एतेषु चंद्र इति यः प्रबभूव सूरि-
स्तस्य प्रफुल्लगुणगच्छवनस्य गच्छे ।
भूयांस एव भुवनत्रयवंदनीयाः
संजज्ञिरे गणधरा गुणिनो धरायाम् ॥ ३ ॥
प्रद्युम्नसूरिरिति तेषु रतिप्रियेषु
भेत्ता बभूव निखिलागमशास्त्रवेत्ता ।
येन प्रबोध्य तलपाटपुरे नरेंद्र-
मुत्पाटयां तलत एव कलिर्बभूव ॥ ४ ॥
श्रीचंद्रगच्छनवकैरवकोलिचंद्र-
श्चंद्रप्रभः प्रभुरभिज्ञतमस्ततोऽभूत् ।
यो विश्वलोकविदितं मुदितांतरात्मा
प्राभातिकीं जिनपतिस्तुतिमाततान ॥ ५ ॥
तस्माद्धनेश्वर इति श्रुतपारदृश्वा
विश्वाभिरामचरितोऽभ्युदियाय सूरिः ।

यो मंत्रमाप गुरुतः सुरभूयभाजः
प्राबोधयच्च समभूपुरदेवतां यः ॥ ६ ॥
तस्याभितः समभवन् भुवनप्रशस्याः
शिष्याः श्रुताक्षकमलोद्धरणप्रवीणाः ।
चत्वार ऊर्जितरुचो विदुषां निषेव्या
देव्याः करा इव पुराणकविप्रसूतेः ॥ ७ ॥

श्रीवीरभद्र इति सूरिरमीषु मुख्यः
श्रीदेवसूरिरिति भूरिगुणो द्वितीयः ।
श्रीदेवभद्र इति सूरिवरस्तृतीयो-
टिप्पने--(श्रीशांतिसूरिरिति सूरिवरस्तृतीयो)
देवेंद्रसूरिरिति च प्रथितश्चतुर्थः ॥ ८ ॥

श्रीमंडलीति नगरी नगरीति कृत-
प्रासादसंहतिरितोऽस्त्यमरावतीव ।
देवेंद्रसूरिसुगुरुर्विततान तस्यां
तद्वासिनां च हृदि मूर्ध्नि च वासलक्ष्मीम् ॥ ९ ॥

प्रातिष्ठिपन्निजपदे स विनिद्रभद्रे
भद्रेश्वरं प्रभुमनश्वरकीर्त्तिपूरम् ।
आद्यामनंग इति संगतवान् यदीय-
ध्यानानले मदनवन्मदनो विलीय ॥ १० ॥
तत्पट्टमौलिमणितामभजद्भवार्ति-
भीतात्मनामभयदोऽभयदेवसूरिः ।
पापातपापगममन्वहमातपत्री-
भूयांगिनां शिरसि यस्य करश्चकार ॥ ११ ॥

तस्योपदेशपदपेशललेशमाप्य
वारांमुचेव कियदेव पयः पयोधेः ।
श्रीआसडेन कविना जनितोपदेश-
कंदल्यसावसुमतामुपकारहेतोः ॥ १२ ॥
किंच
तत्पट्टपर्वतमलंकुरुते स्म कर्म-
व्यालावलीहरियुवा हरिभद्रसूरिः ।
भूम्ना यदीयचरणोपनतैरशोभि
मुक्ताफलोज्ज्वलतमैर्जगती यशोभिः ॥ १३ ॥
शिष्यस्तस्य विभोर्नमस्यचरणांभोजस्य जज्ञे महा-
साहित्योपनिषन्नभोंगणरविः श्रीबालचंद्रः कविः ।
यं स्वप्नांतमुपेत्य तद्दृढतरानुध्यानतुष्टा जगौ
मत्पुत्रस्त्वमसीति शीतलगिरा देवी गिरामीश्वरी ॥ १४ ॥
इतश्च
आसडस्य मृडस्येव गौरीगंगे बभूवतुः ।
पृथिवीदेवीजैतल्लदेव्यौ द्वे तस्य वल्लभे ॥ १५ ॥
जैतल्लदेव्यां तनयावभूतां द्वावेतयोराजडनामधेयः ।
ज्येष्ठोतिविद्वान् कवयोभिदध्युर्बाल्येपि यं बालसरस्वतीति ॥ १६ ॥
दुर्वृत्तानां शंकनीयः कनीयान् मंत्री जैत्रः सिंहवज्जैत्रसिंहः ।
मुद्रा सव्या त्यागिनोऽस्यापसव्या चापव्यापाराद्भुतस्याप हस्तम् ॥ १७ ॥
आरिसिंह इति च पृथिवीदेव्यां करपुष्करश्रवद्दानः ।
गुरुगिरिपरिणतकर्मा गज इव कलभोगजः समभूत् ॥ १८ ॥
मंत्रिणो जैत्रसिंहस्य पत्नी जल्हणदेव्यसौ ।
त्रीनसूत सुतान् वेदानिव वाणी प्रजापतेः ॥ १९ ॥

आशापाल इति प्रसिद्धगरिमा तेषां गरीयानयं
मध्यश्चाजय इत्यनुगुणाध्यात्मैकधन्याशयः ।
चक्रे ज्ञानविलासकीर्तनमसौ शास्त्रं पुमर्थात्मकं ।
पुण्यात्माऽमृतपाल इत्यसमधीपात्रं तृतीयस्त्वयम् ॥ २० ॥
अरिसिंहस्य तथाल्हणदेवीति निवीतकलुषा पत्नी ॥
रत्नत्रयामिव जिनवागजीजनत्तनुजनित्रितयम् ॥ २१ ॥
आशाधरस्तेषु सुधीरधीती समग्रशास्त्रेषु किलाग्रिमोऽस्ति ।
विमध्यमश्चाल्हणसिंहनामा प्रज्ञागरिष्ठोऽभयदः कनिष्ठः ॥ २२ ॥
इत्येवं स्वकुटुंबवर्गसहितेनाभ्यर्थितो मंत्रिणा
श्रीजैत्रेण विवेकिना निजपितुः श्रेयःश्रियोवृद्धये ।
एतां वृत्तिमुवाच तत्कुलगुरुः श्रीबालचंद्राख्यया
विख्यातोऽधिपतिर्गणस्य गणिनीरत्नश्रियो धर्मजः ॥ २३ ॥
देवानंदमुनींदुगच्छगगनालंकारशीतद्युतेः
शिष्यः श्रीकनकप्रभाख्यसुगुरोस्त्रैविद्यचूडामणेः ।
श्रीबालेंदुकवींद्रपाणिकमलोन्मीलत्प्रतिष्ठः सुधी-
रेतस्यां सहकारिकारणमभूत्प्रद्युम्नसूरिः पुनः ॥ २४ ॥
एतां शोधयति स्म विश्रुतबृहद्गच्छांबरश्रीशिरो-
रत्नं किंच धनेश्वरस्य सुगुरोः पट्टोदयाद्रौ रविः ।
छंदोलंकृतितर्कलक्षणचणः सिद्धांतशुद्धाशयः ।
साहित्योपचयप्रपंचनविभुः श्रीपद्मचंद्रः प्रभुः ॥ २५ ॥
उत्सूत्रं यदसूत्रि सूत्रविकलेनालक्षणं लक्षण-
न्यूनेन श्लथरीति रीतिरिपुणा व्यर्थं हतार्थेन च ।
किंचित् क्वापि वचो मया प्रलपितं स्वच्छंदमच्छंदसा
तच्छोध्यं विबुधैः परैरपि परं कृत्वा प्रसादं मयि ॥ २६ ॥

पूर्वाशा कुंकुमांभःसुभगमिव मुखं बिभ्रती भानुबिंबं
संध्यारागांशुकश्रीपरिचयरचनाभासुरा वासरादौ ।
आत्मानं पश्चिमाशाधृतशशिमुकुरे पश्यतीवात्र याव-
त्तावद्व्याख्यायमाना कृतिभिरतितरां वर्ततां वृत्तिरेषा ॥ २७ ॥
इत्याचार्यश्रीबालचंद्रविरचितायामुपदेशकंदलीवृत्तौ चतुःकषायविरतिविवरणं
त्रयोदशो विश्रामः समाप्तः ॥
शिवमस्तु सर्वजगतः परहितनिरता भवंतु भूतगणाः ।
दोषाः प्रयांतु नाशं सर्वत्र सुखी भवतु लोकः ॥

ग्रंथाग्रं ७६०० संवत् १२९६ वर्षे फाल्गुणशुदि ९ शुक्रे समस्तराजा-
वलीपूर्वं महाराजाधिराज श्रीभीमदेवकल्याणविजयराज्ये तन्नियुक्तमहामा-
त्यदंडश्रीताते श्रीश्रीकरणं परिपंथयतीत्येवं काले पुस्तकमिदं लिखितमिति ।

---

**No 27. A Manuscript containing,**

1. **Uttaradhyayanasutra** [ उत्तराध्ययनसूत्रम्. ],
2. **Uttaradhyayananiryukti** [ उत्तराध्ययननिर्युक्तिः ],
3. **Uttaradhyayanatika**, by SANTYACHARYA [उत्तराध्ययन-टीका—शान्त्याचार्यः ].

**Leaves 1 to 54 (sutra and niryukti), 1 to 368 (commentary); 31½ inches long, 2 inches broad. Dated Samvat 1343=A. D. 1287.**

संवत् १३४३वर्षे लौकिककार्तिकशुदि २ रवावद्येह श्रीमदणहिल्पाटके
समस्तराजावलीसमलंकृतमहाराजाधिराज श्रीमत् सारंगदेवकल्याण-
विजयराज्ये तन्नियुक्तमहामात्यश्रीमधुसूदने श्रीश्रीकरणादिसमस्तमुद्रा-
व्यापारान् परिपंथयति सतीत्येवं काले प्रवर्तमाने तेनैव नियुक्तमहं
श्रीसोमप्रतिपत्तौ बीजापुरे पुस्तकमिदं लेखकसीहाकेन लिखितामिति ॥
मंगलं महाश्रीः ॥

**28. The Anuyogadvarasutra; Churni on,** by MAHASENA [अनुयोगद्वारचूर्णिः—महासेनगणिः].

Leaves 1 to 43 (Sutra), 44 to 273 (Churni), 274 to 430 (Commentary); 25 inches long, 1½ inches broad. Dated Samvat 1456=A. D. 1400.

**Begins:**

ओं नमो वीतरागाय ॥

किंचि पंचविहायारजाणतं तप्पहवाण पउज्जुत्तं थाइतं च गुरुं प्रणमिऊण । जातिकुलरूवणिणआदिगुणसंपन्नो य सीसो भणइ । भगवं तुब्भंतिए अणुयोगद्दारक्कमं समोतारं तदत्थं च णातुमिच्छामि। ततो गुरू तं सीसं विणयादिगुणसंपण्णं जाणिऊण तद्रहितं वा ततो भणति सुणेहि कहेमि ते अणुउगद्दारत्थं तक्कमं च ।

**Ends:**

तेसुं जो जहट्ठिउ सो तसो सव्वणयसंमतो भवताति ॥

इतिश्रीस्वेतांबराचार्य–महल्लमहसेर्णगणिमहत्तरपूज्जपादानामनुयोगद्दाराणां चूर्ण्णि समत्ता ॥ अनुयोगद्वारचूर्णिः ॥

अक्षरमात्रपदस्वरहीनं व्यंजनसंधिविवर्जितरेफः ।
साधुभिरेव मम क्षमियव्वो कोऽत्र न मुह्यति शास्त्रसमुद्रे ॥
मंगलं महाश्रीः ॥ शिवमस्तु श्रीचतुर्विधसंघस्य ॥
यावद्गिरिनदीद्वीपा यावच्चंद्रदिवाकरौ ।
यावच्च जैनधर्मोयं तावन्नंदतु पुस्तकम् ॥

संवत् १४५६ वर्षे श्रीस्तंभतीर्थे बृहत्पौषधशालायां भट्टारकश्रीजयतिलक-सूरिणा अनुयोगद्वारचूर्णिउद्धारः कारापितः ॥

**29. A Manuscript containing,**

1. **Anuyogadvaratika,** by HEMACHANDRA [अनुयोगद्वारटीका—हेमचन्द्रः],
2. **Unodarikaditapas** [ऊनोदरिकादितपः],
3. **Pratishthavidhana** [प्रतिष्ठाविधानम्].

Leaves 1 to 15 (Unodarikaditapas) and 16 to 36 (Pratishtavidhana]; 14 inches long, 2 inches broad.

Pratishthavidhana begins:

इह हि श्रावकेण चार्हत्प्रतिष्ठा कार्या। उपमिति १ तिलकमंजरीस्थानत्रय २ हरिवंश ३ स्थानक ४ दमयंती ५ कथाकोश ६ भुवनसुंदरी ७ प्रशमरति ८ पंचासक ९ पंचवस्तुक १० कल्याणकप्रकरण ११ स्तवन १२ निशीथ १३ कल्प १४ महानिशीथ १५ आवश्यकेषु १६ श्रूयमाणत्वात्॥ तत्रोपमित्याम्।

Ends:

ततः अमारिउद्घोषणापूर्वं अष्टाह्निकामहिमानं कारयेत्॥

इति प्रतिष्ठाविधानं समाप्तम्॥ ग्रंथाग्रं ३६०

---

**No. 30. The Kavyadarsa a commentary on the Kavyaprakasa,** by SOMESVARA [काव्यादर्शः काव्यप्रकाशसंकेतः—भट्टसोमेश्वरः].

Leaves 101 to 179; 14 inches long, 2 inches broad. Contains the fourth, fifth and Sixth Ullasas.

P. 103.

एवं शुद्धस्य ध्वनेः स्वप्रभेदं प्रति चत्वारो भेदा दर्शिताः।
इति भट्टसोमेश्वरविरचिते काव्यादर्शे काव्यप्रकाशसंकेते चतुर्थ उल्लासः॥

व्यंग्यार्थो ललनालावण्यप्रख्यो यः प्रतिपादितस्तस्य प्राधान्ये उत्तमं काव्यं ध्वनिरित्युक्तं। गुणभावे च तस्ये चारुत्वप्रकर्षे गुणीभूतव्यंग्यो नाम मध्यमः काव्यभेदः—

इति भट्ट० पंचमोल्लासः।

शब्दार्थचित्रमिति । शब्दार्थवैचित्र्यमात्रं व्यंग्यरहितमवरं काव्यं यत्प्रथमोल्लास उदाहरणद्वयेन दर्शितं । तत्र – – –

---

**No. 31 Karmastavatika,** by GOVINDAGANI [कर्म्मस्तवटीका—गोविंदगणिः].

Leaves 1 to 73; 14 inches long, 2 inches broad. Dated Samvat 1218 = A. D. 1162.

**Ends:**

इति श्वेतपटाचार्यश्रीगोविंदेन निर्मिता॥ कर्मस्तवस्य टीकेयं देवनागगुरोर्गिरा ॥ ॥ समाप्ता चेयं कर्म्मस्तवटीका ॥ ॥ ग्रंथमानं १०९ ॥ ॥ संवत् १२१८ माघ शुदि १४ बुधे ॥ अनुष्टुप्छंदसा प्रायः संकलय्यानुवर्णितं । सहस्रमेकं श्लोकानां नवत्युत्तरमेव तु ॥ ॥

---

**No. 32 A Manuscript containing,**

1. **Kalpasutra with the Kalikacharyakatha** [कल्पसूत्रं कालिकाचार्यकथा चं],
2. **Dipotsavakalpa,** by SARVANANDASURI [दीपोत्सवकल्पः—सर्वानन्दसूरिः].

Leaves 1 to 152 and 153 to 164; 15 inches long, 2 inches broad. Dated Samvat 1336 = A. D. 1280.

Kalikacharyakatha ends:

॥ इति पज्जूसवणाकप्पो सम्मत्तो ॥ ॥ तत्समाप्तौ च समाप्तं चेदं श्रीकालिकाचार्याख्यानकं ॥ ॥ संवत् १३३६ वर्षे जेष्ठशुदि ९ रवौ श्रीपत्तने महाराजाधिराजस्य श्रीसारंगदेवस्य विजयिनि राज्ये श्रीमत्पर्यूषणाकल्पोऽयं लिखितः ॥ ॥ शुभं भवतु चतुर्विधश्रीसंघभट्टारकस्य ॥ ॥ ॥ ॥ मंगलं महाश्रीः ॥ ॥ ॥ श्रे० विल्हणेन मातृमोहिणिश्रेयोर्थं श्रीपर्यूषणाकल्पपुस्तिका लिखापिता ॥ पूज्यश्रीदेवसूरिभ्यः ॥

Dipotsavakalpa begins:

गुरोः श्रीवर्धमानस्य वाचः पुण्यरसोज्वलाः ।
जयंति जगदानंदकंदकल्याणहेतव ः ॥ १ ॥

Dipotsavakalpa ends:

आनंदद्रुमकंदकंदलसमुद्भूतामृते निर्वृते
वीरे श्रीमति नंदिवर्धननृपस्तत्प्रेमर्चिताग्वितः ।
संबोध्यादरसुंदरेण मनसा स्वस्रा स्वयं भोजितः
तत्प्रावर्तत पर्व सर्वजगति भ्रातृद्वितीयाभिधम् ॥ ४१ ॥
इत्याचार्यश्रीसर्वानंदविरचितो दीपोत्सवकल्पः समाप्तः ॥

---

**No. 33. A Manuscript containing,**

1. **Upadesamala**, by Dharmadasa [ उपदेशमाला-धर्मदासः ],
2. **Dharmopadesamala** [ धर्मोपदेशमाला ],
3. **Yogasastra**, by Hemachandra [ योगशास्त्रम्-हेमचन्द्रः ],
4. **Bhaktamarastotra**, by Manatunga [भक्तामरस्तोत्रम्—मानतुङ्गः ],
5. **Pratikramanasutra** [ प्रतिक्रमणम् ],
6. **Pravrajyavidhana** [ प्रव्रज्याविधानम् ],
7. **Namaskaraphala** [ नमस्कारफलम् ],
8. **Jinapatistotra**, by Bilhana [जिनपतिस्तोत्रम्—बिल्हणः],
9. **Anityatakulaka.**

**Leaves 1 to 196; 10 inches long, 2 inches broad.**

**Jinapatistotra begins:**

जयति भुजगराजप्राज्यफुल्लत्फणाली-
मणिकिरणकदंबाडंबरी पार्श्वनाथः।
भुवनभवनगर्भोद्भ्रमोहांधकार-
च्छिदुरतरुणदीपोद्दीपने कौतुकी वः॥ १॥
दिशतु सुकृतलोकप्रस्तुतश्लाघ्यपूजा-
विलसितगुरुधूमस्तोमसंगादिवांगम्।
दधदभिनवमेघश्यामलं मंगलं व-
स्त्रिजगदभयदीक्षादीक्षितः पार्श्वनाथः॥ २॥
कमपि कमठदैत्याकाल्कालांबुवाह-
व्यतिकरबधिरोपि श्रीविशेषं दधानः।
मदनमदविकारांभोरुहम्लानहेतुं
जनयति स जिनेंदुर्युष्मदाशाप्रकाशम्॥ ३॥
जयति भवदवाग्निव्याप्तिनिर्दह्यमान-
त्रिभुवनवनरेखादेशकः पार्श्वनाथः।
घनमयमिव देहं पन्नगश्यामचूडा-
मणिविरचितचंचूनाकिचापं दधानः॥ ४॥
कलितगुरुल शोभा भोगभर्तुः शरीरे
निजकरकमलाग्रे भृंगिमालायमाना।
दिशिदिशि मृगनाभीपत्रभंगाभिरामा
ददतु शुभगार्तिं वः पार्श्वनाथस्य भासः॥ ५॥
तरलतरललामानंगहारांगहारा-
मरसमरसरामापांगसारंगसारा।
नवननवनवोक्तिर्दीप्रसिद्धं प्रसिद्धं
नमति न मतिमांस्त्वं कोंजनाभंजनाभम्॥ ६॥

कुवलयवननीलश्याम विभ्रत्स्वभावं
नयघनघनशैलं पौरुषाभ्रष्टभावं ।
वितरतु मम तानि श्रीजिनेंदुः सुखानि
श्रुतचतुरमतानि श्रीजिनेंदुः सुखानि ॥ ७ ॥
फणपतिफणरत्नोद्द्योतविद्योतितश्री-
र्ददतु शुभगार्तिं वः पार्श्वनाथस्य मूर्तिः ।
रणरणकविशेषक्षोमवन्मोक्षलक्ष्मी-
सरभसपरिरंभात्कुंकुमेनारुणेव ॥ ८ ॥
इति जिनपतेः स्तोत्रं चित्रं महाकविबिल्हण-
प्रथितमखिलत्रैलोक्यैकप्रकाशनभास्वतः ।
पठति सततं यः श्रद्धावान्न मज्जति सज्जनो
भवजलनिधौ स प्रद्युम्नस्थितिं चिरमाश्रितः ॥ ९ ॥

---

**Anityatakulaka begins:**

निशाविरामे परिभावयम्मि गेहे पलित्ते किमहं सुयामि ।

**Ends:**

दाणं सुपत्ते सवणं सुतित्थे सुसाहुसेवा सिवलोयमग्गो ॥ २२ ॥
कुलकं समाप्तम् ॥ शुभं भवतात् समस्तसाधुलोकस्य ॥

---

**No. 34. Upadesamalavritti,** by SIDDHARSHI with a Kathanaka, by VARDHAMANASURI [ उपदेशमालावृत्तिः—सिद्धर्षिः—कथानकसहिता कथा० वर्द्धमानसूरिः ].

**Leaves 1 to 246; 29 inches long, 2½ inches broad. Dated Samvat 1294 = A. D. 1238.**

Begins:

ओं नमः सर्वज्ञाय ॥

हेयोपादेयार्थोपदेशभाभिः प्रबोधितजनाब्जम् ।

Ends:

प्रोक्तार्थसाधनविधौ खलु जीवलोकः ॥

उपदेशमालाविवरणं समाप्तम् ॥

कृतिरियं जिनजैमिनिकणभुक्सौगतादिदर्शनवेदिनः सकलग्रंथार्थनिपुणस्य श्रीसिद्धर्षेर्महाचार्यस्येति ॥

सिद्धर्षिकृता विवृतिः कथानकैर्योजिता स्वबोधाय ।

प्राक्तनमुनींद्ररचितैश्चारुभिरुपदेशमालायाः ॥

॥ संवत् १२९४ – – –

---

**No. 35. Upadesamalavritti,** by Siddharshi [उपदेशमालावृत्तिः—सिद्धर्षिः].

Leaves 1 to 284; 32 inches long, 2½ inches broad. Dated Samvat 1331 = A.D. 1275.

Ends:

नमोस्तु तस्मै जिनधर्मसूरये – – –

उपदेशमालाविवरणं समाप्तम् ॥

ग्रंथाग्रं ९९०० मंगलं महाश्रीः ॥ शुभं भवतु लेखकपाठकयोः ॥ संवत् १३३१ वर्षे प्रथमज्येष्ठवदि १९ शनौ महं० आरीसिंहपुस्तकं लिखितम् ॥

---

**No. 36. The Commentary of Abhayadeva on the Bhagavatisutra** [भगवतीसूत्रवृत्तिः—अभयदेवः].

Leaves 1 to 501; 27 inches long, 2½ inches broad. Dated Samvat 1187 = A. D. 1131.

**Ends:**

दशसंख्येष्वलीलिखत् ॥ २१ ॥
तत्थ य गंथा सुयगडंगविती ससुत्तनिज्जुत्ती ।
तह य उवासगदसियाइ अंगसुत्ताणि वित्तीउ ॥ २२ ॥
तह उववायसुत्ता वित्ती रायप्पसेणइ य सुत्तं ।
तह कप्पसुत्तभासा चउत्थए पंचमे य पुणो ॥ २३ ॥
कप्पचुण्णी छट्ठे दसवेयालियविचिसुत्तनिज्जुत्ती ।
७–८
उवएसमालभवभावणाण दो पुत्थया रम्मी ॥ २४ ॥
तह पंचासगवित्ती सुत्त लिहियं च नवमयं एयं ।
पिंडविसुद्धी वित्ती पढमपंचासगस्स तहा ॥ २५ ॥
चुन्नि जसदेवसूरीरइया तह लेहुयवीरचरियं च ।
रयणचूडकहावि य दसमंमि य पोत्थयंमि फुडं ॥ २६ ॥
अन्यच्च सिद्धभार्यापि राजमत्यभिधानिका ।
कथंचिद्दिवमासीत्तया चोचे निजो वरः ॥ २७ ॥
भगवतीपुस्तके रम्ये कार्ये मत्पुण्यहेतवे ।
तेन तद्वचनात्तूर्णं कारितं पुस्तकद्वयम् ॥ २८ ॥
एकत्र भगवतीसूत्रं द्वितीये वृत्तिरुज्ज्वला ।
लेखिता चारुवर्णाढ्या मोक्षमार्गोत्तरप्रपा ॥ २९ ॥
संवत्सरे मुनिवसुस्मरवैरिसंख्ये श्रीमत्पुरेऽणहिलपाटकनामधेये
पृथ्वीं च शासति नृपे जयसिंहदेवे निष्पादितः प्रवरपुस्तकवर्ग एषः ॥३० ॥
श्रीशालिभद्राभिधसूरिशिष्यश्रीवर्धमानप्रभुपादपद्मे ।
इंदिंदिराकारजुषां ततः श्रीचक्रेश्वराचार्यविशिष्टनाम्नाम् ॥३१॥
समर्पितः पुस्तकवर्ग एष निरंतरं शोधनवाचनाय ।

इदं च तन्मध्यगतं सुवर्णसत्पुस्तं राजति वाच्यमानम् ॥ १२ ॥
यावन्नभोंगणगताः शशिभानुतारा
राजंति लोकतिमिरं सततं क्षिपंतः ।
यावद्ध्रुवः सुरगिरिश्च चकास्ति तावत्
श्रीपुस्तको विजयतामिह वाच्यमानः ॥ १३ ॥
संवत् ११८७ कार्तिकसुदि २ लिखितम् ॥
भगवतीविशेषवृत्तिपुस्तकं श्रीचक्रेश्वरसूरीणां श्रे० सिद्धश्रावकस्य ॥

---

**No. 37. Mahaviracharitra**, by HEMACHANDRA [महावीरचरित्रम् –हेमचन्द्रः].

Dated Samvat 1368 = A. D. 1312.

– – – – – – – – – – – – – – – – – – – –

– – – – सरस्वतापदमसौ सद्वृत्तमुक्तालयः ।
प्रौढश्रीकुलमंदिरं विजयते कोरेणुगच्छांबुधि-
श्चित्रं यन्न जडाशयो न च परं कुग्राहसत्त्वाकुलः ॥ १ ॥
सत्पत्रराजी शुभपर्वरम्यः छायी सुशाखी सरलः सुवर्णः ।
सद्धर्मकर्मा क्षितिभृत्प्रतिष्ठवंशोस्ति वंशो भुवि धर्कटानाम् ॥ २ ॥
श्रीमदूकेशवंशेस्मिन् स्वच्छमुक्ताफलोपमाः ।
साधूनां हृदलंकारा बभूवुः पुरुषास्त्रयः ॥ ३ ॥
आद्यो देवधरस्तेषु दाने धाराधरः परः ।
प्रीणिताशेषलोकोभून्न तु जातु जडान्वितः ॥ ४ ॥
जिनालययशःसिद्धिदानपुण्यादिकर्मणाम् ।
समुद्धरणधौरेयो द्वितीयोऽभूत्समुद्धरः ॥ ५ ॥

दानादिगुणगणारामयशःकुसुमसौरभैः ।
वासिताशोऽपरो जात आशाधरस्तृतीयकः ॥ ६ ॥

समुद्धरस्य निर्मोया जाया सौभाग्यशोभिनी ।
शोभिनीत्याख्यया जाता शीलालंकारधारिणी ॥ ७ ॥

धर्मद्रुमस्य मूलाभो जज्ञे मूलूः सुतस्तयोः ।
पुत्री सरस्वती लीलू जातौ ब्राह्मीश्रियाविव ॥ ८ ॥

गोहिनी मूलूकस्यास्ति नाल्ही गंगेव देहिनी ।
तयो रत्नत्रयाधाराः पुत्राः संजज्ञिरे त्रयः ॥ ९ ॥

आद्यो वइराकनामा द्वितीयश्छोहडः सुधीः ।
सीहडस्तृतीयः ख्यातः पुमर्था मूर्तका इव ॥ १० ॥

पुत्रिकाश्च तयोस्तिस्रो जाताः शक्तित्रयोपमाः ।
चापला कर्मी कर्पूरी सत्यशीलदयान्विताः ॥ ११ ॥

वयराकस्य सद्भार्या नयविनयगुणान्विता ।
वस्तिणिर्वस्तुतत्वज्ञा स्वजनानंददायिनी ॥ १२ ॥

तस्या जाताविमौ पुत्रौ धर्मशीलपरायणौ ।
आद्यो मदन एवासौ द्वितीयः कर्मसिंहकः ॥ १३ ॥

अथाशाधरकांताभूत्खेतूः क्षेत्रं सुकर्मणाम् ।
लक्ष्मीधरस्तयोः पुत्रो लक्ष्मीवर इवापरः ॥ १४ ॥

रूपला रुक्मिणीवास्ति तस्य सद्धर्मचारिणी ।
तत्सुतो हरपालाख्यश्छाडू दक्षा च तत्सुता ॥ १५ ॥

एवं स्वकुटुंबयुतः साधुर्मूलूः स्वमातृश्रेयसे ।
श्रीमन्महावीरचरित्रं गृहीतं निजगुरुभिर्वाचयांचक्रे ॥ १६ ॥

तस्मिन्विस्मयकारिहारिचरितः कृष्णर्षिशिष्यः पुरा
चंचचंद्रकुलध्वजः समजनि श्रीनन्नसूरिः प्रभुः ।
उद्गीते दिवि किन्नरैर्यदमलश्लोके सुरा धुन्वते
मूर्ध्नः कांचनकिंकिणीकवचितश्रोत्रं गजास्यं विना ॥ १७ ॥

संवत् १३६८ वर्षे कोलापुर्यां श्रीमन्महावीरचरितं श्रीनन्नसूरिभिः सभा-व्याख्याने व्याख्यातं । श्रावकमूलुवइरासक्तम् ॥

---

**No. 38. A Manuscript containing the Dasavaikalika and the Pakshika sutras** [दशवैकालिकसूत्रम्—पाक्षिकसूत्रं च]. Dated Samvat 1352 = A D. 1296.

Ends:

मंगलं महाश्रीः ॥
श्रीमेदपाटदेशक्षितिराजप्राज्यराज्यधौरेयः ।
सीमंधर इति मंत्री श्रीकरणिक इह समस्ति पुरा ॥ १ ॥
उन्मीलद्बहुलीलस्फूर्जितशीलप्रधानशृंगारा ।
नीभल इति तद्गृहिणी गृहनीतिविशारदा जाता ॥ २ ॥
तस्याः स्वीयभगिन्या अगण्यसत्पुण्यकल्पलतिकायाः ।
सजलजलवाहपटली दत्ता श्रीपुस्तिका शस्ता ॥ ३ ॥
थांथीसुश्राविकया वाचयितुं गच्छसकलसाधूनाम् ।
सेयं प्रवाच्यमाना विबुधैर्नंद्याच्चिरं कालम् ॥ ४ ॥
श्रीविक्रमत्रयोदशशतद्विपंचाशकस्य वर्षस्य ।
भाद्रपदाभिधमासे पक्षे— —स्तिका प्रवरे ॥ ५ ॥

---

**No. 39. Brahmadiprakriya [ब्रह्मादिप्रक्रिया].**

**Leaves 1 to 31; 11 inches long, 12 inches broad. Incomplete.**

**Begins:**

ऐं नमः ॥

नत्वा जगद्गुरुं देवं महावीरं परं शिवम् ।
ब्रह्मादिप्रक्रियां वक्ष्ये तत्सिद्धांतानुसारतः ॥ १ ॥

ब्रह्माण्युपासनामेषां दीक्षां देशादिसंज्ञिताम् ।
तद्भावलिंगं स्पष्टार्थं फलं चेति समासतः ॥ २ ॥

बृहत्वाद्बृंहकत्वाच्च ब्रह्माण्याहुर्महर्षयः ।
सुखारंभादिसंज्ञानि पंच तान्यत्र शासने ॥ ३ ॥

सुखारंभं तथा मोहपराक्रममथापरम् ।
मोहघ्नं परमज्ञानं सदाशिवमनुत्तरम् ॥ ४ ॥

सम्यग्दृष्टिगतं ह्याद्यं विरतस्थमतः परम् ।
तृतीयमप्रमत्तस्थं सर्वज्ञस्थं ततो मतम् ॥ ५ ॥

अस्तकर्मकलातीतसिद्धस्थं पंचमं तथा ।

---

**40. Jinadattakhyana [जिनदत्ताख्यानम्].**

**Leaves 1 to 10 69; 10 inches long, 1½ inches broad. Dated Samvat 1186 = A. D. 1130.**

**Ends:**

तउ-काऊण महातवं आराहिऊण मरणयालं गओ सुरलोयं तउ पारंपरेण निव्वाणं त्ति जिणयत्तो ॥

जिनदत्ताख्यानं समाप्तम् ॥ संवत् ११८६ अद्येह श्रीचित्रकूटे लिखितं माणिभद्रेण यतिना यतिहेतवे साधवे वरनागाय स्वस्य च श्रेयस्कारणम् ॥ मंगलमस्तु वाचकजनानाम् ॥

---

**No. 41. Bhavanaprakarana** [भावनाप्रकरणम्].

Leaves 1 to 63, 12 inches long, 2 inches broad.

Begins:

ओं नमो वीतरागाय ॥ अर्हं ॥

अर्चितमद्य धिगिदं सदागदपदं वपुः ।

मुधैव मुग्धाः कुर्वंति तन्मूर्च्छां तुच्छबुद्धयः ॥ १ ॥

P. 48:

इति निगदितमुग्रं कर्मकौटिल्यभाजा-

मृजुपरिणतिभाजां चानवद्यं चरित्रम् ।

तदुभयमपि बुद्ध्या संस्पृशन्मुक्तिकामो

निरुपममृजुभावं संश्रयेद्बुद्धबुद्धिः ॥ ४९४ ॥

---

**No. 42. A Manuscript containing,**

1 **Anushtanavidhi** [अनुष्ठानविधिः],

2 **Paristhapanikavidhi** [पारिस्थापनिकाविधिः],

3 **Pratishthakalpa,** by Chandrasuri [प्रतिष्ठाकल्पः—चन्द्रसूरिः],

4 **Pravrajyavidhi,** by Paramanandasuri [प्रव्रज्याविधानम्—परमानन्दसूरिः],

5 **Puja—and other Ashtakas, by** Lakshmachandra, pupil of Padmadevasuri [पूजाष्टकम्—पद्मदेवसूरिशिष्यो लक्ष्मचन्द्रः].

Leaves 1 to 172; 12 inches long, 2 inches broad.

Anushtanavidhi begins :

नमिऊण तिलोयगुरुं लोयालोयप्पयासयं वीरं ।
विब्भमविणासहेतुं णुट्ठाणविहिं पवक्खामि ॥ १ ॥

Anushthanavidhi ends :

आणुपुव्वीए इच्चे सो सुहबोहा ॥ सामायारी संमत्ता ॥

Paristhapanikavidhi begins :

इंदियाणं अच्चित्तसंजएरिद्धवणविहीभत्तइ ।

Paristhapanikavidhi ends :

कोउसग्गो अविहिविगिंवणत्थं कीरइ ।
इति पारिस्थापनिकविधिः ॥

Pratishthakalpa begins:

अथातः संप्रवक्ष्यामि प्रतिष्ठालक्षणं स्फुटम् ।
जिनशासनानुसारेण नत्वा वीरं जिनोत्तमम् ॥ १ ॥

Pratishthakalpa ends:

सिरिशीलभद्दसूरिधणेसरसूरिसिस्सासिरिचंदसूरिसमुद्धरिया सूहबोहसमायारी समत्ता ॥

इति बहुविधप्रातिष्ठाकल्पान्सवीक्ष्य समुद्धृतोयं श्रीचंद्रसूरिणा ॥

**The Ashtakas are as follows—**

| | |
|---|---|
| पूजाष्टकम् | धर्माष्टकद्वयम् |
| बिंबाष्टकम् | पापाष्टकम् |
| गुर्वष्टकम् | दानाष्टकम् |
| उपदेशाष्टकम् | शीलाष्टकम् |
| श्रावकाष्टकम् | तपोष्टकम् |

**No. 43. Commentary on the Dasavaikalikasutra, by TILAKACHARYA [दशवैकालिकटीका—तिलकाचार्यः].**

Leaves 1 to 240; 30 inches long, 2½ inches broad.

Ends:

इति श्रीतिलकाचार्यविरचितायां दशवैकालिकटीकायामुत्तरचूलिकयाष्टीका समाप्ता ॥

तीर्थे श्रीरविभोः सुधर्मगणभृत्संतानलब्धोन्नति-
श्चारित्रोज्ज्वलचंद्रगच्छजलधिप्रोल्लासशीतद्युतिः ।
साहित्यागमतर्कलक्षणमहाविद्यापगासागरः
श्रीचंद्रप्रभसूरिरद्भुतमतिर्वादीभसिंहोऽभवत् ॥ १ ॥
तत्पट्टलक्ष्मीश्रवणावतंसाः श्रीधर्मघोषप्रभवो बभूवुः ।
तत्पादपद्मे कलहंसलीलां दधौ नृपः श्रीजयसिंहदेवः ॥ २ ॥
तत्पट्टोदयशैलशृंगमभजत्तेजस्विचूडामणिः
श्रीचक्रेश्वरसूरिरित्यभिधया कोप्यत्र भानुर्नवः ।
संप्राप्ताभ्युदयः सदैवतमसा नो जातुचिच्छायितः
नैवोच्चंडरुचिः कदाचिदपि न प्राप्तापरागस्ततः ॥ ३ ॥
विललास स्वैरं तत्पट्टप्रासादशालायाम् ।
श्रीमान् शिवप्रभगुरुः संयमकमलाकृतासक्तिः ॥ ४ ॥
श्रीशिवप्रभसूरीणां तेषां शिष्योऽस्मि मंदधीः ।
नाम्ना श्रीतिलकाचार्यः श्रुताराधनगृद्धिभाक् ॥ ५ ॥
एतां सोऽहं विषमदशवैकालिके वृत्तिटीकां
तत्पादाब्जस्मरणमहसा मुग्धधीरप्यकार्षम् ।
यद्यत्किंचिदसमसवशतो ऽत्र्नमस्यामशुद्धं
तत्संशोध्यं मयि कृतकृपैः सूरिभिस्तत्त्वविद्भिः ॥ ६ ॥

टीकां रचयता चैतां यन्मया सुकृतं कृतम् ।

- - -

स्वस्तिश्रीस्तंभतीर्थे तपपक्षे श्रीरत्नाकरसूरिगच्छे वृद्धपौषधशालायां श्रीदशवैकालिकपुस्तकं गृहीतं श्रीसंघस्य ॥

---

**No. 44. The Satapadika or Prasnottarapaddhati,** by Dharmaghosha and Mahendrasuri [शतपदी-अथवा-प्रश्नोत्तरपद्धतिः—धर्मघोषो महेन्द्रसूरिश्च] ·

Leaves 1 to 244. Dated Samvat 1300 = A. D. 1244.

Begins :

नमः श्रीमद्देवगुरुपदपंकजेभ्यः ॥

त्रिभुवनगृहदीपः कल्याणनिधिर्भवोदधौ द्वीपः ।

संशीतितिमिरभानुर्जयति श्रीमान् जिनो वीरः ॥ १ ॥

पूर्वपक्षशतं कश्चित् सूरिश्चक्रे सदर्प्पधीः ।

विदधे श्रीधर्मघोषसूरिरुत्तरविस्तरम् ॥ २ ॥

सिद्धांतवचनैः प्रायः क्वचित्तादक्षयुक्तिभिः ।

अपि प्रकरणैः क्वापि सिद्धांतार्थानुयायिभिः ॥ ३ ॥

ते च पूर्वपक्षा अमी ॥ श्रीजिनप्रतिमा एकादशप्रतिमान्वितेति विचारः ॥१॥ जिनप्रतिमायां वस्त्रांचलविचारः ॥ २ ॥ जिनप्रतिष्ठावि° ३ प्रदीपपूजावि° ४ रजतमयतंदुलाक्षतवि° फलबीजपूजावि° ६ पत्रपूजावि° ७ बलिवि° ८ वंशदंडकवि° ९

Ends :

प्रश्नोत्तरपद्धतिरिति ॥ इयं च विक्रमाद्गुणरसमाससंख्ये १२६३ वर्षे श्रीमदाचार्यरक्षितसूरिशिष्याणां श्रीमज्जयसिंहसूरीणां पट्टालंकृतिक-

तृभिः श्रीधर्मघोषसूरिभिर्विदब्धा ॥ ततश्च तामतिगंभीरार्थत्वात् व्युत्पन्नमतीनामेव सुखावबोधां तदितरेषां तु किंचिदायासगम्यामवगम्य ततस्तेषामेव श्रीधर्मघोषसूरीणां श्रुतांतेवासिभिरपि न तत्पट्टप्रति[illegible]ष्ठितैः श्रीमहेंद्रसूरिभिर्विक्रमादुदधिग्रहसूर्यसंख्ये १२९४ संवत्सरे सैव ग्रंथपद्धतिः क्वचिदाधानं क्वचिदुद्धरणं क्वचित्क्रमविरचनां च विधाय कानिचिदधिकान्यपि प्रश्नोत्तराणि प्राक्षिप्य सुकुमारमतीनामपि सुखावबोधा भवत्वित्येकोनत्रिंशद्धेतुप्रमाणा सती विदधे ॥ भद्रमस्तु चतुर्विधसंघस्य ॥

यावन्नंदति तीर्थं भरतक्षेत्रे जिनस्य वीरस्य ।
तावन्नंदत्वेषापि वाच्यमाना सदा विबुधैः ॥
पंच श्लोकसहस्राणि तथोपरि शतद्वयम् ।
अस्मिन् शतपदीग्रंथे प्रमाणमिदमीरितम् ॥
ग्रंथाग्रं अंकतोपि ५२०० ॥

इति शतपदिकाभिधाना प्रश्नोत्तरग्रंथपद्धतिः समाप्ता ॥ संवत् १३०० वर्षे जेष्ठशुदि ७ रवौ लिखिता ॥

---

No. 45. A Manuscript containing,

1. Dharmopadesamala [धर्मोपदेशमाला],
2. Pindavisuddhi [पिण्डविशुद्धिः],
3. Chausarana [चउसरण],
4. Kayotsarganiryukti [कायोत्सर्गनिर्युक्तिः],
5. Pratikramanasutra [प्रतिक्रमणसूत्रम्],
6. Sthiravali [स्थिरावलिः],
7. Ajitasantistava [अजितशान्तिस्तवः],
8. Chaturangiyabhavana [चउरंगियभावणा],

9. **Miyaputtamaharisichariyam** [मियापुत्तमहरिसिचरिअं].

**Chaturangiyabhavana begins :**

सिरिवीरजिणेसरु नमिरसुरेसुरपायजुगल पणमियविजय ।

चउरंगियभावण सिवसुहकारण अणुदिणु भावसु एरिसिए ॥ १ ॥

**Chaturangiyabhavana ends :**

आराहणाए एरिसय जुत्त नवकारु सरंतउ पाणचत्तु ।

उप्पज्जइ सावगु देवजोइ तइय ह व सत्त भवि मुक्ख होइ ॥ ७३ ॥

तइ चउरंगं जीवमहाराहिए हु वरु कम्मइविणासणिं ।

भवदुहसासणि जायइ नहु पुणु देहु घरु ॥ ७४ ॥

चउरंगभावनासंधिः समाप्ता ॥

**Miyaputtamaharisichariyam begins :**

सिद्धत्थहनंदणु भवदुहखंडणु वद्धमाणु जिणवरु नमिउं ।

वुच्छं मुणिभासिउं गुरुआएसिउं मियापुत्तमहरिसिचरिउं ॥ १ ॥

**Miyaputtamaharisichariyam ends :**

इय एवं निपुणिउ महरिसिपभणिउ जो पालेइ ।

अहहहइ सो पावइ सिवसुहु छिंदिउ भवदुहु अमलकित्ति तसु वित्थरइ

॥ १० ॥ मृगापुत्रसंधिः समाप्तः ॥

---

**No. 46. A Manuscript containing,**

1. **Avasyakaniryukti** [आवश्यकनिर्युक्तिः],
2. **Pindavisuddhiprakarana**, by JINAVALLABHA [पिंडविशुद्धिप्रकरणम्—जिनवल्लभः],
3. **Shadjivanikayadhyayana section of the Dasavaikalikasutra** [दशवैकालिकस्य-षड्जीवनिकायाध्ययनम्],
4. **Pajjantarahanam**, by SOMASURI [पज्जंताराहणं-सोमसूरिः],
5. **Navatatta** [नवतत्ता],

6. **Jivavibhakti,** by Jinachandra [जीवविभत्ती—जिणचंद].

7. **Kavaya,** by Jinachandra [कवयं—जिणचंदसूरि].

Leaves 1 to 83, 84 to 101, 102 to 125, 126 to 136, 137 to 140, 141 to 146, and 147 to 163; 12 inches long, 1½ inches broad. Dated Samvat 1213=A. D. 1157.

Section of Dasavaikaliká Sutra ends:

संवत् १२९३ वर्षे भाद्रवा शुदि १० बुधे पुस्तिकेयं लिखितेति।

श्राविकाचांपलयोग्या लिखिता एषा पुस्तिका।

उदकानलचौरेभ्यो मूषकेभ्यस्तथैव च।

रक्षणीया प्रयत्नेन यस्मात्कष्टेन लिखितेति॥ १॥

शुभं भवतु।

Pajjantarahana begins:

नमिऊणं भणिइ एवं भयवं समउचियं समायरसु।

चत्तो वागरइ गुरु पज्जंताराहणं एवं॥ १॥

Pajjantarahana ends:

सिरि सोमसूरिरइयं पज्जंताराहणं पसमजणणं।

जे अणुसरंति सम्मं लहंति ते सासयं सोक्खं॥ ६९॥

आराधनाकुलकं समाप्तम्॥

Jivavibhakti begins:

नमिऊण चरणजुयलं वीरजिणिंदस्स लोगनाहस्स।

जीवविभत्तीइ वोच्छं मंदमइबोहणट्ठाए॥ १॥

Jivavibhakti ends:

एसा जीवविभत्ती रइयं संखेवए मुणिगणाणं।

गणिना जिणचंदेणं कम्मक्खयामिच्छमाणेणं॥ २९॥

Kavaya begins :

नमिउं जिणवरवीरं धिरिमहेउं खलंतखवगस्स ।

धम्मोवएसरूवं कवयं उस्सग्गियं वुच्छं ॥ १ ॥

Kavaya ends :

इय सगुरुजिणेसरसूरिसीसजिणचंदसूरिणा रइयं ।

कवयं समुव्वहंता न भावरिउणो खलिंति मुणी ॥ १२३ ॥

शुभं भवतु लेखकपाठकयोः ॥

---

**No. 47. A Manuscript containing,**

1. **Kammapayadi** [कम्मपयडी],
2. **Karmavipaka** [कर्मविपाकः ],
3. **Sataka** [शतकम् ],
4. **Saptatika** [सप्ततिका],
5. **Satakabhashyá** [सतकभाष्यम् ],
6. **Karmastavabhashya** [कर्मस्तवभाष्यम् ],
7. **Vastuvicharasaraprakarana** [वस्तुविचारसारप्रकरणम् ],
8. **Dharanoragendrastava** [धरणोरगेंद्रस्तवः ].

**Leaves 1 to 112; 13½ inches long, 2 inches broad.**

Satakabhashya begins :

संखामेत्तपयट्ठा सयगे पगईउ नामगाहेणं ।

गाहाहिं संगहेमो तयत्थजणजाणणट्ठाण ॥ १ ॥

Satakabhashya ends :

अंकेहि सुत्तगाहाणं एक्कवायणकमेण कयमेव ।

मूणमाइगतणंमि कत्थइ सुणेयव्वं ॥ २४ ॥

Karmastavabhashya begins :

अहिणवगहणं बंधो उदउ सविवागवेयणं तस्स ।

अविवागेणणुभवणं अणुदयपत्तस्स उईरणया ॥ १ ॥

Karmastavabhashya ends :

सुहमे दुरुत्तरसयं बायालमिगुत्तरं च पंचासी।

पंचासीव अजोगे पयडीणं संत वोच्छेउं ॥ २१ ॥

---

**No. 48. Commentary on the Sutrakritangasutra, by Silangasuri** [सूगडांगटीका—शीलाङ्कसूरिः].

Leaves 1 to 303 ; 33 inches long, two inches broad. Dated Samvat 1454=A. D. 1398.

समाप्ता चेयं सूत्रकृतद्वितीयांगस्य टीका कृता चेयं शीलाचार्येण वाहरिगणिसहायेन ॥

यदवाप्तमत्र पुण्यं टीकाकरणे मया समाधिभृता।

तेनापेततमस्को भव्यः कल्याणभाग्भवतु ॥

ग्रंथाग्रं १२९१० संवत् १४५४ वर्षे माघशुदि १३ सोमेऽद्येह श्रीस्तंभतीर्थे लिखितमिदं पुस्तकं चिरं नंदतात् ॥ शुभं भवतु ॥

श्रीकायस्थविशालवंशगगनादित्योऽत्रजानाभिधः

संजातः सचिवाग्रणीर्गुरुयशाः श्रीस्तंभतीर्थे पुरे।

तत्सूनुर्लिखनाक्रियैककुशलो भीमाभिधो मंत्रिराट्

तेनाऽयं लिखितो बुधावलिमनःप्रीतिप्रदः पुस्तकः ॥ १ ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया।

यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

शुभं भवतु श्रीसंघस्य लेखकपाठकयोश्च ॥

॥ ८० ॥ नमः श्रीसर्वज्ञाय ॥

प्राग्वाटवंशमुकुटः श्रेष्ठी गंगाभिधः समजनिष्ट।

अधरयति स्म धरायां धनदं यः स्वीयधननिचयैः ॥ १ ॥

एतस्य विशदशीला जज्ञे पत्नी च गउरदेनाम्नी ।
निःसीमरूपसंपल्लक्ष्मीरिव वासुदेवस्य ॥ २ ॥
प्रीमलदेवीसंज्ञा सकर्णजनवर्णनीयगुणकलिता ।
अभवन्तयोस्तनूजा जिनपूजाध्यानतच्चित्ता ॥ ३ ॥
विमलतमशीलसुभगा नूनं या स्वीयशुद्धचरितेन ।
चिरवीतामपि सीतां निरंतरं स्मारयत्येव ॥ ४ ॥
तामुपयेमे सुकृती भूभुव इति विश्रुतो विशदबुद्धिः ।
ठक्कुरकालाभार्यारांभलदेवीप्रसूततनुजन्मा ॥ ५ ॥
श्रीजैनशासननभोभानुश्रीदेवसुंदरगुरूणाम् ।
प्रीमलदेवी साऽथ श्रुत्वा पीयूषदेश्यमुपदेशम् ॥ ६ ॥
मत्वाऽसारतरं धनं घनफलं लिप्सुर्निजश्रद्धया
वेदेषूदधिशीतदीधितिमिते १४९४ संवत्सरे वैक्रमे ।
लक्ष्मीवैश्रवणातिशायिजनते श्रीस्तंभतीर्थाभिधे
दुर्गेऽलीलिखदेतदद्भुततमं श्रीसूत्रकृत्पुस्तकम् ॥ ७ ॥
आचंद्रादित्यमेतद्विरचितचतुरानंदसंपद्विशेषं
संख्यावद्भिर्मुनींद्रैरहमहमिकया वाच्यमानं वितंद्रैः ।
उद्यद्दुःखातिरेकाकुलनिखिलजगज्जीवजीवातुकल्पं
श्रेयः श्रीहेतुभूतं प्रवचनमनघं जैनमेतच्च जीयात् ॥ ८ ॥

---

**49. Santinathacharitra,** by DEVACHANDRA [शान्तिनाथचरित्रम् —देवचन्द्रः].

**Leaves 1 to 313; 30 inches long, 2½ inches broad.**

**Begins:**

॥ ६० ॥ नमः श्रीशांतिनाथाय ॥

सरलंगुलिदलपडलं णहमणिकेसरं णरसुरालिं।
तेलोक्कसिरीणिलयं जिणपहुपयपंकयं णमह॥
दोसासंगाविमुक्कं तमरयरहियं सुचित्तमकलंकं।
पयडियपउरपयत्थं णमामि णाभेयवरसूरं॥ १॥
नमिरसुरासुरनरसिरकिरीडगुरुरयणकिरणकब्बुरियं।
बहुदुरियदारुपरसुं वंदे सिरिवीरकमजुयलं॥
तिलोक्कविहियसंतिं ताबियवरकणयनिघससमकंतिं।
मयमोहविडविदंतिं वंदामि जिणेसरं संतिं॥
दुव्वारमारकरिकरडवियडकुंभयडपाडणपडिट्ठं।
तवखरणहरकरालं णामिमो गुणसूरिखरणहरं॥
कविरायचक्कवट्टिं वंदे सिरिइंदभूइमुणिनाहं।
जस्स ज्झले तेल्लुंपि व वाणी सवत्थ वित्थरइ॥
वंदामि भद्दबाहुं जेण य अइरसियं बहुकहाकलियं।
रइयं सवायलक्खं चरियं वसुदेवरायस्स॥
वंदे सिरिहरिभद्दं सूरिं विउसयणणिग्गय पयावं।
जेण य कहापबंधो समराइच्चो विणिम्मविउ॥
दक्खिन्नइंदसूरिं नमामि वरवण्णभासिया सगुणा।
कुवलयमाल व्व महाकुवलयमाला कहा जस्स॥
पणमामि सिद्धसूरिं महामतिं जेण सव्वजीवाण।
पच्चक्खंपि व रइयं भवस्सरूवं कहाबंधे॥
अण्णेवि एवमाई जयंतु सव्वेवि जे पहाणकइणो।
मग्गहणेणविजाणीं हाइ‐ ‐‐‐‐ ॥
अह्मारि सो णो वलिज्जउ जो पेच्छंतो वि मंगुलं कव्वं।
नियमयपहावेणं चिय न जंपए तग्गयं दोसं॥

पत्थुयपबंधसमए वण्णिज्जइ कहणु दुज्जणो एत्थं।
वण्णिज्जंतो वि न जो दुज्जणपयइं परिच्चयइ ॥

एवं कयप्पणामो उग्घाइयघोरविग्घसंघाउ।
सिरिसंतिणाहचरियं संतिकरं वण्णइस्सामि ॥

पंडिच्चपयडणच्छं ण चेव एयं अहं पवक्खामि।
किंतु जिणणाहसंकहभत्तिए परवसत्तणउ ॥

धम्मोवएसणत्थं च किंचि भव्वाण तहय संघस्स।
संतिनिमित्तं च इमं पारद्धं मंदमइणावि ॥

जह भरहपुच्छिएणं कहियं सिरिउसभसामिणा एयं।
तत्तो कमेण अन्नेहिं वि जहेव ॥

गोयममाईहिं तहा कहियं भव्वाणणुग्गहट्ठाए ॥

तह किंचि अहंपि इमं वोच्छामि सुयाणुसारेण ॥ १८ ॥

**Ends:**

चरियं संतिणाहस्स रम्मं ॥
एकेक्कक्खरगणणाए गंथपमाणं विणिच्छियमिमस्स ॥

बारसउ सहस्साइं सएण एक्केण अहियाइं ॥
अंकतोपि सहस्रं १२१०० ॥
श्रीविजयचंद्रसूरिशिष्यश्रीयशोभद्रसूरिशिष्यश्रीदेवप्रभसूरीणां सत्कं पुस्तकम् ॥
प्राप्तो गोत्राधिपत्वं रसभरविलसन्नंदनारामरम्यः
सर्वस्याशाप्रकाशी सकलसुमनसां सेवनीयः सदैव।
नानाकल्पागमानामुपचयजनको राजसम्मानभावं
प्राप्तः श्रीधर्कटानां प्रकटितगरिमा वंशमेरुः समस्ति ॥ १ ॥

सच्छायः सरसः सपत्रनिचयः शाखाप्रशाखांचितः
पीनस्कंधविराजितः प्रतिपदं संतापहारी सताम् ।
चिंतागोचरवारिसुद्धविसरं दातुं समर्थोऽर्थिनां
तत्राजायत कल्पपादपसमः श्रीजावडः श्रावकः ॥ २ ॥
तस्याभवन्निखिलकल्मषदोषहीना-
स्तिस्रः प्रियास्त्रिपथगा इव पूरिताशाः ।
लोकत्रयप्रथितशीलयुतास्तथापि
प्राप्ताः कदाचन न दीनपथातिथित्वम् ॥ ३ ॥
जिनदेवी बभूवासामाद्या मधुरवादिनी ।
त्रैणोचितगुणोपेता जिनेंद्रपदपूजिका ॥ ४ ॥
राकासुधारश्मिसमानशीला शुद्धाशयानंदितदीनलोका ।
रूपश्रिया तर्जितकामकांता कांता द्वितीयाजनि सर्वदेवी ॥ ५ ॥
कुंदावदातद्युतिशीलशालिनी मातेव सर्वस्य जनस्य वत्सला ।
पूर्णी तथापूर्णमनोरथस्थितिर्जाता तृतीया गृहिणी विवेकिनी ॥ ६ ॥
या सर्वदा सर्वजनोपकारी गंभीरधीरो जिनधर्मकारी ।
तं दुर्लभं दुर्लभमल्पपुण्यैः प्रासूत तत्र प्रथमा तनूजम् ॥ ७ ॥
संजातौ भुवि विख्यातौ सर्वदेव्याः सुतावुभौ ।
उदयाचलचूलायाः सूर्याचंद्रमसाविव ॥ ८ ॥
आद्यस्तयोः सज्जनचित्तहारी नयी विनीतः सकलोपकारी ।
जिनेंद्रपूजाविहितानुरागः साधुप्रियोऽजायत देवनागः ॥ ९ ॥
द्वितीयश्च गुणावासः सत्यशौचसमन्वितः ।
कलावानुज्ज्वलो जातः कुलकैरवचंद्रमाः ॥ १० ॥
सूरेः श्रीजिनवल्लभस्य गणिनः पादप्रसादेन त-
ल्लब्धं येन विवेकयानमसमं दुःप्रापमल्पाशयैः ।

येनाद्यापि सुखं सुखेन कृतिनः संसारवारांनिधेः
पारं यांति परं निरस्तसकलक्लेशावकाशोदयाः ॥ ११ ॥
शिरसि नमनं यः साधूनां दृशोरतिशांततां
वदनकमले सत्या वाणी श्रुतौ श्रवणं श्रुतेः ।
मनसि विमलं बोधं पाणौ धनस्य विसर्जनं
जिनगृहगतिः पादांभोजे चकार विभूषणम् ॥ १२ ॥
प्रालेयशैलशिखरोज्ज्वलकांतिकांतश्रीनेमिनाथभुवनच्छलतश्च येन ।
मूर्त्तिः स्वधर्म इव सर्वजनीयदातुराविष्कृतः सकललोकहितावहेन ॥ १३ ॥
चारित्राचरणैकधीरमनसो गीतार्थचूडामणेः
विद्यानां मणिदर्पणस्य शमिनः सेव्यस्य पुण्यार्थिभिः ।
यश्च श्रीमुनिचंद्रसूरिसुगुरोः पादांबुजं सेवितुं
वाञ्छन्मत्सरवार्जितः सुरवधूप्राणेश्वरत्वं गतः ॥ १४ ॥
निःसीमधर्म्मनिलयं कलितं सदर्थैः
सद्वृत्ततावि‍रहितं न कदाचनापि ।
ख्यातं जगत्त्रयमिवापदनंतसत्वं
पूर्णांसुतत्रयमतीव गभीरमध्यम् ॥ १५ ॥
लक्ष्मीविलासकलितो बलिदर्प्पहंता
सत्यानुरागिहृदयो विधिपक्षपाती ।
लक्ष्मीधरः सुतवरोजनि तत्र मुख्य-
श्चित्रं तथापि न जनार्दनतामुपेतः ॥ १६ ॥
आराधितश्रीजिननेमिनाथः संपादितानंतखलप्रमाथः ।
आसीद् द्वितीयो धनदेवसंज्ञः सदा सदाचारविचारविज्ञः ॥ १७ ॥
यस्यासमानफलकांतगुणाभिरामं संरुद्धरंध्रमविलाभिजलप्रवेशम् ।
सद्धीवरैरनुगतं मतियानपात्रं गंभीरकार्यजलधेः परमाप्नोति ॥ १८ ॥

विवेकजनवल्लभः स्फटिकशैलशुद्धाशयः
कलंकविकलः सदा सकललोकसंतोषदः ।
बभूव जिनपूजकः सुगुरुवंदकः श्रावक-
स्तृतीय इह नंदनः सुजननंदनः श्रीधरः ॥ १९ ॥
तत्रोज्झिलस्य समजायत धर्म्मपत्नी
मंदाकिनीसलिलनिर्मलशीलयुक्ता ।
लक्ष्मीः समस्तजनवाञ्छितदानदक्षा
चित्रं न निर्गुणरता न चलस्वभावा ॥ २० ॥
उल्लासकाः सुमनसां विदितानुभाव-
संपादकाः समयिनां बहुलं फलानाम् ।
नित्यं निजक्रमयुता भुवनप्रसिद्धाः
पुत्रास्त्रयो ऋतुसमाः षडिहोपजाताः ॥ २१ ॥
कारुण्यरत्नांकुरमेरुशैलः सौजन्यपीयूषरसांबुराशिः ।
आद्यः सुतोजायत वर्द्धमानस्तेषां कलाभिः परिवर्द्धमानः ॥ २२ ॥
अपारगांभीर्यनिवासभूमिर्विद्वत्सु श्राद्धादिजनोपकारी ।
अनल्पलावण्ययुतो द्वितीयः पुत्रः पवित्रोऽजनि मूलदेवः ॥ २३ ॥
कीर्त्तेः पात्रं निजगुरुगिरां पालने लब्धलक्षः
स्थानं नीतेर्जनकनयनानंददायी सदैव ।
दूरीभूताखिलख--लो जातवान्पुत्ररत्नं
तार्त्तीयीकः कुशलवसुतावल्लभो रामदेवः ॥ २४ ॥
बभूव कारुण्यपरिग्रहाय कृताग्रहः कुग्रहदर्प्पहंता ।
विपत्तिसंपत्तिसमानुरागी यशोधरो धार्म्मिकधाम तुर्यः ॥ २५ ॥
जिनेंद्रपूजारचनानुबंधबद्धोद्यमो निर्मलकीर्त्तिशेषः ।
भक्त्या समासेवितसर्व्वदेवस्ततोऽनुजोजायत सर्व्वदेवः ॥ २६ ॥

मुक्ताफलारंभरतिर्न दीनो विश्रामभूमिः पुरुषोत्तमानाम् ।
पयोधिवन्नित्यगभीरभावः षष्ठस्तनूजोऽजनि चापदेवः ॥ २७ ॥
तत्रासीद्रामदेवस्य वल्लभा शीलशालिनी ।
आसदेवीति विख्याता सुरूपा रूपिकापरा ॥ २८ ॥
यशोधरस्य जाया च थेहिका हितकारिणी ।
शोभना सर्वदेवस्य चापदेवस्य शांतिका ॥ २९ ॥
अस्ति स्म थेहड इति प्रथिताभिधानः
कुंदावदातहृदयः सदयः सदैव ।
धीरो यशोधरसुतः कलितः कलाभि-
र्नित्यप्रशस्तचरितः प्रणतो गुरूणाम् ॥ ३० ॥
आनंदकः सुमनसां सततं सुधर्म्म-
बद्धादरः कृतविमानमनःप्रवृत्तिः ।
आस्ते महेंद्र इव वल्लभचित्रलेखः
श्रीरामदेवतनयो विनयी महेंद्रः ॥ ३१ ॥
हरिचंद्राभिधानश्च द्वितीयोभूत्तनूद्भवः ।
वल्लभः सर्वलोकानां प्रतिपच्चंद्रमा इव ॥ ३२ ॥
विनयी नयसंवासो चापदेवस्य नंदनः ।
गोसलाख्यः सुशीलोभूद्गुणरत्नमहानिधिः ॥ ३३ ॥
आसीदाद्या महेंद्रस्य महाश्रीरूपसप्रिया ।
राज्यश्रीः शीलकारुण्यदानौचित्यादिशालिनी ॥ ३४ ॥
राज्यश्रियस्त्रयः पुत्रा वीसलोथ यशोभटः ।
वोचित्थश्चेति संजाता गुणरत्नौघरोहणाः ॥ ३५ ॥
राज्यश्रीरन्यदा तत्र शुद्धश्रद्धानबंधुरा ।
इत्येवं चिंतयामास निस्समानगुणोज्ज्वला ॥ ३६ ॥

प्राणा वायुमयाः स्वभावतरला लक्ष्मीः कटाक्षास्थिरा
स्वाम्यं बालविलंबितातनुशिलावस्थानदुःस्थं सदा।
वातांदोलितदीपकुङ्मलदलप्रायः प्रियैः संगम-
स्तन्नास्तीह किमप्युदारमनसामाशानिवेशास्पदम्॥ ३७॥
तल्लब्ध्वा मनुजेषु जन्म विमलं संप्राप्य देशादिकं
श्रुत्वा श्रीजिनचंद्रवाचमुचितां श्रीमद्गुरूणां पुरः।
स्वाधीने च धने च संगतवति स्वीये कुटुंबे सतां
युक्तो धर्म्मविधान एव सततं कर्तुं महानुद्यमः॥ ३८॥
सम्यग्ज्ञानपुरःसरश्च महतां धर्म्मादरः संमतः
प्रायस्तच्च जिनागमादविकलं संजायते धीमताम्।
सर्वं लोकमवेक्ष्य शांतविशदप्रज्ञाप्रकर्षोद्यमं
काले सोपि कलौ न्यवेशि मुनिभिः संघोत्तमैः पुस्तके॥ ३९॥
चारित्रभारचरणासहमानसेन
पंचप्रकारविषयामिषलालसेन।
पात्रादिदानमयधर्म्मवता तदेयं
लेख्यं परिग्रहवता गृहिणा तदेव॥ ४०॥
एवं विचिंत्य सुचिरं श्रेयोर्थं स्वस्य सांबराज्यश्रीः।
श्रीशांतिनाथचरितस्य पुस्तकं लेखयामास॥ ४१॥
विरचितविचित्ररेखं सुवर्णपत्रावलीकलितशोभम्।
यद्भाति करे विदुषां कंकणमिव कीलिकारम्यम्॥ ४२॥
राकाशीतांशुशुभ्रः स्फुरदमलदृशः सर्ववस्तुप्रकाशी
सम्यग्ज्ञानप्रदीपस्त्रिभुवनभवनाभ्यंतरे भासमानः।
यावन्मोहांधकारं शमयति सकलं पूरिताशेषदोषं
तावन्नंद्यान्मुनींद्रैरयमिह सततं पुस्तकः पठ्यमानः॥ ४३॥

**No. 50. A Manuscript Containing,**

1. **Upadesamala,** by Dharmadasagani [उपदेशमाला—धर्मदासगणिः],

2. **Dharmopadesamala,** by Jayasinhasuri [धर्मोपदेशमाला—जयसिंहसूरिः],

3. **Siddhantasara,** by Pradyumnasuri [सिद्धांतसारः —प्रद्युम्नसूरिः].

Leaves 1 to 128 ; 11¼ inches long, 1¼ inches broad.

Dharmopadesmala begins:

सिज्झउ मज्झ वि सुयदेवि तुज्झ भरणाउ सुंदरा ज्झत्ति ।
धम्मोवएसमाला विमलगुणा जयपडाइव्व ॥ १ ॥

Dharmopadesamala ends:

इय जय पायडकन्हमुणिसीसजयसिंहसूरिणा रइया ।
धम्मोवएसमाला कम्मक्खयमिच्छमाणेण ॥ १०२ ॥
धम्मोपदेशमालाप्रकरणं समाप्तम् ॥

Siddhantasara begins:

वंदामि सव्वनुजिणिंदवाणी पसन्नगंभीर पसत्थसत्था ।
जुत्ता जया जं अभिनंदयंता नंदंति सत्तापहतं कुणंता ॥ १ ॥

जिणबिंबाणंति पढमं ठ्ठाणं
जिणचेईहराणं वीयं ठ्ठाणं
जिणसासनपोत्थयाणं तइयं ठ्ठाणं
साहूणंति चउत्थं ठ्ठाणं
संजईणं पंचमं ठ्ठाणं
सावयाणं छठ्ठं ठ्ठाणं
सावियाणं सत्तमं ठ्ठाणं सम्मत्तं

Siddhantasara ends:

सिद्धंतसाराणामिणं महत्थं सुद्धाण भव्वाणमणुग्गहत्थं ।
महामईणं च महत्थसत्थं पज्जुन्नसूरी वयणं पसत्थं ॥ २२ ॥
मूलशुध्दि नाम अट्ठमं ठ्ठाणं समत्तं ॥ श्लो. २६९ ॥

**No. 51. Rishabhadevacharita,** by VARDHAMANASURI [रिसहदेव चरियं-वद्धमाणसूरी].

Dated Samvat 1289 = A. D. 1233.

Begins:

नमः सर्वज्ञाय ॥

नमह जुगइजिणिंदं पुरिसोत्तनाहिसंभवं पयडं ।
वरनाणदंसणरविं सुगयमणंतं महादेवं ॥ १ ॥

एगमणेगसरूवं दुलुक्खं परमजोगिपच्चक्खं ।
अव्वयमसंखमक्खयमीसप्पिणिपढमतित्थयरं ॥ २ ॥

Ends:

विक्कमनिवकालाउ सएसु एक्कारसेसु सट्ठेसु ।
सिरिजयसिंहनरिंदे रज्जं परिपालयंतम्मि ॥

खंभाइत्थट्ठिएहिं सियपक्खे चित्तविजयदसमीए ।
पुस्सेणं सुरगुरुणो समत्थियं चरियामियंति ॥

लोगुत्तमचरियमिणं काऊण जमज्जियं सुहं किंपि ।
उत्तमगुणाणुराउ भवे भवे तेण मह होज्ज ॥
पुव्वावरेणं गणियस्स सव्वसंखा इमस्स गंथस्स ।
एक्कारसउ सहस्सा सलोगसंखाइ नायव्वा ॥
श्रीवर्द्धमानाचार्यविरचिते श्रीऋषभदेवचरिते पंचमोऽवसरः समाप्तः ।

संवत् १२८९ वर्षे माघवदि ६ भौमावद्येह श्रीप्रल्हादनपुरे समस्त राजावलीसमलंकृतमहाराजाधिराजश्रीसोमसिंहदेवकल्याणविजयराज्ये श्री-ऋषभदेवचरित्रं पंडि० धनचंद्रेण लिखितमिति ॥ मंगलं महाश्रीरिति भद्रम् ॥

हृद्यप्रोद्यदखर्वपर्वसुभगः सच्छायया ऽलंकृतः
सद्वृत्तोज्ज्वलमर्त्यमौक्तिकमणिर्भूभृत्प्रतिष्ठोन्नतः ।
प्रेंखत्पत्रपरिष्कृतः परिलसच्छाखावृतो गुर्जरः
श्रीमालाभिध इत्युदारचरितः ख्यातोऽस्ति वंशः क्षितौ ॥ १ ॥

वंशे तत्र बभूव मौक्तिकसमः सद्वृत्तशैत्याश्रितः
ख्यातो लल्लुकभांडशालिक इति स्वच्छस्वभावान्वितः ।
चित्रं छिद्रसमुज्झितोऽपि नितरां भूत्वा गुणानां पदं
विश्वप्राणिहृदि व्यधत्त वसतिं यच्छद्मवंध्याशयः ॥ २ ॥

तस्याभूल्लुलना नाम्ना लल्लिकाभांडशालिनी ।
शीलमुक्तावली कंठे यया दध्रे समुज्ज्वला ॥ ३ ॥

संततस्तयोस्त्रयः पुत्राः पवित्राश्चरितैः शुभैः ।
अजायंतागारभारोद्धारधुर्यत्वविश्रुताः ॥ ४ ॥

तेषां जविष्ठोऽजनि भांडशाली ख्यातो गुणैर्लोल्लकनामधेयः ।
श्रीमज्जिनाज्ञाकरणप्रतिज्ञाविभूषणं वक्षसि यस्य यज्ञे ॥ ५ ॥

शुद्धात्माजनि भांडशालिकयशश्चंद्राभिधानोऽपरः
श्रीमद्देवगुरुप्रयोजनविधौ बद्धादरोऽनारतं ।
येनौदार्यगुणैरनर्गलतरैरावर्य विश्राणिता
पात्रेषु स्थिरताप्रवर्त्तनकृते लक्ष्मीर्मनःस्वीच्छया ॥ ६ ॥

ततोऽभवद्देवकुमारनामा सुतो गुणैर्देवकुमारमूर्त्तिः ।
प्रवर्त्तयन्निःकपटं जिनानां वर्यां सपर्यामवदातचित्तः ॥ ७ ॥

लोल्लकस्याभवद्भांडशालिनो भांडशालिनी ।
लक्ष्मीरित्यभिधानेन जिनपूजापरायणा ॥ ८ ॥

भांडशालिनो द्वौ पुत्रौ लोलाकस्य बभूवतुः ।
धंधूकाभिधः प्रथमः श्रीमदाद्यजिनार्चकः ॥ ९ ॥

वाहिनी गेहिनी तस्य बभूव प्रियवादिनी ।
यशोवीरस्तयोः पुत्रः सुशीला सिंधुका सुता ॥ १० ॥

धर्मोच्छ्रंखलभांडशालिकयशश्चंद्रस्य दानप्रिया
नित्यौचित्यविनीतताजवगुणालंकारशृंगारिता ।
वर्यौदार्यगुणैर्विवेकविशदैर्दूरं यया रंजिता
आत्मन्यप्रतिमप्रमोदपरतां नीताः समस्ता जनाः ॥ ११ ॥

सा जज्ञे गेहिनी नाम्ना जिंदिकाभांडशालिनी ।
सुकृतोपार्जिका श्रीमद्देवसद्गुरुपूजया ॥ १२ ॥

यशश्चंद्रस्य जज्ञाते द्वेऽपत्ये भांडशालिनः ।
स्वगृहश्रियः सीमंतमौक्तिकतिलकोपमे ॥ १३ ॥

आद्या पुत्री समजनि वरा राजिका नामधेया
मंदाकिन्युल्लसितलहरीशीलसंभूषितांगी ।
यस्या अंतःकरणमृदुतासंगतं जंतुजातं
लक्ष्मीः साक्षादिव निजगृहे जंगमा यावतीर्णा ॥ १४ ॥

ठक्कुरशोभनदेवस्तामथो परिणीतवान् ।
संतोषभूषिता जाता संतोषाख्या तयोः सुता ॥ १५ ॥

श्रीसर्वज्ञपदांबुजार्चनरतिः संप्राप्तपुण्योन्नतिः
किंचिन्मीलितमालतीदलभरस्वच्छेतिशीले मतिः ।
भक्त्यावेशसमुल्लसद्गुरुनतिर्विस्तीर्णदानास्थिति-
र्निच्छद्मैकतपोविधानवसतिर्यस्या गुणैः संगतिः ॥

दाक्षिण्योदधिभांडशालिकयशश्चंद्रस्य पुत्रोपरो
धर्मोद्दामनराग्रणीरिह यशःपालाभिधः शुद्धधीः ।

षण्यस्यापि न केवलैव महती भांडस्य शाला कृता
श्रीआद्यं वरिवस्यतां जिनपतिं येनात्र धर्मस्य च ॥ १६ ॥

भांडशालियशःपालस्याभवज्जयदेविका ।
औदार्यशीलप्रमुखैः प्रेयसी श्रेयसी गुणैः ॥ १७ ॥

अभवंस्तयोस्तनूजाः सच्चरित्रा स्त्रयो गुणैः ।
आनंददायिनः पित्रोरन्योन्यं प्रीतिशालिनः ॥ १८ ॥

आद्यः सुतः संश्रितधर्मकर्म्मा विवेकवेश्माजनि पार्श्वदेवः ।
अभ्यर्थन - - - - - भो(ह)ः प्रकल्पितश्रीजिननाथसेवः ॥ १९ ॥

अन्यो बभूवांबडनामधेयः कस्याप्यसंपादितचित्तपीडः ।
स्वकीयसंतानधराधुरीणः स्ववेश्मलक्ष्मीहृदयैकहारः ॥ २० ॥

सर्वौचित्याचरणानिपुणः प्रीतिपूर्वाभिलापा

- - - - - - - - - - - - - - - - - - -

- - - - - - - - - - - - - - - - - - -

तार्तीयीकस्तदनु तनुजः पल्हणाख्यो बभूव ॥ २१ ॥

पार्श्वदेवस्य संजज्ञे पद्मश्रीनामिका प्रिया ।
यस्याः पतिव्रतात्वेन स्वकुलं निर्मलीकृतम् ॥ २२ ॥

अथांबडस्योचितकृत्यदक्षा मंदोदरी नाम बभूव पत्नी ।
स्फुरद्विवेकोज्ज्वलसारहारा स्वमंदिरे मूर्त्तिमतीव लक्ष्मीः ॥ २३ ॥

हरेरिव भुजादंडाश्चत्वारस्तनयास्तयोः ।
अजायंत सदाचारगृहभारधुरंधराः ॥ २४ ॥

प्रथमोजनिष्ट तेषां पार्श्वकुमाराभिधो गुणैः प्रथमः ।
विनयद्रुमालवालः पित्राज्ञापालनप्रवणः ॥ २५ ॥

बभूव प्रेयसी तस्य पृथ्वीदेवीति नामतः ।
विनीतविनया नित्यमौचित्यप्रियकारिणी ॥ २६ ॥
तदनु तनयो द्वितीयः समजनि धनसिंहनामको विनयी ।
निर्म्मलकलाकलापप्रैणक्रीडाद्रिरभिरामः ॥ २७ ॥
नाम्ना धांधलदेवीति संजज्ञे तस्य गेहिनी ।
पुण्यार्जवार्जितश्लाघा श्लाघ्यकर्म्माभिसंज्ञिका ॥ २८ ॥
ततस्तृतीयोजनि रत्नसिंहः संतापकारिव्यसनेभसिंहः ।
दूरं परित्यक्तविरुद्धसंगः श्रीमज्जिनेन्द्रक्रमपद्मभृंगः ॥ २९ ॥
तस्याजनिष्ट दयिता नाम्ना राजलदेविका ।
मेथुकाख्या तयोः पुत्री समस्तानंददायिनी ॥ ३० ॥
अनन्यसौजन्यजनानुकीर्णो विवेकलीलोज्ज्वलचित्तवृत्तिः ।
सार्वत्रिकौचित्यविधिप्रवीणो जज्ञे जगत्सिंहसुतश्चतुर्थः ॥ ३१ ॥
पत्नी जाल्हणदेवीति नाम्ना तस्य समजनि ।
कुत्राप्यनुत्सेकवती प्रदानविनयान्विता ॥ ३२ ॥
सोल्हकाख्या ततः पुत्री बभूव प्रियवादिनी ।
यस्याः शीलजलैः शुद्धैः पुण्यवल्ली प्रवर्द्धिता ॥ ३३ ॥
पत्नी ततोजायत पल्हणस्य माणिक्यमालास्फुरदंशुशीला ।
जिनोपदेशश्रुतिकर्णसारा कृपाप्रपा माणिकिनामधेया ॥ ३४ ॥
समजनि तयोस्तनूजो वरणिगनामा समस्तगुणपात्रम् ।
निखिलसुकुलैकधुराधुरंधरः स्मितमधुरभाषी ॥ ३५ ॥
बभूव प्रेयसी तस्य धनदेवीति विश्रुता ।
दाक्षिण्योज्ज्वलशीलेन सर्वेषां मोददायिनी ॥ ३६ ॥

अजायंत ततस्तिस्रः शीलालंकरणाः सुताः ।
कर्पूरदेवीभोपलदेव्यौ वील्हणदेव्यपि ॥ ३७ ॥

अभूद्देवकुमारस्य प्रेयसी छडिकाभिधा ।
पतिव्रता समाचारचातुर्यार्जितसद्यशाः ॥ ३८ ॥

कुमारपालसुतोभूत् पितुराज्ञोद्यतस्तयोः ।
जिनशासनानुरागी विरागी दोषवस्तुषु ॥ ३९ ॥

विवेकरविरन्येद्युः स्फुराति स्मातिनिर्म्मलः ।
संतोषाय मानसद्रोर्विद्रावितनमस्ततिः ॥ ४० ॥

घातत्रस्ततुरंगमांगतरलाः संपत्तयोत्यूर्जिता
लुम्पल्लुब्धकबिम्यदर्भकमृगीदृग्चंचलं यौवनम् ।
वं-प्रेमताडिल्लताद्युतिचलं चैतत्तथा जीवितं
मत्वैवं जिनधर्मकर्म्मणि मतिः कार्या नरैः शाश्वते ॥ ४१ ॥

सोनंतसुखनिदानो धर्म्मोपि ज्ञायते श्रुतात् ।
श्रुतं च पुस्तकाधीनं तत्कार्यः पुस्तकोद्यमः ॥ ४२ ॥

पुस्तकं लेखयामास स्वसुः श्रेयोर्थमांबडः ।
संतोषनाम्न्याः स्नेहेन पल्हणभ्रातृसंयुतः ॥ ४३ ॥

प्रोद्यन् यावदसौ बिभर्त्ति तपनः प्राचीपुरंध्रीमुखे
कांतिव्यक्तदिशं सुवर्णतिलकश्रीसंनिभं विभ्रमम् ।
श्रीनाभेयजिनस्य चारु चरितं तावत्कथाश्चर्यकृ-
न्नंद्यादत्र विचार्यमाणमनघप्रज्ञैः सदा सौविदैः ॥ ४४ ॥

---

**No. 52. Dharmopadesamalavritti,** by VIJAYASINHASURI [धर्म्मोपदेशमालावृत्तिः—विजयसिंहः].

Leaves 1 to 333; 28 inches long, 2½ inches broad.

**Begins:**

ओं नमो वीतरागाय ॥

नृपत्वतीर्थाधिपतित्वभाजा नयस्य धर्म्यस्य च येन मार्गः ।
प्रकाशितोऽपूर्व्वमिह प्रजानां जिनेंद्रमाद्यं तमहं नमामि ॥ १ ॥
तं वर्द्धमानं जिनमानमामि प्रवर्त्तितं येन सुतीर्थमेतत् ।
यत्रावतीर्ण्णाः कतिनोऽधुनापि प्रयांति पारं भवसागरस्य ॥ २ ॥
मोहांधकारच्छिदुरा दुरात्मलोकैरलभ्याः प्रविलोकितुं ये ।
शेषाः समुत्तीर्णभवार्णवास्ते द्वाविंशतिस्तीर्थकरा जयंति ॥ ३ ॥
यस्याः प्रसादमासाद्य सद्यः पारं श्रुतोदधेः ।
सुधियो यांति सा मेस्तु वरदा श्रुतदेवता ॥ ४ ॥
तेषां गुरूणां पदपंकजानि प्रणौमि भक्तिप्रणतोत्तमांगः ।
येषां प्रसादेन परोपदेशप्रदानदक्षत्वम — — — — ॥ ५ ॥
इत्थमेषु समस्तेषु स्तोतव्येषु कृतस्तुतिः ।
धर्म्मोपदेशमालाया विस्तीर्णा वृत्तिमारभे ॥ ६ ॥

**Ends:**

सव्वो सावगलोउ कररहिउ राइणा तहिं विहिउ ।
मंतिवयणेण एवं भावणं कुणइ संघस्स ॥ २५१ ॥
जिणसासणस्स एवं पभावणं करि वि भावसंजुत्ता ।
नियपुत्ताण य भारं रज्जस्स समप्पिउं दोवि ॥ २५२ ॥
आणंदसूरि — — से समणत्तं उत्तमं करेऊण ।
उत्तमनाणं पाविय संपत्ता उत्तमं ठाणं ॥ २५३ ॥

इति आमलकद्विजाख्यानकं समाप्तम् ॥
धम्मोवएसमालाविवरणमेयं सवित्थरं रइउ ।
पुण्णं जमज्जियं इह लहंतु भव्वा सिवं तेण ॥ २९४ ॥
इक्कारसइगनउए माहे मासंमि किण्हपक्खंमि ।
तेइयाए हत्थरिक्खे समत्तं विवरणं एयं ॥ २९९ ॥
मंगलं महाश्रीः ॥
पृथ्वीभृता न मथितान्न जडस्वरूपाद्दैत्यामरानपहृतामृतवामरत्नात् ।
श्रीप्रश्नवाहनकुलाज्जलराशिकल्पात्कल्पद्रुमोपमगुणः पृथुरस्ति गच्छः ॥ १ ॥
यः श्रीहर्षपुरीय इत्यभिधया ख्यातः क्षमामंडले
निःशेषास्वपि दिक्षु विस्तृतमहाशाखोपशाखाशतः ।
संसेव्यः सुमनोभिरीप्सितफलप्राप्तेः परं कारणं
छायासीनसमस्तजंतुजनितांतस्तापशांतिक्रियः ॥ २ ॥
तत्र श्रीजयसिंहसूरिरभवन्निःशेषविश्वंभरा-
भोगालंकरणक्षमैः क्षणशरच्चंद्रांशुगौरैर्गुणैः ।
उन्मीलन्नवकुंदगुच्छविशदस्वच्छस्वकीयव्रत-
व्यापारार्पितचित्तवृत्तिरसकृद्दत्तप्रमोदः सताम् ॥ ३ ॥
एतस्मादपि शिष्यरत्नमनघं तत्किंचिदुच्चैस्तरा-
मुत्पन्नं परमप्रमोदजनकं निःशेषविद्वत्ततेः ।
यस्यात्यद्भुतभूरिनिर्म्मलगुणस्तोमस्तुतौ जिह्मतां
ब्रह्मापि व्रजति क्षणेन गुणिनः कान्यस्य वार्त्ता पुनः ॥ ४ ॥
रूपं विनिर्जितमनोभवमूर्त्तिशोभं वाणी तु चंदनरसादपि दत्तशैत्या ।
अर्कोपलादपि मनो विमलस्वरूपं यस्य प्रशस्यपदवीं किमु न प्रपेदे ॥ ५ ॥
अत्यद्भुतानि जिनपुंगवशासनस्य श्लाघाकराणि चरितानि घनानि यस्य ।
श्रुत्वा स्वचेतसि चिरं परिभावयंतः संतो जनाः परमविस्मयमुद्वहंति ॥ ६ ॥

यः कश्चिदप्यादरविप्रमुक्तः सुप्तः क्वचिद्धर्म्ममयक्रियायाम् ।
राज्ञापि तेन त्वरितं यदाज्ञा शेषेव शीर्षे निहिता सहर्षम् ॥ ७ ॥
यस्योपदेशादखिलस्वदेशे सिद्धाधिपः श्रीजयसिंहदेवः ।
एकादशीमुख्यदिनेष्वमारीमकारयच्छासनदानपूर्वाम् ॥ ८ ॥
यस्य संदेशकेनापि पृथ्वीराजेन भूभुजा ।
रणस्तंभपुरे न्यस्तः स्वर्णकुंभो जिनालये ॥ ९ ॥
दाने तपसि पूजायां कल्याणकमहोत्सवे ।
येन प्रवर्त्तितो लोकः प्रायेणाष्टाह्निकासु च ॥ १० ॥
प्रमादरूपस्फुरदंधकारप्रच्छादिते वर्त्मनि संयमस्य ।
उद्यद्विवेकोद्यमदीप्तिजालैरुद्योतमादित्य इवाकरोद्यः ॥ ११ ॥
श्रीवीरदेवविदुषो वरमंत्रविद्यालाभेन यः समभवत्सुमहाप्रभावः ।
तस्य त्वभूदभयदेव इति प्रसिद्धं नामा— – – – –विजनश्रुतीनाम् ॥ १२ ॥
श्रीहेमचंद्र इति सूरिरभूदमुष्य
शिष्यः शिरोमणिरशेषमुनीश्वराणाम् ।
यस्याधुनापि चरितानि शरच्छशांक–
छायोज्ज्वलानि विलसंति दिशां मुखेषु ॥ १३ ॥
एकैकं जिनशासनोन्नतिकरं कार्यं किमप्यद्भुतं
तत्संसाधितवानसाध्यमपि यः सद्बुद्धिपाथोनिधिः ।
यद्वक्तुं वचसास्तु दूरतरतः शक्यं न चेतस्यपि
ध्यातुं केनचिदेव देवगुरुणाप्यन्यस्य वार्त्तैव का ॥ १४ ॥
सकलनिजधरित्रीमध्यमध्यासितानां
जिनपतिभवनानां तुंगशृंगावलीषु ।
अनघयदुपदेशात्सिद्धराजेन राज्ञा
स्फुरदविरलभासः स्थापिताः स्वर्णकुंभाः ॥ १५ ॥

साधुश्राद्धजनस्य दुर्ज्जनजनात्संजायमाना परा-
भूतिर्भूपतिवल्लभादपि मदेनांधाद्रणाद्विस्म— ।
शक्त्या येन निवारिता जिनगृहादानेषु — — — —
न्नुद्धारा जिनसद्मनां च जरतां जाता — — —न्नया ॥ १६ ॥

आरुह्य बुद्धिमघमक्षतयानपात्रमप्युद्यमप्रबलमारुतबद्धवेगम् ।
यः संगमं सितपटस्य गुरोरवाप्य जैनागमार्णवलटं झटिति प्रयातः ॥ १७ ॥

येनोपदेशमाला चक्रे भवभावना च वृत्तियुता ।
अनुयोगद्वाराणां शतकस्य च विराचेता वृत्तिः ॥ १८ ॥

मूलावश्यकटिप्यनकं विशेषावश्यकीयवृत्त्याढ्यम् ।
येन ग्रथितग्रंथस्य लक्षमेकं मनाग्तनम् ॥ १९ ॥

तस्मादभूद्विजयसिंह इति प्रसिद्धः सूरिः सुधांशुकरगौरयशःसमूहः ।
बाल्यात्प्रभृत्यपि विवेककलानिशातं चेतः सदैव समजायत यस्य शांतम् ॥२०॥
धर्म्मोपदेशमालाविवरणमासीच्चिरंतनं तनुकम् ।
यत्तत्तेन सविस्तरमारचितं रसिकलोकमुदे ॥ २१ ॥

साहाय्यमत्र चक्रे गणिरभयकुमारसंज्ञितो विज्ञः ।
तस्यैव शोधनविधौ जाता मुनिपुंगवाः सर्व्वे ॥ २२ ॥

ग्रं० श्लोक १४४७१ ॥ मंगलं महाश्रीः ॥
यस्याः क्षीरपयोनिधिर्निवसनं हारस्रजस्तारका-
स्ताडंके शशिभास्करौ सुरधुनी श्रीषंडपुंड्रस्थितिः ।
सा कीर्त्तिर्नरिनर्त्ति यावदमला वीरस्य विश्वत्रयी-
रंगे तावदमंददुंदुभितुलां धत्तामसौ पुस्तकः ॥ १ ॥

**No. 53. Samaradityacharitra, by** Haribhadrasuri [समरादित्यचरित्रम्—हरिभद्रसूरिः].

**Leaves 1 to 354; 32½ inches long, 2½ inches broad.**

**Begins:**

ओँ नमो वीतरागाय ॥

पणमह विजियसुदुज्जयनिज्जियसुरमणुयविसमसरं ।

तिहुयणमंगलनिलयं वसहगइगयं जिणं उसहं ॥

**Ends:**

गुरुवयणपंकयाउ सोऊण कहाणयाणुराएण ।

अनिउणमयिणा वि दढं बालाइअणुग्गहट्ठाए ॥

अविरहियणाणदंसणचरणगुणरयस्स विरइयं एयं ।

जिणदत्तायरिस्स उ अवयवभूएण चरियमिणं ॥

जं विरइऊण पुण्णं महाणुभावचरियं मए पत्तं ।

तेणं गुणाणुराउ होउ इहं भव्वलोयस्स ॥

गंथग्गमिमं एयं छंदेणाणुट्ठुएण गणिऊण ।

पाएण दहसहस्सा हुंति सिलोगाण संठवियं ॥

इति समरादित्यचरितं समाप्तम् ॥

परस्परपरिस्यूतनयगोचरचारिणी ।

अनेकांतामृतं दुग्धे यद्गवी तं जिनं स्तुमः ॥ १ ॥

अप्राप्तोपि हि खंडनां गुणवते धर्माय हिंस्रो न वा

छायाभिः प्रणिहंति तापमभितो मुक्तः सदा पल्लवैः ।

निश्छिद्रोपि करोति यः श्रुतिसुखं वंशः क्षमाभृद्घनो-

ल्लासी कोपि महीतले स जयति श्रीमालनामा नवः ॥ २ ॥

वंशेऽत्र तेजोऽद्भुतवृत्तशाली मुक्तामणिर्वोसरिसंज्ञकोऽभूत् ।

तस्थौ न केषां हृदये गुणेन निजेन यश्छिद्रविनाकृतोपि ॥ ३ ॥

शचीव देवराजस्य रोहिणीव सितद्युतेः ।
सद्वासनेव धर्मस्य लक्ष्मीस्तस्य प्रियाऽभवत् ॥ ४ ॥

अचलस्थितिः कुरंगव्याघाती नरवरवृत्तिसंयुक्तः ।
सिंह इव वैरसिंहः सुतः सुता चानयोर्माद्रूः ॥ ५ ॥

गेहिनी गेहनीतिज्ञा तस्य श्रीरिव देहिनी ।
अभूदानल्देवीति धर्मकर्मसु कर्मठा ॥ ६ ॥

असूत सा पंच सुतान् मनुष्यक्षेत्रस्य धात्रीव सुमेरुपर्वतान् ।
परं सदाप्येकसुखत्वमेषां केषां न रेखाकरमस्ति चित्ते ॥ ७ ॥

आद्योऽस्ति भांडशालिकमदनो लाडिपतिर्जिनप्रतिमाः ।
कारितवान् मंगलपुरचैत्ये पुण्याय पितृमात्रोः ॥ ८ ॥

प्रवरां वेलाकूले पौषधशालां च मातृपुण्याय ।
तनया विनयादिगुणोपेताः पंचास्य विद्यंते ॥ ९ ॥

क्षेमसिंहभीमसिंहौ तेजःसिंहारिसिंहकौ ।
पंचमो जयसिंहस्तु दुहिता जासलाभिधा ॥ १० ॥

प्रथमोपि धर्मकार्ये द्वितीयीकस्तु‒ ‒लघुबंधुः ।
कलिकालमत्तकरिवरसिंहो विजयसिंहोस्ति ॥ ११ ॥

यथा प्रभा प्रभाभर्तुर्यथा चंद्रस्य चंद्रिका ।
यथा छाया शरीरस्य तथाशेषगुणाश्रया ॥ १२ ॥

पूनी दयिताऽस्योदयपालोदयमतसुता विरेजे या ।
निजवंशप्रासादे विमलगुणा वैजयंतीव ॥ १३ ॥ युग्मम् ॥

आद्योस्ति राजसिंहस्तत्तनयो जैत्रसिंह इतरस्तु ।
नायकिसहजलसोहगपद्मलनाम्न्यस्तु पुत्र्य इमाः ॥ १४ ॥

नयनाभ्यां मुखं पुष्पदंताभ्यां गगनं यथा ।
आभ्यां विजयसिंहोपि सुताभ्यां शोभते तथा ॥ १५ ॥
धर्मकर्मसुनिष्णातस्तार्त्तीयीकस्तु धंधलः ।
वल्लभो वकुलदेव्यास्तुर्यो वराणिगाभिधः ॥ १६ ॥
- - - - - - - - - - - - - - जाल्हणस्तु पंचमकः ।
दधतापि येन लघुतां बंधुषु भेजे परं गुरुता ॥ १७ ॥
स्मरः शरैर्मानुषभूमिदेशः सुमेरुशैलैस्तनुरिंद्रियैर्यथा ।
पांडुस्तनूजैरिव वैरसिंहो रेजे तथा पंचभिरेभिरंगजैः ॥ १८ ॥
इतश्च ॥
श्रीमन्महावीरजिनेंद्रतीर्थकल्पद्रुगच्छे इह चंद्रगच्छे ।
शब्दान्वितः सुंदरपक्षयुग्मो द्विरेफलीलामवलंबमानः ॥ १९ ॥
- - -

---

**No. 54. A Manuscript containing,**

1. **Navapayam**, by JINACHANDRA [नवपयं—जिणचंदः],
2. **Upadesamala**, by DHARMADASAGANI [उपदेशमाला—धर्मदासः],
3. **Upadesamala**, by HEMACHANDRA [उपदेशमाला—हेमचन्द्रः],
4. **Bhavabhavana**, by HEMACHANDRA [भवभावना—हेमचन्द्रः],
5. **Sravakadinakritya** [श्रावकदिनकृत्यम्],
6. **Vivekamanjari**, by ASADA [विवेकमञ्जरी—आसडः],
7. **Dharmopadesamala**, by JAYASINHASURI [धर्मोपदेशमाला—जयसिंहसूरिः],
8. **Siddhantasara**, by PRADYUMNASURI [सिद्धान्तसारः—पज्जुन्नसूरिः]
9. **Pindavisuddhi**, by JINAVALLABHA [पिण्डविशुद्धिः—जिनवल्लभः],
10. **Jivavichara** [जीवविचारः].

Leaves 114 to 232; 16 inches long, 2 inches broad.

**No. 55. Sabdanusasanavritti,** by HEMACHANDRA [शब्दानुशासनवृत्तिः—हेमचन्द्रः].

Leaves 1 to 287; 15 inches long, 2 inches broad. Dated Samvat 1228 = A. D. 1232.

Ends:

संवत् १२८८ वर्षे आषाढवादि अमावास्यादिने भौमे राणकश्रीलावण्यप्रसाददेवराज्ये वटकूपके वेलाकुले प्रतीहारशाखाटप्रातिपत्तौ श्रीमद्देवचंद्रसूरिशिष्येण भुवनचंद्रेण क्षुल्लकधर्म्मकीर्तिपाठयोग्या व्याकरणटिप्पनकपुस्तिका लिखितेति ॥ पं॰ सोमकलसेन शोधिताच ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥
शिवतातिरस्तु श्रीजिशासनस्येति ॥

---

**No. 56. Linganusasana (with Commentary),** by VAMANA [लिङ्गानुशासनं सटीकम् मू॰ वामनः].

Commentary begins:

प्रेयांसं शिवमीश्वरं प्रशमिताशेषात्मदोषाशया

Text begins:

सिद्धं विबुधजनेष्टं विदिताखिलवाङ्मयं प्रणम्याप्तम्

Commentary ends:

विशिष्टं लोकात् ज्ञेयमवगंतव्यमिति ॥ ...

व्याडिप्रणीतिमथ वाररुचं सचांद्रं
जैनेंद्रलक्षणगतं विविधं तथान्यत् ।
लिंगस्य लक्ष्म हि समस्य विशेषयुक्त-
मुक्तं मया परिमितं त्रिदशा इहार्याः ॥

अद्यापि संशयिगतार्थमनिष्टसंगि-
लिंगानुशासनमिहाज्ञतया मया यत् ।
प्रोक्तं हि किंचिदविचार्य तदार्यवर्यैः
संस्कार्यमस्ति यदि कार्यमुतावधीर्यम् ॥
लिंगानुशासनमिदं कृतमुन्नतेन
शुभ्रैर्गुणैः कविहितं किल वामनेन ।
बुद्ध्वाखिलं विमलशब्दगतं प्रमेयं
नातः परं शुभतरं स्फुटमस्ति लोकाः ॥
इति लिंगानुशासनवृत्तिः समाप्ता ॥
संवत् १२७३ श्रावणवादि ८ रवौ लिंगवृत्तिपुस्तिका लिखितेति ॥

---

**No. 57. A Manuscript containing,**

1. **Upadesamala,** by Dharmadasa [उपदेशमाला—धर्मदासः],
2. **Upadesamala,** by Maladhari Hemachandra [उपदेशमाला—मलधारिहेमसूरिः],
3. **Bhavabhavana,** by Maladhari Hemachandra [भवभावना—मलधारिहेमसूरिः],
4. **Sangrahanisutra,** by Maladhari Hamachandra [संग्रहणी—मलधारिहेमचन्द्रः],
5. **Yogasastra,** by Hemachandra [योगप्रकाशः—हेमचन्द्रः],
6. **Chaturvinsatijinastotra,** by Narachandra [चतुर्विंशतिजिनस्तोत्रम्—नरचन्द्रः],
7. **Sangrahaniratna,** by Maladhari Srichandrasuri [संग्रहणिरत्नम्—मलधारिश्रीचन्द्रसूरिः]·

Dated Samvat 1334 = A. D. 1278.

Chaturvinsatijinastotra begins:

जय प्रथमतीर्थेश जय प्रथमनिर्मम ।
जय प्रथमनीतिज्ञ जय प्रथमपार्थिव ॥ १ ॥

Chaturvinsatijinastotra ends:

यद्वैश्वानरचंद्रार्कज्योतिषामपि जीवितम् ।
तदुदेतु स्तवादस्मान्महानंदमयं महः ॥ १२१ ॥
कृतिरियं श्रीनरचंद्राचार्याणाम् ॥

संवत् १३३४ वर्षे भाद्रवाशुदि १ शनौऽद्येह श्रीदेवपत्तने सकल-राजावलीपूर्वं परमपाशुपताचार्यमहामहत्तरपंडितगंड [मंडली] प्रवरबृहस्पति अम्रापारिमहं श्रीअभयसीहप्रभृतिप्रतिपत्तौ उसवालज्ञातीयसाहु० भावड तत्पुत्रसाहुधनेसरतत्पुत्रगु - धरेण पितृभगिनीभगिनीपुण्यार्थं प्रकरणपुस्तिका लिखापिता ॥ मंगलं महाश्रीः ॥

Manuscript ends:

हरिसउरगछनिलउ गुणनिलउ विहियसयलदुहाविलउ ।
सिरिअभयदेवसूरी सुविहियचूडामणी जयउ ॥ १ ॥
कालवसेणं अवहे अहिणवपाहियस्स पुव्वसाहुपहे ।
जस्स मलहारिनामं दिन्नं कन्नेण नरवइणा ॥ २ ॥
रणथंभपुरे आणा लेहेणं जस्स स नरिंदेण ।
हेमधयदंडमिसउ निच्चं नच्चाविया कित्ती ॥ ३ ॥
सिरिहेमचंदसूरी तस्सीसो सिद्धनिवइनयचलणो ।
सिद्धंतसिंधुसारुद्धरणे मंदरगिरी जयउ ॥ ४ ॥
नयरट्ठाणे कंचणकलसारोवणखणंमि सा जस्स ।
वंमुत्ति भणिय कंठंमि कुसुममाला विणिक्खित्ता ॥ ५ ॥
जीवाण अभयदाणं चेईयसिहरेसु हेमधयकलसा ।
देसणवयणाउ कयाइं जस्स सिरिसिद्धराएण ॥ ६ ॥

नीसेसपावसंतावपसमिणं सुहसिरीए कुलभवणं ।
सिरिविजयसिंहं गुणे हिययंमि धरेह पयपउमं ॥ ७ ॥
सिरिसिरिचंदमुणिंदस्स अहिणवो जयइ कोइ कव्वरसो ।
बहुरोयसोयकलिमलजम्मणजरमरणानिट्ठवणो ॥ ८ ॥
सिरिविबुहचंदगुरुणा सुहत्थिणा मुक्खमाहिलसंतेण ।
सिद्धनारिंदप्पसायग्गलणं गणियं नहु मणंपि ॥ ९ ॥
भवसंभवभयहरणे कयदुक्करचरणकरणउद्धरणे ।
सिरिमुणिचंदमुणीसरचरणे सरणं अणुसरामि ॥ १० ॥
करकमलं लच्छिमयं मणममयमयं गुणे मयंकमए ।
वयणं च चंदणमयं वंदे मुणिचंदसूरीणं ॥ ११ ॥
सिरिहरिभद्दमुणिंदं वंदे निम्महियमोहमाहप्पं ।
तहमाणदेवसूरिं निज्जियमाणाइरिउवग्गं ॥ १२ ॥
जयउ सिरिसिद्धसूरी भद्दं सिरिदेवभद्दसूरीण ।
नंदउ महिंदसूरिस्स माणसं तहनिण्हवणं ॥ १३ ॥
सिरिदेवाणंदमुणीसरस्स चरियं हरेउ थो दुरियं ।
जं किरमी सामन्नगुणे - - - कट्ठाणंपि ॥ १४ ॥
मच्छरगिरिंदवज्जं जयउ विवेयक्कबिंबदिवसमुहं ।
सिवपुरपहपत्थयणं वयणं सिरिपुव्वसूरीणं ॥ १५ ॥
सिरिनेमिचंदपहुणो गुणगणरयणाण ताण किं भणिमो ।
छायावि कावि जेसिं मंडइ महिमंडलं सयलं ॥ १६ ॥
संवड्ढियं भवेणं जडिमहरं भरियसयलदिसिकुहरं ।
अपुव्वसरं सरिमो जसो जसोभद्दसूरीण ॥ १७ ॥
सिरिदेवप्पहपहुण कव्वसत्री जयंमि सा जयइ ।

हिययानिमग्गाए जियंति जीए वितुहा मइच्छरियं ॥ १८ ॥
दंसणनिज्जियससहरसिरीण गुणरयणरोहणगिरीण ।
नमिमो खंतिमहिमहाकिरीण नरचंदसूरीण ॥ १९ ॥
लछीमयं च विज्जामयं च नीसेसगुणगणमयं च ।
चरणारविंदरेणुं वंदे नरचंदसूरीण ॥ २० ॥
पणमह भवभयहरणं पयकमलजयं नरिंदपहगुरुणो ।
जाण तवचरणरेहा न लंघिया दुट्ठसत्तेहिं ॥ २१ ॥
विबुहजणजणियतोसो अमयावासो दुहाण कयनासो ।
रयणप्पहसूरीणं वयणविलासो चिरं जयउ ॥ २२ ॥
उवसमगुणमाणिक्कपवूयं विहियजणमणाणंदं ।
माणिक्कसूरिसुगुरूण चरणकमलं पणमयामि ॥ २३ ॥
विहडियमोहममोहा अखलियपसरा सुगुत्तठाणेसु ।
जयउ जणाहिययशेले पहा पभाणंदसूरीणं ॥ २४ ॥
निज्जियवम्महजोहं भवियणजणजणियसुद्धपडिबोहं ।
सिरिपउमएवसुगुरुगंभीरिमहोअहिं वंदे ॥ २५ ॥
इय गुरुगुणमुत्ताहलमालं काऊण कंठसंठवियं ।
भविया लहंतु सिवपुरसिरीसयंवरणसोहग्गं ॥ २६ ॥
इति श्रीसद्गुरुपद्धतिगाथाः समाप्ताः ॥

---

**No. 58. Upadesamala,** by Hemachandra with the author's commentary [उपदेशमाला सटीका—हेमचन्द्रः].

Leaves 1 to 398; 32 inches long, 3 inches broad. Dated Samvat 1425 = A. D. 1369.

Begins :

ॐ नमो वीतरागाय ।

येन प्रबोधपरिनिर्मितवाग्वरत्रां क्षिप्त्वोद्धृतानि भवनानि भवांधकूपात् ।
निःशेषनाकिविभुवंदितपादपद्मो भूयान्ममाशुभभिदे स युगादिदेवः ॥ १ ॥
ज्ञेयार्णवं सुरवरैरिव यैः समंतात्सद्बोधमंदरमथा प्रतिमथ्य लब्धः ।
जीवादितत्त्ववररत्नचयो भवंतु ते वः श्रिये विजयिनो जिनवीरपादाः ॥ २ ॥
दर्प्पोद्धुरस्मरतिरस्करणप्रवीणा विश्वत्रयप्रथितनिर्म्मलकीर्त्तिभाजः ।
शेषा अपि प्रविकिरंतु जिना रजो वः सर्वामरप्रणतपावनपादपद्माः ॥ ३ ॥
वंदे पादद्वितयं भक्त्या श्रीगौतमादिसूरीणाम् ।
निःशेषशास्त्रगंगाप्रवाहहिमवद्गिरिनिभानाम् ॥ ४ ॥
पारं यस्याः प्रसादेन देहिनः श्रुतनीरधेः ।
गच्छंति तां जगद्वंद्यां प्रणौमि श्रुतदेवताम् ॥ ५ ॥
अस्मादृशोपि संजातः परेषां किल बोधकः ।
यत्प्रभावेन तान्वंदे स्वगुरूंस्तु विशेषतः ॥ ६ ॥
इत्थं कृतनमस्कारो नमस्कार्येषु सर्वस्तुषु ।
प्रवक्ष्याम्यस्तविघ्नोर्थं प्रस्तुतं श्रुतनिश्रया ॥ ७ ॥
अंतरंगार्थगर्भं च यत्किंचिदिह वक्ष्यते ।
तत्रोपमितिग्रंथोक्ता नृणां सर्वापि भावना ॥ ८ ॥

**Ends:**

जाव जिणसासणमिणं जाव य धम्मो जयम्मि वित्थरइ ।
ता उपदेसुउएसा भवेहिं सया सुहत्थाहिं ॥ सुगमा ॥

इति श्रीहेमचंद्रसूरिविरचितोपदेशमाला समाप्ता ॥ ग्रंथाग्रं १४००० ॥ संवत् १४२९ वर्षे भाद्रपदवदि ९ भौमे पुष्पमालावृत्तिः संपूर्णा लिखिता ॥ ८० ॥ स्वस्ति ॥

ऊकेशवंशे श्राद्धधर्म्मधुरीणो रीणदानादिपुण्यकृत्यकरणानिपुणः त० पूना-भिधानः श्रावकपुंगवोभूत् । तत्पुत्रः पवित्रः ठ० धणपालस्य तस्य सहचा-

रिंणी सदाचारिणी पापप्रवेशवारणी ठ० धुंधलदेवीति जज्ञे । तत्कुक्षिसमुद्भवे-नात्यद्भुतसुकृतप्रोद्भूतश्रीश्रीदेवताप्रसादसाधिताधिकतरसकलशुभकृत्यनिवहेन ठ० मोषाभिधेन श्राद्धवरेण पूज्यभट्टा०श्रीअभयसिंहसूरिसद्व्याख्यामृतवृष्टिस-मुत्पन्नभावनाकल्पवल्लीप्रभावात् श्रीपुष्फमालावृत्तिपुस्तकं स्वपित्रोः श्रेयोर्थ-मलेखयत् शुभवृद्धये वृद्धः पुत्रः ठ० देपाल १लघुर्धनपालनामाभूत् । ठ० मोषा । लघुभ्रातृषेताके- आसीत् ॥

---

**No. 59. A Manuscript containing the first five uddesakas of the Nisitha Sutra, Bhashya, and Churni [निशिथभाष्यम्].**

Leaves 1 to 304; 33 inches long, 2 inches broad. Dated Samvat 1320 = A. D. 1264.

Bhashya begins:

ॐ नमो वीतरागाय ॥

णवबंभचेर———संम चत्तलो बहुबहुतरउ पदग्गेणं ॥ १ ॥

आयारकप्पस्सउ इमाइं

Bhashya ends:

उव्वास असाति मूसगतेण गामादीसुजाणमति ।

इति भगवान्निशीथभाष्ये पंचमः उद्देशकः परिसमाप्तः ॥

Churni begins:

नमो अरहंताणं ॥

णमिउं अरहंताणं सिद्धाण य कंमकवयमुक्काणं ।

सयणसिणेहविमुक्काण सव्वसाधूण भावेणं ॥

Churni ends :

तह्मा णिवण्णो निसण्णो वा दाहिणपासे अवादे संकरेज्जा वितियपदगाहा ।

इति निसीहविसेसचुण्णी पंचमः उद्देशकः समाप्तः ॥ मंगलं महाश्रीः ॥ शुभं भवतु लेखकपाठकयोः ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।

यदिशुद्धमशुद्धं वा मम दोषो न दीयते ॥

संवत् १३२० वर्षे वैशाखशुदि ४ गुरौ निसीथप्रथमखंडचूर्णिपुस्तकं लिखितमिति ॥

---

**No. 60. A Commentary on the Brihatkalpasutra and its Churni,** by KSHEMAKIRTI. The Second and third Khandas only [ बृहत्कल्पटीका—क्षेमकीर्तिः ].

Second Khanda, Leaves 1 to 420; Third Khanda, Leaves 1 to 335 : 33 inches long, 2 inches broad.

Second Khanda ends :

मुक्त्वा तयोः संस्तारकोन्यान्यत्र संक्रामयितव्य इति भावः । इदमेव व्याचष्टे । वरिस्रोवहितकीरइ । सहं न सहायगा विज्जुयलंति ॥ ॥ सर्वानपि साधून् तत्रैव मापयंति ॥ ग्रंथाग्रं १४१६० ॥ मंगलं महाश्रीः ॥ शुभं भवतु समस्तसंघस्य ॥

Third Khanda begins :

अर्हं । एवं संस्तारकाणां संक्षोभपरंपरकः परंपरया स्थानांतरसंक्रमणरूपस्तावन्मंतव्यो यावद्धि चरमसाधुः ॥

Third Khanda ends :

चरणगुणस्थितश्चारित्रज्ञानस्थितः साधुर्यस्मात्सर्वेपि नया भावनिक्षेपमिच्छंतीति गतं नयद्वारम् ॥ इति श्रीकल्पटीकायां षष्ठ उद्देशकः समाप्तः ॥

नंदीसंदर्भमूले सुदृढतरमहापीठिकास्कंधबंधे

तुंगादेशोर्ध्वशाखे दलकुसुमसमैः सूत्रनिर्युक्तिवाक्यैः ।

सांद्रे भाष्यार्थसार्थामृतफलकलिते कल्पकल्पद्रुमेस्मि-
न्नाकृष्टुं षष्ठशाखाफलनिवहमसावंकुटीवास्तु टीका ॥ ६ ॥
समाप्ता चेयं सुखावबोधा नाम कल्पाध्ययनटीका ॥

सौवर्णा विविधार्थरत्नकलिता एते षडुद्देशकाः
श्रीकल्पेऽथ निधौ मताः सुकलशा दौर्गत्यदुःखापहे ।
दृष्ट्वा चूर्णिसुबीजकाक्षरततिं कुञ्याथ गुर्वाज्ञया
खानंखानममी मया स्वपरयोरर्थे स्फुटार्थीकृताः ॥ १ ॥

श्रीकल्पसूत्रममृतं विबुधोपयोग-
योग्यं जरामरणदारुणदुःखहारि ।
येनोद्धृतं मतिमथा मथितात् श्रुताब्धेः
श्रीभद्रबाहुगुरवे प्रणतोऽस्मि तस्मै ॥ २ ॥

येनेदं कल्पसूत्रं कमलमुकुलवत्कोमलं मंजुलाभि-
र्गोभिर्दोषापहाभिः स्फुटविषयविभागस्य संदर्शिकाभिः ।
उत्फुल्लोद्देशपत्रं सुरसपरिमलोद्गारसारं वितेने
तं निःसंबंधबंधुं नुत मुनिमधुपा भास्करं भाष्यकारम् ॥ ३ ॥

श्रीकल्पाध्ययनेऽस्मिन्नतिगंभीरार्थभाष्यपरिकलिते ।
विषमपदविवरणकृते श्रीचूर्णिकृते नमः कृतिने ॥ ४ ॥
श्रुतदेवताप्रसादादिदमध्ययनं विवृण्वता कुशलम् ।
यदवापि मया तेन प्राप्नुयां बोधिमहममलाम् ॥ ५ ॥
गमनयगभीरनीरश्चित्रोत्सर्गापवादवादोर्मिः ।
युक्तिशतरत्नरम्यो जैनागमजलनिधिर्जयति ॥ ६ ॥
श्रीजैनशासननभस्तलतिग्मरश्मिः श्रीसद्मचांद्रकुलपद्मविकाशकारी ।
स्वज्योतिरावृतदिगंबरडंबरोऽभूत् श्रीमान् धनेश्वरगुरुः प्रथितः पृथिव्याम् ॥ ७

श्रीमच्चैत्रपुरैकमंडनमहावीरप्रतिष्ठाकृत-
स्तस्माच्चित्रपुरप्रबोधतरणेः श्रीचैत्रगच्छोऽजनि ।
तत्र श्रीभुवनेंद्रसूरिसुगुरुर्भूभूषणं भासुर-
ज्योतिः सद्गुणरत्नरोहणगिरिः कालक्रमेणाभवत् ॥ ८ ॥
तत्पादांबुजमंडनं समभवत्पक्षद्वयीशुद्धिमा-
न्नीरक्षीरसदृक्षदूषणगुणत्यागग्रहैकव्रतः ।
कालुष्यं च जडोद्भवं परिहरन् दूरेण सन्मानस-
स्थायीराजमरालवद्गणिवरः श्रीदेवभद्रप्रभुः ॥ ९ ॥
शस्याः शिष्यास्त्रयस्तत्पदसरसिरुहोत्संगशृंगारभृंगा
विध्वस्तानंगभंगाः सुविहितविहितोत्तुंगरंगा बभूवुः ।
तत्राद्यः सच्चरित्रानुमतिकृतमतिः श्रीजगच्चंद्रसूरिः
श्रीमद्देवेंद्रसूरिः सरलतरलसच्चित्तवृत्तिर्द्वितीयः ॥ १० ॥
तृतीयशिष्याः श्रुतवारिवार्द्धयः परीषहाक्षोभ्यमनःसमाधयः ।
जयंति पूज्या विजयेंदुसूरयः परोपकारादिगुणौघभूरयः ॥ ११ ॥
प्रोढं मन्मथपार्थिवं त्रिजगतीजैत्रं विजित्येयुषां
येषां जैनपुरे परेण महसा प्रक्रांतकांतोत्सवे ।
स्थैर्यं मेरुरगाधतां च जलधिः सर्वंसहत्वं मही
सोमः सौम्यमहर्पतिः किल महत्तेजोऽकृत प्राभृतम् ॥ १२ ॥
वापंवापं प्रवचनवचोबीजराजीं विनेय-
क्षेत्रव्राते सुपरिमलिते शब्दशास्त्रादिसीरैः ।
यैः क्षेत्रज्ञैः शुचिगुरुजनाम्नायवाक्सारणीभिः
सिक्त्वा तेने सुजनहृदयानंदिसज्ज्ञानसस्यम् ॥ १३ ॥
यैरप्रमत्तैः शुभमंत्रजापैर्वेतालमाधाय कलौ स्ववश्यम् ।
अतुल्यकल्याणमयोत्तमार्थसत्पूरुषः सत्वधनैरसाधि ॥ १४ ॥

किं बहुना ।

ज्योत्स्ना मंजुलया यया धवलितं विश्वंभरामंडलं

या निःशेषविशेषविज्ञजनताचेतश्चमत्कारिणी ।

तस्यां श्रीविजयेंदुसूरिसुगुरोर्निष्कृत्रिमाया गुण-

श्रेणेः स्याद्यदि वास्तववस्तवकृतौ विज्ञः स वाचांपतिः ॥ १५ ॥

तत्पाणिपंकजरजःपरिपूतशीर्षाः शिष्यास्त्रयो दधति संप्रति गच्छभारम् ।

श्रीवज्रसेन इति सद्गुरुरादिमोत्र श्रीपद्मचंद्रसुगुरुस्तु ततो द्वितीयः ॥ १६ ॥

तार्त्तीयीकस्तेषां विनेयपरमाणुरनणुशास्त्रेऽस्मिन् ।

श्रीक्षेमकीर्त्तिसूरिर्विनिर्ममे विवृतिमल्पमतिः ॥ १७ ॥

श्रीविक्रमतः क्रामति नयनाग्निगुणेंदुपरिमिते वर्षे ।

ज्येष्ठश्वेतदशम्यां समर्थितैषा च हस्तार्के ॥ १८ ॥

प्रथमादर्शे लिखिता नयप्रभप्रभृतिभिर्यतिभिरेषा ।

गुरुतरगुरुभक्तिभरोद्वहनादिव नम्रितशिरोभिः ॥ १९ ॥

इह वा ।

सूत्रादर्शेषु यतो भूयस्यो वाचना विलोक्यंते ।

विषमाश्च भाष्यगाथाः प्रायः स्वल्पाश्च चूर्णिगिरः ॥ २० ॥

ततः ।

सूत्रे वा भाष्ये वा यन्मतिमोहान्मयाऽन्यथा किमपि ।

लिखितं वा विवृतं वा तन्मिथ्या दुःकृतं भूयात् ॥ २१ ॥

ग्रंथ ९९९१ ॥ साहू० आसधरसुतसाधु० श्रीरतनसीहसुततेजपालश्रेयोर्थं
अयं कल्पवृत्तिपुस्तकं त्रितयखंडं कारापितं लिखापितं च ॥ शुभं भवतु ॥

**No. 61. Agamikavastuvicharasaraprakarana (with a Commentary),** by JINAVALLABHASURI [आगमिकवस्तुविचारसारप्रकरणं सविवरणम् । मू० जिनवल्लभसूरिः]·

**Begins:**

॥ ६० ॥ नमः सर्वज्ञाय ॥

आगमिकवस्तुगोचरविचारसारप्रकरणपदजातम् ।

किंचित्किंचिद्विवृणोमि ततहितां भारतीं स्मृत्वा ॥ १ ॥

**Ends:**

पठित्वा परावर्तयंति । परावर्तनप्रसादेन प्रशस्य राजानं नीतिश्रवणादीनामेवं क्रमः ॥ इत्यागमिकवस्तुविचारसारप्रकरणाविवरणम् ॥

---

**No. 62. A Manuscript containing,**

1. **Aloyanavihana** [आलोयणाविहाणं].
2. **Panchapramanipanchasika,** by KAKUDASURI [पंचप्रमाणीपंचाशिका—ककुदसूरिः]·

**Both incomplete.**

**Aloyanavihana ends:**

इय एवंविहमरणं सरणं सत्ताणं दुक्खतत्ताणं ।

पाविंति परमकल्लाणकारणं नेव निप्पुन्ना ॥ ८४ ॥

आलोयणाविहाणं सम्मत्तं ॥

**Panchapramanipanchasika ends:**

पंचपमाणपिगरणमेयं सिरिककुयसूरिणा रइयं ।

आगमजुत्तीसिद्धं सिद्धंताविऊ वियाणंति ॥ ४३ ॥

इति पंचप्रमाणीपंचाशिका श्रीककुदसूरिरचिता समाप्तेति ॥

श्रीऊकेशगच्छे सुचिंतितगोत्रे श्रे० जसणागपुत्रराजदेवेन पितृमातृश्रेयसे

दसवैकालिकसूत्रं पंचप्रमाणीपंचाशिका लिखापिता। श्रीसिद्धसूरिगुरूणां प्रदत्ता च

---

No. 63. **A Manuscript containing,**

1. **Upadesamala**, by Dharmadasa [उपदेशमाला—धर्मदासः],
2. **Bhavabhavana**, by Hemachandra [भवभावना],
3. **Mulasuddhiprakarana**, by Pradyumnasuri [मूलशुद्धिप्रकरणम्—प्रद्युम्नसूरिः],
4. **Aradhanaprakarana** [आराधनाप्रकरणम्],
5. **Chaityavandana** [चैत्यवंदनम्],
6. **Aurapachchakhana** [आउरपच्चखाण].
7. **Jivopalambhaprakarana** [जीवोपालंभप्रकरणम्],
8. **Jivavibhatti**, by Jinachandra [जीवविभत्ती—जिणचंद],
9. **Chausarana** [चउसरणं],
10. **Parigrahapramana** (part of a Dharmakalpadruma [परिग्रहप्रमाणम्],
11. **Agamikavastuvicharasara**, by Jinavallabha [आगमिकवस्तुविचारसारप्रकरणम्—जिनवल्लभः],
12. **Dharmavisesha** [धर्मविशेषः].

Leaves 1 to 174; 13 inches long, 1 inch broad. **Dated Samvat 1186 = A. D. 1130.**

Jivopalambhaprakarana begins:

धम्मोवएसजुत्तं उवलंभं जीव तुज्झ दाहामि।
थेवंपि तए न दंसियव्वं यं भावउ सुणेसु ॥ १ ॥

Jivopalambhaprakarana ends:

इय सोउं जीव तुमं नेमिकुमारस्स भासियं कुणसु
जेणुवलंभं न लहसि गच्छसि पुण सासयं ठाणं ॥ २९ ॥
जीवोपालंभः समाप्तः ॥

Jivavibhatti begins:

नमिऊण चलणजुयलं वीरजिणिंदस्स लोगनाहस्स ।
वोच्छं जीवविभत्ती मंदमइविबोहणट्ठाण ॥ १ ॥

Jivavibhatti ends:

एसा जीवविभत्ती रइया संखेवउ मुणिगणाणं ।
गणिणा जिणचंदेणं कम्मक्खयमिच्छमाणेणं ॥ २९ ॥

जीवविभत्ती सम्मत्ता ॥

Parigrahapramana begins:

पणमिय परमपयत्थं नयसुरसत्थं सुदिट्ठपरमत्थं ।
वीरं वीरं संमं गिहीणं धंमं पवक्खामि ॥ १ ॥
तस्स यमूलं सम्मं संमत्तं देसियं जिणिंदेहिं ।
तं देवसुगुरुसिद्धंततत्तं पवत्तिरूवंति ॥ २ ॥

तत्थ य ॥

निक्कंदियभवकंदो पडिबोहियसयलभवअरविंदो ।

Parigrahapramana ends:

सुहु परिणइ थीउ भावणावारिपूरो
ल्सदणुवयखंधो सुद्धसंमत्तमूलो ।
बहुविहगुणसालो धम्मकप्पद्दुमो मे
सिवसुहफलमेसो देउ सिग्धंतु विग्घं ॥ ८२ ॥
सिरिसीलभद्दमुणिवइविणेयसिरिधम्मघोससूरीण ।
पयमूलंमि पवन्नो व धवलसट्ठेण गिहिधम्मो ॥ ८३ ॥
एक्कारससु सएसुं छासीउ समहिएसु वरिसाणं ।
मगशिरपंचमिसोमे लिहिया मिणं परिग्गहपमाणं ॥ ८४ ॥
॥ परिग्गहपरिमाणं सम्मत्तं ॥

संवत् ११८६ मार्गसिरवदि सोमे लिखितमिति ॥

Agamikavastuvicharasara ends :

जिणवल्लहोवणीयं जिणवयणामयसमुद्दविंदुमिमं ।

हियकंखिणो वुहजणो निसुणंतु गुणंतु जाणंतु ॥ ८९ ॥

इत्यागमिकवस्तुविचारसारप्रकरणं समाप्तमिति ॥

Dharmavisesha begins :

ओं नमः सर्वज्ञाय ॥

नमिऊण जिणं जगजीवबंधवं धम्मकणयकसवट्टं ।

वोच्छं धम्मविसेसं धम्मम‍ईणं समासेण ॥ १ ॥

Dharmavisesha ends :

सयंपभे देवदुंदुभिनिनाए सग्गेसु चिरं वसिउं ।

सुचरियचरणो चरह धम्म ॥ ८२ ॥ ---

---

**No. 64. Jinadattachariya** [जिणदत्तचरियं].

Leaves 1 to 28.

Begins :

नमिऊण चलणजुयलं असुरासुरखयरवंदियचलणं ।

सुरइंदरइयपूयं मिच्छत्तविणासणं पवरं ॥

तह गणहर आयरिए वरउवज्झाए साहुणो नमंसित्ता ।

वोच्छं दाणास्स फलं पुव्वायरि----न्नो अडविं व दरिं गुहं समुद्दं वा ।

नंदाति तहिन्न हिंसा जिणदत्तो जह य कयपुन्नो ।

तत्थ को सो जिणदत्तो ॥ अत्थिअवंती नाम जणवउ

गउ सुरलोयं पारंपरेण निव्वाणंति गउ जिण--------

---

**No. 65. Naganandanataka,** by SRIHARSHA [नागानन्दनाटकम्—श्रीहर्षः].

Leaves 1 to 12; 12 inches long, $1\frac{1}{2}$ inches broad. Dated Samvat 1258=A. D. 1202.

Ends:

समाप्तं चेदं नागानंदनाम नाटकम् ॥

संवत् १२५८ वर्षे श्रीमदणहिलपाटके मुनिचंद्रेण लोकानंदयोग्या पुस्तिका लिखिता ॥ शुभं भवतु ॥ मंगलं महाश्रीः ॥

---

**No- 66. Oghaniryukti** [ओघनिर्युक्तिः]·

Leaves 1 to 91; 12 inches long, $1\frac{1}{4}$ inches broad. Dated Samvat 1181 = A. D. 1125.

Begins:

अरहंते वंदित्ता चोद्दसपुव्वी तहेव दसपुव्वी ।

Ends:

एक्कारसहिं सयेहिं अट्ठहिं आहिएहिं सम्मत्ता ॥

ग्रंथाग्रं प्रत्येकांकतः ॥ गाथाः ॥ संवत् ११८१ ज्येष्ठवदि १३ शनौ मुनिचंद्रसाधुना लिखितेति ॥

---

**No. 67· Kalpasutra and Kalikacharyakatha** [कल्पसूत्रं कालिकाचार्यकथा च]·

Leaves 1 to 143; 13 inches long, inches broad. Dated Samvat 1344=A. D. 1288.

Ends:

अथ गुरुक्रमः ॥

श्रीराजगच्छमुकुटोपमशीलभद्रसूरेर्विनेयतिलकः किल धर्म्मसूरिः ।

दुर्वादिगर्वभरसिंधुरसिंहनादः श्रीविग्रहक्षितिपतेर्दलितप्रमादः ॥ १८ ॥

आनंदसूरिशिष्यश्रीअमरप्रभसूरितः ।
श्रुत्वोपदेशं कल्पस्य पुस्तिकां नूतनामिमाम् ॥ १९ ॥
उद्यमात् सोमसिंहस्य स पुण्यः पुण्यहेतवे ।
अलेखयच्छुभार्येषां निजमातुर्गुणाश्रियः ॥ २० ॥
यावच्चिरं धर्मधराधिराजः सेवाकृतां सुकृतिनां वितनोति लक्ष्मीम् ।
मुनींद्रवृंदैर्विहिताभिमाना तावन्मुदं यच्छतु पुस्तिकासौ २१ ॥
संवत् १३४४ वर्षे मार्ग० शुदि २ रवौ सोमसिंहेन लिखापिता ॥

---

**No. 68. Sabdanusasanalaghuvritti,** by HEMACHANDRA
[शब्दानुशासनलघुवृत्तिः—हेमचन्द्रः].
Dated Samvat 1370 = A. D. 1314.

**Ends:**

इत्याचार्यश्रीहेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशानलघुवृत्तौ पंचमस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ मंगलं महाश्रीः ॥
क्षुण्णाः क्षोणिभृतामनेन कटका भग्नाथ धारा ततः
कुंठः सिद्धपतेः कृपाण इति रे मामंसत क्षत्रिय ।
आरूढप्रबलप्रतापदहनः संप्राप्तधाराश्चिरा-
त्पीत्वा मालवयोषिदश्रुसलिलं हंतायमेधिष्यते ॥ १ ॥
यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ॥
सं० १३७० आश्विनवदि ४ स्तंभतीर्थे पूज्यश्रीरत्नाकरसूरीणामादेशेन ले० सागरेण पुस्तिका लिषिता ॥ग्रंथाग्रं ॥ ४०० ॥

---

**No. 69. A Manuscript containing,**

**1. Atmabodhakulaka** [आत्मबोधकुलकम्],

**2. Dharmadharmaprakarana** [धर्माधर्मप्रकरणम्].

Atmabodhakulaka begins:

संसारंमि असारे नत्थि सुहं वाहिवेयणापउरे ।

जाणंतो इह जीवो न कुणइ जिणदेसियं धम्मं ॥ १ ॥

Ends:

इय जाणिऊण एयं धम्माइत्ताइं सव्वकज्जाइं ।

ता तह करिज्ज तुरियं जह सिद्धिं पावसे अयरा ॥ २ ॥

Dharmadharmaprakarana begins:

अह जण निसुणिज्जउ कन्नु धरिज्जउ धम्माधम्मविचारफुडु ।

जिव जाणिउ जिणपहुमिल्लिउ कुप्पहुपावउ सिवसुह अमयफुडु ॥ १ ॥

Ends:

एवंजाणेविणु मग्गुलएविणु कायव्वं भो अप्पाहिउ ।

आगमअणुसारिहिं जिणपहसूरिहिं धम्माधम्मविचारकिउ ॥ १८ ॥

---

**No. 70. Jivadayaprakarana** [जीवदयाप्रकरणम्].

It is the last of a collection of well known prakaranas contained in a manuscript of 187 leaves; 15 inches long, 2 inches broad.

Begins:

मिच्छत्तमोहपासं पसरियविमलोरुकेवलपयासं ।

पणयजणपूरियासं पयंणु पणमित्तु जिणपासं ॥ १ ॥

वोच्छामि जीवमग्गणगुणट्ठाणुवउगजोगलेसाई ।
संसयतिमिरपयंगं भवियाण कुमुयपुन्निमाइंदं ।
काममइंदमइंदं जगजीवहियं जिणं नमिउं ॥ १ ॥
पंचमहव्वयं गुरुभारधारण पंचसमिए तिगुत्ते ।
नमिऊण सयलसमणे जीवदयापगरणं वोच्छं ॥ २ ॥

Ends :

जं कल्ले कायव्वं अज्जं चिय तं करेह तुरमाणो ।
बहुविग्घो य मुहुत्तो मा अवरह्णं पडिक्खेह ॥ ११३ ॥
जीवदयापगरणं सम्मत्तं ॥

---

**No. 71. Pratikramanasutrachurni** [प्रतिक्रमणसूत्रचूर्णिः].

Dated Samvat 1178 = A. D. 1122.

Ends :

केसु पुण ट्ठाणेसु इरिया वहियापडिक्कमणं भवइ । उच्यते ।
उच्चारं पासवणं भूमीए वोसिरित्तुउवउतो ।
ऊसरि – – – – – पडिक्कमइ ।
एवं सुवुट्टियाई सु–वि इरिया पडिक्कमणं – – – – – ग्रं० १९० ॥
संवत् ११६८ कार्त्तिकशुदि – – – – – –

---

**No. 72. Dharmavidhi,** by SRIPRABHASURI; with the Commentary of UDAYASINHA [धर्मविधिः—सटीकः—मू॰ श्रीप्रभसूरिः टी॰उदयसिंहः].

Leaves 1 to 93; 13 inches long, 5 inches broad. Dated Samvat 1418 = A. D. 1362. This manuscript is written on *cloth.* The four manuscripts which follow, and with which my extracts from the larger of the two bhandars in the Pophliano-pado end, are written on *paper*, cut into long slips to resemble palm-leaves. With No 77 begins a Series of extracts from palm-leaf manuscripts in the Smaller Pophliano-pado bhandar.

Commentary begins:

नमः श्रीसर्व्वज्ञाय ॥

जयति जगदभयहेतुः स श्रीवीरः पराक्रमाभ्यधिकः ।
यस्याद्भुतसरलतया विततगणः स्फुरति धर्म्मविधिः ॥ १ ॥
हृतजाडयतमा रविवद्विपुलमहाविश्वबोधकात्मानः ।
दद्तामनुदिनमुदयं नाभेयोऽन्येपि तीर्थेशाः ॥ २ ॥
सा जीयाज्जैनी गौः सद्धर्मोलंकृतिर्नवरसाढ्या ।
त्रिपदान्वितयापि यया भुवनत्रयगोचरोऽव्यापि ॥ ३ ॥
श्रीगौतमादिगुरवो हंसा इव चरणरागसुगतिभृतः ।
कृतसन्मानसवासा विशुद्धपक्षा मुदं दद्युः ॥ ४ ॥
शून्येन मादृशापि हि येषामेकस्वरूपिणां पुरतः ।
आधिकमलभ्यत गणना नमोऽस्तु तेभ्यो निजगुरूभ्यः ॥ ५ ॥
स्तुत्वाभीष्टानेवं श्रीश्रीप्रभसूरिभिर्विरचितस्य ।
श्रीधर्म्मविधेर्वृत्तिं गुरूपदेशात्करिष्येऽहम् ॥ ६ ॥
कृत्यविधाव(न)भिज्ञः शिशुरिव गुरुकार्यवृत्तिकृतचित्तः ।
क्वचित्पदे स्खलितोपि स्थाप्यः सद्भिर्न हास्योऽहम् ॥ ७ ॥

यच्चायुक्तार्थमहं मुग्धमतिर्वच्मि किंचिदप्यत्र ।
पुत्रापराधवत्तद्विबुधैर्मम सह्यतां सर्वम् ॥ ८ ॥
सज्जनमुदेऽत्र सूक्तं यच्चान्यद्दुष्टतुष्टये तदपि ।
द्वेधापि परोपकृतेर्मम श्रमः सफल एवासौ ॥ ९ ॥
यच्चाह परो वायसदशनपरीक्षेव निरभिधेयमिदम् ।
अपिचाप्रयोजनं खलु कंटकशाखोपमर्दनवत् ॥ १० ॥
दश दाडिमानि पूपाः षडिति वचोवत्तथा न संबद्धम् ।
इत्यादिहेतुनिवहस्यासिद्धत्वप्रकटनाय ॥ ११ ॥
प्रेक्षावतां प्रवृत्यै शास्त्रादावादिमंगलार्थं च ।
प्रकरणकारः प्रथमं गाथामेकामिमामाह ॥ १२ ॥

Text begins:

नमिऊण वद्धमाणं तियसिंदनरिंदविहियबहुमाणं ।
वुच्छं सपरहियत्थं धम्मविहिमहं समासेण ॥ १ ॥
व्याख्या ॥

सांप्रतं ग्रंथकारो धर्मविधिविधायिनां शास्वतफलावाप्त्याः ग्रंथसमाप्तिं कुर्वन्नाह—

एयं सिरिधम्मविहिं सिरिसिरिपहसूरिणा समाइउं ।
जं आयरंति सम्मं लहंति ते सासयसुहाइं ॥

श्रीधर्मविधिं श्रीश्रीप्रभसूरिनाम्ना आचार्येण समुपदिष्टं ये भव्या आचरंति सम्यक् ते लभंते शास्वतसुखानीति गाथार्थः ॥

इति विवृतं धर्मविधेः श्रीश्रीप्रभसूरिभिः कृतं सूत्रम् ।
अथवास्य वृत्तिकारः स्वगुरुक्रममाह संक्षेपात् ॥ १ ॥
श्रीचंद्रगच्छकमलाकंठालंकारतारहारनिभः ।
श्रीसर्वदेवसूरिर्भूरिगुणोभूद्भुवि ख्यातः ॥ २ ॥

तत्पट्टनभासि युगपल्लब्धोदयौ परोपकृतिकुशलौ ।
नव्यौ रविचंद्राविव विदितौ शिष्यावजनिषाताम् ॥ ३ ॥
तत्रैकोभिनवरविः श्रीश्रीप्रभसूरिरहतगुरुतेजाः ।
कुवलयविबोधहेतु· सदाप्यनस्तमितमहिमा च ॥ ४ ॥
विमलसदासुवृत्तो द्योतितपक्षद्वयस्त्यक्तदोषः ।
श्रीसोमप्रभसूरिर्नवीनः सोमप्रभश्चान्यः ॥ ५॥
तत्र श्रीप्रभसूरिः श्रुतोदधेरमृतमिव समुद्धृत्य ।
श्रीधर्म्मविधेः सूत्रं सवृत्तिकं सूत्रयामास ॥ ६ ॥
तदनुस्फुटार्थवत्यपि सुरक्षिताप्यस्य भुवनस्येव ।
वृत्तिर्जगाम शिखि३शर५भास्कर१२मितवर्षजे भंगम् ॥ ७ ॥
अथ
तस्य श्रीप्रभसूरेः शिष्याश्चतुर्दिशं विदिताः ।
समधिगतचतुर्विद्या अमी बभूवुश्चतुःसंख्याः ॥ ८ ॥
श्रीभुवनरत्नसूरिः श्रीनेमिप्रभमुनीश्वरस्तदनु ।
श्रीमन्माणिक्यप्रभसूरिर्महीचंद्रसूरिश्च ॥ ९ ॥
दीक्षागुरुराद्यतमो यस्याभून्मातुलो द्वितीयस्तु ।
शिक्षागुरुस्तृतीयः पदप्रतिष्ठागुरुस्तुर्यः ॥ १० ॥
स श्रीमाणिक्यप्रभगुरुसेवी स्वगुरुबंधुसंमत्या ।
आचार्य उदयसिंहश्चक्रे श्रीधर्म्मविधिवृत्तिम् ॥ ११ ॥
श्रीमत्पूज्यरविप्रभमुनिपतिपदकमलमंडनमरालः ।
वृत्तिमशोधयदेनां महाकविर्विनयचंद्राख्यः ।
सद्वृत्तिकुमुदिनीयं विचकासे विमलचंद्रसाहाय्यात् ॥ १२ ॥
चंद्रावतीनगर्यां तनूद्भवा श्रेष्ठिसोमदेवस्य ।
प्रथमप्रतिमप्रतिमामिह राजीमत्यकीलिखत ॥ १३ ॥

यत्सिद्धांतविरुद्धं भणितमशुद्धं च मुग्धबुद्धित्वात् ।
तच्छोधयंतु विबुधा अवधार्य व्याधिमिव वैद्यः ॥ १४ ॥
तस्मै नमः स्वगुरवे यद्योगाग्निप्रभः प्रभाद्योहम् ।
काचोप्युपैति माणितां यन्माणिक्यप्रभाश्लेषात् ॥ १५ ॥
या शासनपुष्टिपरा जननीवद्भव्यसंतातिं पाति ।
सा श्रीशासनदेवी शिवतातिर्भवतु संघस्य ॥ १६ ॥
रस६मंगल८सूर्यमिते १२ वर्षे श्रीविक्रमादातिक्रांते ।
चक्रे चंद्रावत्यां वृत्तिरियं संघसान्निध्यात् ॥ १७ ॥
ग्रंथप्रमाणमत्र प्रत्यक्षरगणनया विनिश्चिक्ये ।
पंचसहस्राण्यस्यां विंशत्यधिका च पंचशती ॥ १८ ॥
श्रीधर्मविधेः सूत्रं विवृण्वतावापि यन्मया पुण्यम् ।
तेन जिनधर्मकरणे सदोद्यतो भवतु भव्यजनः ॥ १९ ॥
इति कुवलयबोधकरी जनशस्या निर्म्मला विधुकलेव ।
धर्म्मविधेर्वृत्तिरियं लभतां शाश्वतिकमित उदयम् ॥ ६०३ ॥

इति श्रीउदयसिंहाचार्यविरचिता उदयांकाष्टद्वारा श्रीधर्म्मविधिवृत्तिः समाप्ता ॥ ग्रंथाग्रं ५५२० ॥

संवत् १४१८ वर्षे वीबाग्रामे श्रीनरचंद्रसूरीणां शिष्येण श्रीरत्नप्रभसूरीणां बांधवेन पंडितगुणभद्रेण कच्छलीश्रीपार्श्वनाथगोष्ठिकलींबाभार्यागउरीतत्पुत्र-श्रावकजसाडूंगरतद्भगिनीश्राविकावींझीतील्हीप्रभृत्येषां साहाय्येन प्रभुश्री-श्रीप्रभसूरिविरचितं धर्म्मविधिप्रकरणं श्रीउदयसिंहसूरिविरचितां वृत्तिं श्री-धर्मविधिग्रंथस्य कार्त्तिकवदि दशमीदिने गुरुवारे दिवसपाश्चात्यघटिकाद्वय-समये स्वपितृमात्रोः श्रेयसे श्रीधर्म्मविधिग्रंथमलिखत् ॥

**No. 73. Prithvichandracharitra,** by SANTYACHARYA [पुहइचंदचरियं-शान्त्याचार्यः].

Leaves 1 to 143. Dated Samvat 1515 = A. D. 1455.

Begins:

नमो श्रीजैनवचसे ॥

वंदे कुवलयभूसणमणुन्नसाउदयं विसालत्थं ।
विब्भमरहियं माणससरं व पढमं जिणं पढमं ॥ १ ॥

विद्दुमवण्णसोणतलं फुरंतकरिमयरमीणसंखकं ।
प्रणमामि सायरं सायरं व वीरस्स कमकमलं ॥ २ ॥

हयमोहघणतमोहा निम्मलमेहाविराइपउमोहा ।
सेसावि हुंतु जइणो जिणवयणो दिवसवइणो व्व ॥ ३ ॥

सिवपयसरवरहंसे पहीणनीसेसपुण्णपावंसे ।
केवलकरनियरिद्धे पणमह सिद्धे सुहसमिद्धे ॥ ४ ॥

मुणिमहुयरेहिं जेसिं पिज्जइ मुहकमलवयणमयरंदे ।
सुयनाणनीरभरीए ते सूरि महद्दहे वंदे ॥ ५ ॥

कट्टुट्टियपुव्वंगे पाढयकप्पद्दुमेडियाणंगे ।
जाएमि उवज्झाए अब्भीण्णब्भप्पसज्झाए ॥ ६ ॥

पंचमहव्वयवयणे तवदाणदलियकम्ममयजूहे ।
सब्भायनायपूरियदियंतरे नमह मुणिसीहे ॥ ७ ॥

पणमह सुवण्णरयणालंकारविचित्तरूवयसणाहं ।
सयलसुहसिद्धिजणयं सिद्धंतमहानिही सययं ॥ ८ ॥

जयइ सरइंदुधवला गंगव्व सरस्सई सया जत्थ ।
पिज्जंतंपि न भिज्जइ सुयसलिलं विउसहंसेहिं ॥ ९ ॥

जन्नाणधणलवेण वि ववहरमाणा(स)यं महदरिद्दा ।
करिमो परोवयारं तेसि नमो गुरुधणेसाणं ॥ १० ॥
सोऊण जउत्तीउ वोत्तु अम्हेवि किंपि जाणामो ।
भद्दं सुहुममईणं पुव्वकईणं हवउ तेसिं ॥ ११ ॥
नमिउं नमंसणिज्जे अन्नेवि महायसे महासत्ते ।
वोछामि पत्थभूयं धम्मकहं भव्वजंतूणं ॥ १२ ॥
पुरिसत्थपायवाणं सव्वेसिमवंजबीयभूउत्ति ।
(ध)म्मो च्चेव पसथ्थो पुरिसत्थो एत्थ विन्नेउ ॥ १३ ॥
भणियं च ।
धम्मेण धणमनंतं धम्मेण नरामरिंदवरकामा ।
मोक्खोवि धुवं धम्मा लब्भइ ता उत्तमो धम्मो ॥ १४ ॥
चं(दो)गहाणं मेरू धराण चिंतामणी मणिगणाण ।
जह तह जिणवरधम्मो सिरोमणी सव्वधम्माण ॥ १५ ॥
दुरियं हरेइ वियरेइ सुहसए तुरियमेव भव्वाणं ।
सुच (इ)- - कीरंतो साहिप्पंतो य धुवमेसो ॥ १६ ॥
ता जुत्ता एय कहा ससत्तिउं हंत बुद्धिमंताणं ।
एय सवणं च निच्चं कनिच्चमेत्तो वरं जेण ॥ १७ ॥
तवसंवेगाऽमयरसवसविस- - -तविसयविससंगो ।
मुत्तिसुहंपि व पत्तो परमाणंदं लहइ सो राया ॥ १८ ॥
धम्मकहच्चिय एसा पाहन्नेणं पसंगऊ नवरं ।
कामत्थगोयरं पिहु भणियव्वं किंपि परवयणा ॥ १९ ॥
अलमेत्थ वित्थरेणं भो भो सुयणा सुणेह धम्मग ।
चरियं सुचरियरम्मं महरिसिणो पुहइचंदस्स ॥ २० ॥

**Ends:**

इय पुहइचंदमहरिसिचरियं संवेगदिव्वरसभरियं ।
मंदमइहियं कहियं फुडक्खरं थे[थो]वगंथेण ॥
एत्तो च्चिय कुथिधम्मो अप्पो अप्पो य वन्नउं एत्थ ।
अइबहुयं खु कहंगं तेहि वला वित्थरमुवेइ ॥
विविहो कहारम्मं साहिय गुरुभत्तिसारजइ(सं)मं ।
सोयव्वमिणं संमं दुलहं लहिऊण नरजम्मं ॥
केई गज्जपिया जयम्मि पुरिसा अन्नेवि पज्जत्थिणो
केई भंगसिले सयं गुरमणा अन्नेवि तक्कोड्डिणो ।
सव्वेसिंपि अणुग्गहाय रइयं संखेववित्थारउं
एयं चित्तरसं पसत्थचरियं दोण्हं मुणीणं मए ॥
आसी कुंदेंदुसुद्धे विउलससिकुले चारुचारित्तपत्तं
सूरी सेयंवराणं नरतिलयसमो सव्वदेवाभिहाणो ।
नाणासूरिप्पसाहापहियसुमहिमो कप्प - - व्व गच्छो
जाउ जुत्तो पवित्तो गुणगुरसफलो सुप्पसिद्धो जयम्मि ॥
तेसिं चासी सुयजलनिही खंतदन्तोपसन्तो-
(माया) वी सोऽमियगुणगणो नेमिचंदो मुणिंदो ।
जो विक्खाउ पुहइवलए उग्गचारी विहारी
मन्ने नो से मिहिरससिणो तेयकंतीहि तुल्ला ॥
तेसिं व सीसो पयईजडप्पा अदिट्ठपुव्विल्लविसिट्ठसत्थो ।
परोवयारेक्करसाविपज्जो जाऊ निसग्गेण कइत्तकोड्डी ॥
जो सव्वदेवमुणिपुंगवदिक्खिएहिं साहित्ततर्कसमएसु सुसिक्खिएहिं ।
संपाविउं वरपयं सिरिनेमिचंदो पुज्जेहि पक्खमुवगम्म गुणेसु भूरि ॥

– – – – – – – – – सिरिसंतिसूरिणा तेण ।
वज्जरियं वरचरियं मुणिचंदविणेयवयणाउ ॥
जइ किंचि अजुत्तं वुत्तमेत्थ मइजइरहसवि–
– – – – – – – – – – एसो हेयवं छइलेहिं ।
इगतीसाहियसोलससएहिं वासाण निव्वुए वीरे ।
कतियचरमातिहीए कित्तियरिक्खे परिसमत्तं ॥
जयइ पयइसुद्धं अंगुलीवंतवंतं
सहयसुहयगंधं भवूभिगोहजुट्टं ।
वियसियममिलाणं पावपंककमुक्कं
कयजयसरसोहं वीरपायारविंदं ॥
पृथ्वीचंद्रचरितस्यैकादशं भवग्रहणं समाप्तम् ॥ १७७ ॥
गंथसिलोगपमाणं सत्तसस्साइं पंचयसयाइं ।
इह पुहइचंदचरिए विणिच्छियं पायसो गणि(यं) ॥
सर्वाग्रं ग्रंथतः ॥ ७१०० ॥ मंगलं ॥ समाप्तं चेदं पृथ्वीचंद्रमहर्षिचरितम् ॥

कृतिः श्वेतांबारचार्यवर्याणां श्रीशांत्याचार्याणामिति ॥ स्वस्ति संवत् १११९ वर्षे आसोमासे शुक्लपक्षे पंचमीगुरौ श्रीमंडपदुर्गवास्तव्यश्रीश्रीमालीज्ञातीयसाहराजाभार्या श्राविकाधारू उत साहनाथाभार्या लाखू तया स्वश्रेयसे भर्तुः श्रेयसे च श्रुतज्ञानाराधनाय पूर्वलेखितश्रीदशवैकालिकवृत्तिभक्तामरवृत्तिअजितशांतिस्तोत्रवृत्तिनाममालासिंदूरप्रकरकर्मग्रंथषट्कवीतरागस्तोत्रविंशत्युपदेशरत्नकोशशीलोपदेशमालासंग्रहिणीव्याकरणसूत्रप्रभृतिबहुग्रंथसमया श्रीपृथ्वीचंद्रचरित्रं प्राकृतं टिप्पनकसहितं लेखयित्वा वृद्धतपापक्षगच्छनायकभट्टारकश्रीरत्नसिंहसूरिशिष्य श्रीउदयवल्लभसूरिश्रीज्ञानसागरसूरिभ्यो वाचनाय प्रदत्तम् ॥

सूर्याचंद्रमसौ यावद् द्योतयेते महीतलम् ।
जयतात्पुस्तकं तावद्वाच्यमानं मुनिव्रजैः ॥ १ ॥

---

**No. 74. Santinathacharitra,** by AJITAPRABHASURI [ शान्तिनाथचरित्रम्—अजितप्रभसूरिः ].

Ends:

इत्याचार्यश्रीअजितप्रभसूरिविरचिते द्वादशभववर्णनो नाम षष्ठः प्रस्तावः॥
श्रीशांतिनाथचरित्रं समाप्तम् ॥
श्रीजंबुप्रभवौ सुधर्मगणभृच्छिष्यावभूतां पुरा
श्रीशय्यंभवनामको भुवि यशोभद्रस्ततो विश्रुतः ।
संभूतः प्रभुभद्रबाहुरभवच्छ्रीस्थूलभद्रस्ततो
जाता आर्यमहागिरिप्रभृतयः श्रीवज्रसूरिस्तथा ॥ १ ॥
श्रीवज्रसेनाख्यगुरोः प्रवृत्ताः शाखाश्चतस्रः सुतरोरिवोर्व्याम् ।
तासां च मध्ये वरचंद्रशाखा विशेषतः शिष्यफलान्विताऽभूत् ॥ २ ॥
मिथ्यात्वकुंभिविजये सिंहवच्चारुविक्रमः ।
श्रीमद्विजयसिंहाख्यस्तत्रसूरिवरोऽभवत् ॥ ३ ॥
चंद्रावत्यां नवगृहे स चैत्ये निवसन्नपि ।
जज्ञे चारित्रपूतात्मा विद्याशक्तिसमन्वितः ॥ ४ ॥
रम्योपदेशमालाया वृत्तेर्व्याख्यां प्रकुर्वतः ।
विरागाच्चैत्यवासस्य तस्याभूत् शुभचेतसः ॥ ५ ॥
श्रीचंद्रप्रभसूरीणां समीपे सोऽवसद्गुरुः ।
आगमोक्तक्रियां कर्तुं पूर्णिमापक्षमाश्रितः ॥ ६ ॥
तस्य श्रीविजयसिंहसूरेः शिष्योऽभवद्वरः ।
भुवि ख्यातोऽभयदेवसूरिः साधुक्रियापरः ॥ ७ ॥

तादृशि कलिकालेऽपि विदधे तेन सत्क्रिया ।
यथा देवागमस्तस्य पंचत्वे समजायत ॥ ८ ॥
ताच्छिष्यः सत्कलापात्रं राकापक्षकृतोदयः ।
श्रीचंद्रसूरिरित्यासीच्छ्रीचंद्रसदृशो भुवि ॥ ९ ॥
तस्य शिष्यो गिरामीशो नित्यं सुखविहारभृत् ।
श्रीदेवसूरिनामाऽभूत् देवसूरिरिवावनौ ॥ १० ॥
देवसूरिगुरोः शिष्या विख्याताः पृथिवीतले ।
जयंति गुरवः श्रीमत्तिलकप्रभसूरयः ॥ ११ ॥
सुभाषितावली रम्या यैश्चक्रे सुकविप्रिया ।
विदधे नीतिशास्त्रं च चाणक्यमिव नूतनम् ॥ १२ ॥
स्तुतिस्तोत्रादिरचना विचित्रा विहिता यकैः ।
दीक्षिता पाठिताश्चापि यैरनेके च साधवः ॥ १३ ॥
तैराचार्यपदे स्वीयौ सुशिष्यौ विनिवेशितौ ।
गुरुगच्छानसो भारकर्षणे धुर्यकाविव ॥ १४ ॥
मोहराजचमुर्येन सबला लीलया जिता ।
स श्रीवीरप्रभः सूरिराद्योऽनेकगुणास्पदम् ॥ १५ ॥
स्वकीयप्रभया भव्यचकोरानंददायकः ।
यथार्थनामा श्रीसोमप्रभसूरिर्द्वितीयकः ॥ १६ ॥
श्रीवीरप्रभसूरीणां तेषां शिष्यलवोऽस्म्यहम् ।
सविशेषकलाभ्यासं बृहत्पूज्यैश्च कारितः ॥ १७ ॥
श्रीवीरप्रभसूरीणां पदेऽहं स्थापितोस्म्यहम् ।
कृत्वा प्रसादं पूज्यैः श्रीतिलकप्रभसूरिभिः ॥ १८ ॥
भावनासारसच्छास्त्रं सामान्येन कृतं मया ।
इह सूरिपदस्थेन श्रीशांतेश्वरितं तथा ॥ १९ ॥

छंदोऽलंकारहीनं च यच्च लक्षणदूषितम् ।
रभसादज्ञानतोवा किंचनात्र विनिर्म्मितम् ॥ २० ॥
तत्सर्वं कोविदैरर्हैर्गुरुभिश्च शुभाशयैः ।
संशोधनीयं यत्नेन विधायानुग्रहं मयि ॥ २१ ॥ युग्मम् ॥
॥ ग्रंथाग्रं ॥ ६०११ ॥
त्रयोदशाष्टशतेष्वतिक्रांतेषु विक्रमात् ।
वर्षे सप्तोत्तरे वैशाखस्य पक्षे च निर्म्मले ॥ २२ ॥ – – –

संवत् १३८४ वर्षे श्रावणशुदि द्वितीयायां शनौ श्रीशांतिनाथचरितं श्रीनरदेवसूरीणां शिष्येण क्षु० धर्मेण लिखितम् ॥

---

**No. 75. Upadesamalavritti,** by RATNAPRABHA [उपदेशमालावृत्तिः—रत्नप्रभः].

Leaves 1 to 247. Dated Samvat 1394 = A. D. 1338.

इति रत्नप्रभसूरिविरचितायां दशम – – – – चतुर्थो विश्रामः ॥ ६१३ ॥
नानारूपनरोत्तमैकवसतिर्नीरोगतासंततिः
पातालं परितः स्फुरन्निह बृहद्गच्छोऽस्ति – – – – ।
स श्रीम – – बुधसूरिषु गुरुस्तत्राभवद्भूरिभिः
शाखाभिर्भुवि यः प्रयागवटवद्विस्तारमुद्रामगात् ॥
साहित्यतर्कागमलक्षणेषु यद्ग्रंथवीथीकविकामधेनुः ।
कस्योपकारं न चकार सम्यक् निःशेषदेशेषु च यद्विहारः ॥
शिष्यः श्रीमुनिचंद्रसुरिगुरुभिर्गीतार्थचूडामणिः
पट्टे स्वे विनिवेशितस्तदनु स श्रीदेवसूरिः प्रभुः ।
जयसिंघदेवनृपते – – – – – – – – –
स्त्रीनिर्वाणसमर्थनेन विजयस्तंभः समुत्तंभितः ॥

तत्पट्टप्रभवोऽभवन्नवगुणग्रामाभिरामोदयाः
श्रीभद्रेश्वरसूरय – – – – स्तन्मानसप्रीतये ।
श्रीरत्नप्रभसूरिभिः शुभकृते श्रीदेवसूरिप्रभोः
शिष्यैः सेयमकारि सन्मदकृते वृत्तिर्विशेषार्थिनाम् ॥
श्रीदेवसूरिशिष्यभ्रातॄणां विजयसेनसूरीणाम् ।
आदेशस्यानृणभावमगममेतावताहमिह ॥
यदियमुपदेशमाला श्रावकलोकस्य मूलसिद्धांतः ।
प्रायेणं – – – – – तदिहास्माभिः कृतो यत्नः ॥
व्याख्यातृचूडामणिसिद्धनाम्ना प्रायेण गाथार्थ इहाऽप्यधायि
क्वचित्क्वचिच्चानु विशेषरेखा साद्भिः स्वयं सा परिभावनीया ॥
यदिह किंचिदनागमिकं क्वचिद्विरचितं मतिमंदतया मया ।
तदखिलं सुधियः क्षमयामि वः कृतकृपाः परिशोधयतादरात् ॥
प्राग्य परस्य च सूत्राद्वृत्तिर्विस्तारिताथवा स्वीया ।
मणिखंडमंडलैरिव सुवर्णपूजा जिनेंद्राणाम् ॥
प्रकृता समर्थिता च श्रीवीरजिनाग्रतो भृगुपुरेऽसौ ।
अश्वावबोधतीर्थे श्रीसुव्रतपर्युपास्तिवशात् ॥
संशोधिता तथा श्रीभद्रेश्वरसूरिमुख्यविबुधवरैः ।
पुनरपि कंटकशुद्धिः कार्या वः प्रार्थये सर्वान् ॥
भास्वद्भास्करबिंबकांततिलकं प्रक्षिप्त – – – कृतं
निर्यन्नीलशिलातलांशुपटलीदुर्व्वारदूर्वांकुरम् ।
यावन्मेरुमहीभृतं प्रतिकरोत्यारात्रिकोत्तारणं
ताराभिर्भुविलासिनी विजयतां तावन्नवैषा कृतिः ॥
विक्रमाद्वसुलोकार्के१२३८वर्षे माघे समर्थिता ।
एकादश सहस्राणि सार्द्धं पंचशतं तथा ॥ ११५५० ॥

संवत् १३९४ वर्षे कार्तिकसुदि प्रतिपदायां शुक्रे श्रीयुगादिचैत्यमंडिते मडवाडाग्रामे श्रीउपदेशमालावृत्तिः सुगुरुश्रीसर्वदेवसूरिवाचनाक्रियायोग्या पं०अभयकलसेन लिषिता ॥ शुभमस्तु ॥

---

**No. 76. Gurustuti,** by DHARMAPRABHASURI [गुरुस्तुतिः-धर्मप्रभसूरिः].

जज्ञे वीरजिनात्सुधर्म्मगणभृत्तस्माच्च जंबूस्ततः
संख्यातेषु गतेषु सूरिषु भुवि श्रीवज्रशाखाभवत् ।
तस्यां चंद्रकुलं मुनींद्रविपुलं तस्मिन् बृहद्गच्छता
तत्राभूद्यशसा प्रसादितककुभ् श्रीसर्वदेवप्रभुः ॥ १ ॥
श्रीनेमिचंद्राभिधसूरिरस्मात् जज्ञे जगन्नेत्रचकोरचंद्रः ।
चारित्रलक्ष्मीललितांगहारः पौरोपचारोरुशुभानुकारः ॥ २ ॥
वादींद्रः कविपुंगवैकतिलकः साक्षात्रिलोकीसरः-
क्रोडक्रीडदशेषसज्जनमहो चारित्रचूडामणिः ।
नंद्यादद्भुतभाजनं स भगवान् श्रीशांतिसूरिप्रभुः
पृथ्वीचंद्रचरित्रसत्रमकरोद्यो विश्वदत्तोत्सवः ॥ ३ ॥
श्रीमन्महेंद्रो विजयाख्यसिंहो देवेंद्रचंद्रः शुचिपद्मदेवः ।
श्रीपूर्णचंद्रो जयदेवसूरिर्हेमप्रभो नाम जिनेश्वरश्च ॥ ४ ॥
सिद्धश्रावककारिते निरुपमे श्रीनेमिचैत्ये पुरा
पूज्यैरष्टगणेश्वरा निजपदे संस्थापयांचक्रिरे ।
श्रीमत्पिप्पलगच्छनायकतया विज्ञाय होराबलं
विख्याता भुवि शांतिसूरिगुरवः कुर्वंतु वो मंगलम् ॥ ५ ॥
चक्रेश्वरी यस्य पुपोष पूजां सिद्धोऽभवद् यस्य गिरा नमस्यः ।
श्रीवृक्षगच्छांबरसप्तसप्तिः श्रीशांतिसूरिः सुगुरुर्बभूव ॥ ६ ॥

तदनु मदनहंता शासनोद्योतकारी जयति विजयसिंहः सूरिभूरिप्रतिष्ठः ।
सबलकलिविघातं संयमासिप्रहारैरकृत सुकृतपात्रं भव्यकोकैकभानुः ॥७॥
तत्पट्टपंकेरुहराजहंसः श्रीदेवभद्रो गुणभृत् रराज ।
उवास यः सज्जनमानसेषु निर्दूषणं खेलितशुद्धपक्षः ॥ ८ ॥
तदंतरं निर्जितमोहमल्लः श्रीधर्म्मघोषः सुगुरुर्गरीयान् ।
संसारपूरेण तु नीयमानं ररक्ष यो धार्मिकलोकमेकम् ॥ ९ ॥
सचंद्रसूर्याविव तस्य पट्टे बभूवतुर्द्वौ जयिनौ गणेशौ ।
श्रीसीलभद्रः प्रथमः प्रवीणः सूरिस्ततः श्रीपरिपूर्णदेवः ॥ १० ॥
विजयसेनगुरुस्तदनंतरं विजयते वसुधातलमंडनः ।
निविडकर्म्मरिपून्समसायकैरपजहार विकारविरागवान् ॥ ११ ॥
भवत्रयं यो कलयांचकार ज्ञानोदधिर्गौतमवन्निजस्य ।
नरेंद्रसामंतसहस्रवंद्यः श्रीधर्म्मदेवो जयताद्गणेशः ॥ १२ ॥
– – – – – वृतस्य पक्षः चतुर्दशीपक्षविचारदक्षः ।
समग्रसिद्धांतविलासवेदी श्रीधर्म्मचंद्रो जयताद्गणेशः ॥ १३ ॥
तत्पट्टशैलेंद्रमृगेंद्रतुल्यः श्रीधमरत्नः सुगुरुश्चकास्ति ।
महाव्रतैः पंचभिरेव योसौ पंचाननत्वं बिभरांबभूवे ॥ १४ ॥
तत्पट्टपूर्वगिरिराजपदप्रकाशी ज्ञानोदधिर्भविकसत्मशिरोविकाशी ॥
पापांधकारतरणिर्मददर्पहंता श्रीधर्मयुक्तिलकसूरिगुरुर्बभूव ॥ १५ ॥
तत्पट्टे श्रीधर्मसिंहः कविकरटमदारंभसंभेददक्षो
मुख्यो मोक्षार्थिनां यश्छमदमकरुणाराशिरासीत्स नूनम् ॥
भूरिज्ञाने निवासी बुधजनमनसि प्राप्तवासः सदा यः
सर्वज्ञार्हत्प्रणामप्रणतहृदयः सद्गुरुपास्ति संस्थः ॥ १६ ॥
धर्मप्रधानः स च विश्वलोके धर्मप्रभः सूरिरितोदयः स्यात् ।
चिकित्सया यो क्रिययापि रोगान् बाह्यांतरंगान् बहुशो निहंति ॥ १७ ॥

स्तुतिं गुरूणां सुगुणैर्गुरूणां दिनोदये यः पठति प्रमोदात् ।
तस्यानिशं भक्तितरंगभाजो लक्ष्मीर्विशाला परिरंभणी स्यात् ॥ १८ ॥
इति श्रीगुरुस्तुतिः समाप्ता ॥

---

**No. 77. Antarangasandhi,** by Ratnaprabha [अन्तरङ्गसंधिः—रत्नप्रभः].

Leaves 1 to 12; 15 inches long, 2 inches broad. Dated Samvat 1392 = A. D. 1336.

Begins:

पणमवि दुहखंडण करियविहंडण जगमंडण जिणसिद्धिट्ठिय ।
मुणिकण्णरसायणु गुणगणभायणु अंतरंगमुणिसंधिजिय ॥ १ ॥

Ends:

जिणरज्जिउ विउ नियपढमपुत्तु अवरोविहु भुवनिवपइनिउत्तु ।
अप्पणिजो पत्तउ सिद्धिट्ठामि सो संघह मंगलु दिसउ सामु ॥ १६ ॥

इय अंतरंगसुवियारसंधि चिंतंतु न बज्झइ कंमबंधि ।
सुहझाणह चित्तह करइं संधि तिणि कारणि भणीय इह संधि ॥ १७ ॥

अहिअंतहकारणु विसउत्तारणु जंगुलिमंत ह पढणु जिम ।
कयसिवसुहसंधिहि पहसुसंधिहि चिंतणु जाणउ भविय तिम ॥ १८ ॥

इति अंतरंगसंधिः समाप्तः ॥ इति नवमोऽधिकारः ॥ संवत् १३९२ वर्षे आषाढसुदि २ गुरौ ॥ ग्रंथाग्रं श्लोक २०६ श्रीधर्मप्रभसूरिरत्नप्रभकृतिरियम् ॥

---

**No. 78. Jitakalpachurni, with the Commentary of** SRICHANDRASURI, [जीयकप्पचूण्णी तस्या एव वृत्तिः— श्रीचन्द्रसूरिः].

Leaves 1 to 110; 11 inches long, 2½ inches broad. Deted Samvat 1284 = A. D. 1228.

Churni begins:

सिद्धत्थसिद्धसासण सिद्धत्थसुयं सुयं च सिद्धत्थस्स ।
वीरवरं वरवरदं वरचरएहिं महियं नमह जीवहिय ॥ १ ॥

Churni ends:

पावणं परमहियं जिणभद्दखमासमणं नित्थयसुत्तत्थदायगामलचरणं ।
तमहं वंदे पयऊ परमं परमोवगारकारिणमहग्घं ॥
जीयकप्पचुण्णी समत्ता ॥ ग्रंथाग्रं १३०० ॥ मंगलं महाश्रीः ॥
ॐ नमो वीतरागाय ॥
नत्वा श्रीमन्महावीरं स्वपरोपकृतिहेतवे ।
जीतकल्पबृहच्चूर्णेर्व्याख्या काचित्प्रकाश्यते ॥ १ ॥

Commentary ends:

अमलचरणश्च । तं इति जीतकल्पचूर्णिविषया व्याख्या समाप्ता ॥
जीतकल्पबृहच्चूर्णेर्व्याख्या शास्त्रानुसारतः ।
श्रीचंद्रसूरिभिर्दृब्धा स्वपरोपकृतिहेतवे ॥ १ ॥
मुनिनयनतरणिवर्षे श्रीवीरजिनस्य जन्मकल्याणे ।
प्रकृतग्रंथकृतिरियं निष्पत्तिमवाप रविवारे ॥ २ ॥
संघचैत्यगुरूणां च सर्वार्थप्रविधायिनः ।
वशाभयकुमारस्य वसतौ दृब्धा सुबोधकृत् ॥ ३ ॥
एकादशशतविंशत्यधिकश्लोकप्रमाणग्रंथाग्रम् ११२० ।
ग्रंथकृतिप्रविवाच्या मुनिपुंगवसूरिभिः सततम् ॥ ४ ॥

यदिहोत्सूत्रं दब्धं छद्मस्थबुद्धिना च मया ।
तन्मयि कृपानुकलितैः शोध्यं गीतार्थविद्वद्भिः ॥

ग्रंथाग्रं ११२० ॥ समाप्ता चेयं श्रीशीलभद्रप्रभुश्रीधनेश्वरसूरिपादपद्मचंचरीकश्रीश्रीचंद्रसूरिसंरचिता जीतकल्पबृहच्चूर्णिदुर्गपदविषया निशीथादिशास्त्रानुसारतः । संप्रदायाच्च सुगमा व्याख्येति ॥

यावल्लवणोदन्वान् यावन्नक्षत्रमंडितो मेरुः ।
खे यावच्चंद्रार्कौ तावदियं वाच्यतां भव्यैरिति ॥

संवत् १२८४ वर्षे फाल्गुनवदि ७ सोमे मंगलं महाश्रीः ॥ शुभं लेखकपाठकयोः ॥

शुभ्रांशुर्भुवि वस्तुपालसचिवस्यागोस्य चंद्रातप-
स्तेनोन्मीलितमर्थिकैरवकुले यत्तु श्रियस्तांडवम् ।
तस्याः पादतलप्रपातरभसोड्डीनैरिवोड्डामरै-
स्तेनातस्तरिरे तरंगितयशःकिंजल्कजालैर्दिशः ॥ ३७ ॥

विश्वेऽस्मिन् कस्य चेतो हरति नहि समुल्लास्य विश्वासमुच्चैः
प्रौढश्वेतांशुरोचिःप्रचयसहचरी वस्तुपालस्य कीर्तिः ।
मन्ये तेनेयमारोहति गिरिषु भिया लीयते गह्वरेषु
स्वर्गोत्संगानुपास्ते भजति जलनिधिं याति पातालमूलम् ॥ ३८ ॥

एतेभ्यः प्रभुणा सगौरवमहं तावत्प्रदाना [दत्ता] परं
देशं देशममी भ्रमंति तदहं गच्छाम्यमीभिः समम् ।
नो चेत्क्वाप्यपरा मिलिष्यति वधूस्तत्रेति भीत्या ध्रुवं
कीर्तिर्यस्य गुणानुपासाति सदा श्रीवस्तुपालः कृती ॥ ३९ ॥

सोयं धात्रीवलयगिरिको वस्तुपालोऽचलेंद्र-
स्तस्मादाविर्भवति समरे कोपि दोःस्फूर्तिरेणुः ।

**No. 78. Jitakalpachurni, with the Commentary of** SRICHANDRASURI, [जीयकप्पचूण्णी तस्या एव वृत्तिः— श्रीचन्द्रसूरिः].

Leaves 1 to 110; 11 inches long, 2½ inches broad. Deted Samvat 1284 = A. D. 1228.

Churni begins:

सिद्धत्थसिद्धसासण सिद्धत्थसुयं सुयं च सिद्धत्थस्स ।
वीरवरं वरवरदं वरचरएहिं महियं नमह जीवहिय ॥ १ ॥

Churni ends:

पावणं परमहियं जिणभद्दखमासमणं नित्थयसुत्तत्थदायगामलचरणं ।
तमहं वंदे पयऊ परमं परमोवगारकारिणमहग्घं ॥
जीयकप्पचुण्णी समत्ता ॥ ग्रंथाग्रं १३०० ॥ मंगलं महाश्रीः ॥
उँ नमो वीतरागाय ॥
नत्वा श्रीमन्महावीरं स्वपरोपकृतिहेतवे ।
जीतकल्पबृहच्चूर्णेर्व्याख्या काचित्प्रकाश्यते ॥ १ ॥

Commentary ends:

अमलचरणश्च । तं इति जीतकल्पचूर्णिविषया व्याख्या समाप्ता ॥
जीतकल्पबृहच्चूर्णेर्व्याख्या शास्त्रानुसारतः ।
श्रीचंद्रसूरिभिर्दृब्धा स्वपरोपकृतिहेतवे ॥ १ ॥
मुनिनयनतरणिवर्षे श्रीवीरजिनस्य जन्मकल्याणे ।
प्रकृतग्रंथकृतिरियं निष्पत्तिमवाप रविवारे ॥ २ ॥
संघस्चैत्यगुरूणां च सर्वार्थप्रविधायिनः ।
वशाभयकुमारस्य वसतौ दृब्धा सुबोधकृत् ॥ ३ ॥
एकादशशतविंशत्यधिकश्लोकप्रमाणग्रंथाग्रम् ११२० ।
ग्रंथकृतिप्रविवाच्या मुनिपुंगवसूरिभिः सततम् ॥ ४ ॥

यदिहोत्सूत्रं दब्धं छद्मस्थबुद्धिना च मया ।
तन्मयि कृपानुकलितैः शोध्यं गीतार्थविद्वद्भिः ॥

ग्रंथाग्रं ११२० ॥ समाप्ता चेयं श्रीशीलभद्रप्रभुश्रीधनेश्वरसूरिपादपद्मचंच-रीकश्रीश्रीचंद्रसूरिसंरचिता जीतकल्पबृहच्चूर्णिदुर्गपदविषया निशीथादि-शास्त्रानुसारतः । संप्रदायाच्च सुगमा व्याख्येति ॥

यावल्लवणोदन्वान् यावन्नक्षत्रमंडितो मेरुः ।
खे यावच्चंद्रार्कौ तावदियं वाच्यतां भव्यैरिति ॥

संवत् १२८४ वर्षे फाल्गुनवदि ७ सोमे मंगलं महाश्रीः ॥ शुभं लेखक-पाठकयोः ॥

शुभ्रांशुर्भुवि वस्तुपालसचिवस्यागोस्य चंद्रातप-
स्तेनोन्मीलितमर्थिकैरवकुले यत्तु श्रियस्तांडवम् ।
तस्याः पादतलप्रपातरभसोड्डीनैरिवोड्डामरै-
स्तेनातस्तरिरे तरंगितयशःकिंजल्कजालैर्दिशः ॥ ३७ ॥
विश्वेऽस्मिन् कस्य चेतो हरति नहि समुल्लास्य विश्वासमुच्चैः
प्रौढश्वेतांशुरोचिःप्रचयसहचरी वस्तुपालस्य कीर्तिः ।
मन्ये तेनेयमारोहति गिरिषु भिया लीयते गह्वरेषु
स्वर्गोत्संगानुपास्ते भजति जलनिधिं याति पातालमूलम् ॥ ३८ ॥
एतेभ्यः प्रभुणा सगौरवमहं तावत्प्रदाना [दत्ता] परं
देशं देशममी भ्रमंति तदहं गच्छाम्यमीभिः समम् ।
नो चेत्क्वाप्यपरा मिलिष्यति वधूस्तत्रेति भीत्या ध्रुवं
कीर्तिर्यस्य गुणानुपासाति सदा श्रीवस्तुपालः कृती ॥ ३९ ॥
सोयं धात्रीवलयगिरिको वस्तुपालोऽचलेंद्र-
स्तस्मादाविर्भवति समरे कोपि दोःस्फूर्तिरेणुः ।

यस्यां मग्नाः प्रतिवसुमतीवल्लभानां समंता-
संपद्यंते खलु पुनरनावृत्तये कीर्त्तयस्ताः ॥

---

**No. 79. Jitakalpasutra, with the commentary of** TILAKA-CHARYA [जितकल्पवृत्तिः—तिलकाचार्यः].

Leaves 1 to 105; 13 inches long, 2 inches broad.

Commentary begins:

ओंनमः श्रीपंचपरमेष्ठिभ्यः ॥

वंदे वीरं तपोवीरं तपसा दुस्तपेन यः ।
शुद्धं स्वं विदधे स्वर्णं स्वर्णकार इवाग्निना ॥ १ ॥

जिनप्रवचनं नौमि नवं तेजस्विमंडलम् ।
यतो ज्योतींषि धावंति हंतुमंतर्गतं तमः ॥ २ ॥

निष्प्रत्यूहं प्रणिदधे भव [वा] नीतनयानहम् ।
सर्वानपि गणाध्यक्षानक्षमोदरसंगतान् ॥ ३ ॥

जिन (भद्र) गणिं स्तौमि क्षमाश्रमणमुत्तमम् ।
यः श्रुताज्जीतमुदध्रे शौरिः सिंधोः सुधामिव ॥ ४ ॥

प्रणमाम्यात्मगुरूंस्तान् घनसारशलाकयेव यद्वाचा ।
अज्ञानतिमिरपूरितमुद्घटितमांतरं चक्षुः ॥ ५ ॥

इति मुनिकृतसुकृतः श्रुतरहस्य कल्पस्य जीतकल्पस्य ।
विवरणलवं करिष्ये स्वस्मृतिबीजप्रबोधाय ॥ ६ ॥

Commentary ends:

शुद्ध्यतः सिध्यतश्चेति ।
इति श्रीश्रीतिलकाचार्यविरचितजीतकल्पवृत्तिः ॥

श्रीमांश्चंद्रप्रभः सूरिर्युगप्राधान्यभागभूत् ।
तदासनमलंचक्रुः श्रीधर्मघोषसूरयः ॥ १ ॥
तत्पट्टश्रीभुजोऽभूवन् श्रीचक्रेश्वरसूरयः ।
श्रीशिवप्रभसूरिस्तत्पट्टश्रीहारनायकः ॥ २ ॥
तदीयशिष्यलेशोहं सूरिः श्रीतिलकाभिधः ।
अनन्यसमस्त [सौ]रम्यश्रुतांभोजमधुव्रतः ॥ ३ ॥
इमामी [पी] दृग्विधा चूर्णिः तस्याश्चोपनिबंधतः ।
गुरूणां संप्रदायाच्च विज्ञायार्थं स्वशक्तितः ॥ ४ ॥
अकार्षं जीतकल्पस्य वृत्तिमत्यल्पधीरपि ।
सा विशोध्या श्रुतधरैः सर्वैर्मयि कृपापरैः ॥ ५ ॥
वृत्तिं रचयता चैतां यन्मया सुकृतं कृतम् ।
भवे २ हं तेन स्यां श्रुताराधनलालसः ॥ ६ ॥
शतद्वादशकेऽब्दानां गते विक्रमभूभुजः ।
विहिता स्वहितार्थेयं चतुःसप्तत [ति] वत्सरे ॥ ७ ॥
सहस्रमेकं श्लोकानामधिकं सप्तभिः शतैः ।
प्रत्यक्षरेण संख्याय मानमस्यां विनिश्चितम् ॥ ८ ॥
यावद्विजयते तीर्थं श्रीमद्वीरजिनेशितुः ।
असौ सन्मानसे तावत्कलहंसीव खेलतु ॥९॥

Sutra begins :

सिरिवीरजिणं नमिउं पच्छित्तं सावयाण वुच्छामि ।
वीमंसिऊण बहुसो समायारउं विविहाउं ॥ १ ॥

Sutra ends :

इति जीतकल्पसूत्रं समाप्तमिति ॥
बभूव लक्ष्मणः श्राद्धः सपूना तस्य गेहिनी ॥

सिंहनामा तयोः पुत्रो शंभूनाम्नी च पुत्रिका ॥ १ ॥
सिंहसूनुर्यशोदेवः सतुकाकुक्षिभूः स च ।
पुस्तिकां जीतकल्पस्य श्रेयसेलेखयत्पितुः ॥ २ ॥

---

**No. 80. Dharmaratnalaghuvritti,** by Santisuri [धर्मरत्नलघुवृत्तिः—शान्तिसूरिः].

Leaves 1 to 171; 16½ inches long, 1½ inches broad. Dated Samvat 1271 = A.D. 1250.

Begins:

नमः सर्वज्ञाय ।
सिद्धं सर्वज्ञमानम्य वक्ष्ये सङ्क्षेपतः स्फुटम् ।
विवृतिं धर्मरत्नस्य मन्दबुद्धिप्रबुद्धये ॥ १ ॥

Ends:

नमः श्रीवर्द्धमानाय सर्वशास्त्रार्थभाषिणे ।
वर्तमानस्य तीर्थस्य नायकाय महात्मने ॥
इति सिद्धान्तसंग्रहभूषा भव्यजनहिता धर्मरत्नवृत्तिः समाप्ता ॥
चन्द्रकुलाम्बररविभिः परोपकारैकरसिकचेतोभिः ॥
श्रीशान्तिसूरिभिरियं बुधप्रिया विरचिता वृत्तिः ॥
संवत् १२७१ वैशाखसुदि ९ गुरौ वारे प्रमिते दिवसे ॥

---

**No. 81. Sangrahinivivritti,** by Purnabhadra [संग्रहिणीविवृतिः—शलिभद्रः].

Leaves 1 to 257; 14 inches long, 1½ inches broad.

Ends:

संग्रहिणीविवृतिमिमां कृत्वा यदवापि पुण्यमत्र मया ।
तेनागमसंग्रहिणीप्रवणोऽस्तु सदैव भव्यजनः ॥

थारापद्रपुरीयगच्छनलिनीखण्डैकचण्डद्युतिः
सूरिः पंडितमूर्धमंडनमणिः श्रीशीलभद्राभिधः ।
आसीत्तस्य विनेयतामुपगतः श्रीपूर्णभद्राह्वय-
स्तेषां शिष्यलवेन मंदमतिना वृत्तिः कृतेयं स्फुटा ॥
एकादशवर्षशतैर्नवाधिकैस्त्रिंशकैर्याते
विक्रमतोऽरचयादिमां सूरिः श्रीशीलभद्राख्यः ॥
सहस्रद्वितयं सार्धं ग्रंथोऽयं पिंडितोऽखिलः ।
द्वात्रिंशदक्षरश्लोकप्रमाणेन सुनिश्चितः ॥

शुभं भवतु ॥

---

**No. 82. Pratyakhyanavicharana,** by SALISURI [पच्चक्खाणवियारण—सालिसूरि].

Leaves 1 to 23; 14 inches long, $1\frac{1}{2}$ inches broad.

Begins:

ॐनमः सरस्वत्यै ॥

केवलपच्चक्खेणं पच्चक्खसमत्थवत्थुवित्थारं ।
पच्चक्खं जोईणं सिरिवीरजिणेसरं नमिउं ॥ १ ॥
वोच्छं पच्चक्खाणे वियारणं समयतंतजुत्तीए ।
सपरोवयारहेउं दाराणुगयं समासेणं ॥ २ ॥

Ends:

पच्चक्खाणवियारणामयं सिरिसालिसूरिणा रइयं ।
जं एत्थ किंपि वितहं तं गीयत्था विसोहिंतु ॥ २३७ ॥

---

**No. 83. Prasamarati,** by Umasvati [प्रशमरतिः—उमास्वातिः].

**Leaves 1 to 49; 14 inches long, 2 inches broad.**

**Begins:**

नाभेयाद्याः सिद्धार्थराजसूनुचरमाश्चरमदेहाः ।
पंच नव दश च दशविधधर्मविधिविदो जयंति जिनाः ॥
जिनसिद्धाचार्योपाध्यायान् प्रणिपत्य सर्वसाधूंश्च ।
प्रशमरतिस्थैर्यार्थं वक्ष्ये जिनशासनात्किञ्चित् ॥

**Ends:**

आचार्यस्य श्रीउमास्वातिवाचकस्य कृतिरिदं प्रशमरतिनामप्रकरणं समाप्तम् ॥

---

**No. 84. A Manuscript containing,**

1. **Chhandonusasanavritti,** by Hemachandra [छन्दोनुशासनवृत्तिः—हेमचन्द्रः].

2. **Kavyanusasanavritti,** by Hemachandra [काव्यानुशासनवृत्तिः—हेमचन्द्रः].

**Leaves 1 to 123 and 124 to 252; 17 inches long, 2½ inches broad.**

**Dated Samvat 1390 = A.D. 1334.**

**Chhandonusasanavritti begins:**

॥ अर्हं ॥ शब्दानुशासनविरचनानंतरं तत्फलभूतं काव्यमनुशिष्य तदंगभूतं छंदोनुशासनमारिप्समानः शास्त्रकार इष्टाधिकृतदेवतानमस्कारपूर्वकमुपक्रमते ॥

वाचं ध्यात्वार्हतीं सिद्धशब्दकाव्यानुशासनम् ।
काव्योपयोगिनां वक्ष्ये छंदसामनुशासनम् ॥
अर्हद्भिः कृता, कृत इत्यगार्हती, वाक् द्वादशांगगणिपिटकम् ॥

**Ends:**

प्रस्तारादिवर्णनो नामाष्टमोध्यायः समाप्तः ॥ संपूर्णं छंदोनुशासनमिति ॥

**Kavyanusasanavritti begins:**

प्रणम्य परमात्मानं निजं काव्यानुशासनम् ।
आचार्यहेमचंद्रेण विद्वत्प्रीत्यै प्रतन्यते ॥ १ ॥

**Ends:**

महाकाव्यवदाख्यायिकाकथाचंपूष्वपि द्रष्टव्यः । इत्याचार्यश्रीहेमचंद्रविरचितायां अलंकारचूडामणिसंज्ञस्वोपज्ञकाव्यानुशासनवृत्तौ अष्टमोध्यायः समाप्तः ॥ श्लोकसंख्या ग्रंथ २८०० सं० १२९० वर्षे चैत्रसुदि २ सोमे श्रीस्तंभतीर्थे लिखितमस्ति ॥

---

**No. 85. Pratyekabuddhacharitra** [प्रत्येकबुधचरित्रम्].

Leaves 1 to 208; 17 inches long, 2 inches broad. Dated Samvat 1398 = A.D. 1342.

**Begins:**

ॐ नमो वीतरागाय ॥

करकंडु कलिंगेसु पंचालेसु य दुम्मुहो ।
नमीराया विदेहेसु गंधारेसु य नग्गई ॥ १ ॥

**Ends:**

१४१ इति दाणविषये धणदेवधणदत्तकथा समत्ता ॥ मंगलं महाश्रीः ॥ संवत् १३९८ वर्षे पौषशुदि ७ सोमे कथाद्वयं लिखितम् ॥

---

**No. 86. Sabdanusasanavritti** by, HEMACHANDRA [शब्दानुशासनवृत्तिः—हेमचन्द्रः].

Leaves 1 to 385; 16 inches long, 4 inches broad. Dated Samvat 1297 = A.D. 1241.

**Ends:**

शास्त्रप्रवृत्तिरिति ॥

इत्याचार्यश्रीहेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ सप्तमस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ सप्तमोध्यायः समाप्तः ॥

क्षितिधर भवदीयक्षीरधाराचलक्ष्मैः
रिपुविजययशोभिः श्वेत एवासिदंडः ।
किमुत कवलितैस्तैः कज्जलैर्मौल्वीनां
परिणतमहिमानं कालिमानं तनोति ॥ १ ॥

संवत् १२९७ वर्षे कार्तिकवदि ११ रवौ तद्धितबृहद्वृत्तिपुस्तिका लिखितेति ॥

भग्नपृष्टिकटिग्रीवा ऊर्ध्वदृष्टिरधोमुखम् ।
कष्टेन लिखितं शास्त्रं यत्नेन प्रतिपालयेत् ॥
यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
शुभं भवतु मंगलं महाश्रीः ॥

**No. 87. A Manuscript containing,**

1. **Atmasambodhakulaka** [आत्मसंबोधकुलकम्],
2. **Svajivanusasanakulaka** [स्वजीवानुशासनकुलकम्],
3. **Kshamanakulaka** [क्षामणाकुलकम्],
4. **Aradhanakulaka** [आराधनाकुलकम्],
5. **Bhaktamarastotra**, by MANATUNGA [भक्तामरस्तोत्रम्—मानतुङ्गः],
6. **Mangalashtaka**, by DHARMASURI [मङ्गलाष्टकम्—धर्मसूरिः],
7. **Gautamaprichchha** [गौतमपृच्छा],
8. **Dharmalakshana** [धर्मलक्षणम्],
9. **Prasnottararatnamala** [प्रश्नोत्तररत्नमाला],
10. **Samitiprakarana** [समितिप्रकरणम्],
11. **Mahabhayaharaparsvanathastava** [महाभयहरपार्श्वनाथस्तवः],
12. **Danasilatapobhavanakulaka** [दानशीलतपोभावनाकुलकम्],
13. **Mithyatvakulaka** [मिथ्यात्वकुलकम्],
14. **Dhammovaesamalapagarana** [धम्मोवएसमालापगरणं],
15. **Chaurangijja** [चउरंगिज्जं],
16. **Jivavichara** [जीवविचारः],
17. **Danasilatapobhavanakulaka** [दानशीलतपोभावनाकुलकम्],
18. **Navatattvavicharasaroddhara** [नवतत्त्वविचारसारोद्धारः],
19. **Mithyaduhkritakulaka** [मिथ्यादुःकृतकुलकम्].

Leaves 107 to 158; 14 inches long, 1½ inches broad.

Atmasambodhakulaka begins:

उवसग्गो कहं हुंता न हुंतं जइ कम्मयं ॥ १ ॥

Atmasambodhakulaka ends:

अणुत्तरसुरासुरसोक्खसोहग्गलालिया ।

कहं पाविंति ते चरणं न हुंतं जइ कम्मयं ॥ २१ ॥

आत्मसंबोधकुलं स० ॥

Svajivanusasanakulaka begins:

निसाविरामे परिभावयामि गेहे पलित्ते किमहं सुयामि ।
डज्झंतमप्पाणमुविक्खयामि जं धम्मरहिर्उ दियहे गमामि ॥ १ ॥

Svajivanusasanakulaka ends:

खमावणं सव्वजीवाण खमणं आलोयणाई चउसरणगमणं ।
अणसणं पच्चक्खाणं करणं अंतम्मि मे होज्ज समाहिमरणं ॥ २१ ॥
स्वजीवानुशासनकुलं ॥

Kshamanakulaka begins:

जो कोई मए जीवो चउगइसंसारभवकडिल्लंमि ।
दूहविउ मोहेणं तमहं खामेमि तिविहेणं ॥ १ ॥

Kshamanakulaka ends:

इय खामणाउ एसा चउगइमावन्नाण जीवाणं ।
भावविसुद्धीए महं कम्मक्खयकारणं होउ ॥ ३६ ॥
खामणाकुलं समात्तं ॥

Aradhanakulaka begins:

सव्वं भं ते पाणाइवायं पच्चक्खामि जावज्जीवाए ।

Aradhanakulaka ends:

एयं पच्चक्खाणं विउला आराहणाहेउं ॥ १७ ॥

Mangalashtaka begins:

नित्यश्रीभवनाधिवासिभवनव्राते मणिद्योतिते ।

Mangalashtaka ends:

श्रीमद्गौतममुख्यसाधुपतयः कुर्वंतु वो मंगलम् ॥ ९ ॥
यस्मात्तीर्थमिदं प्रवृत्तिमगमत्स श्रीसुधर्मो गुरु-
र्धन्यो धन्यमुनिः सुकोशलमुनिः श्रीशालिभद्राभिधः ॥

मेतार्येऽथि दृढप्रहारसुयतिर्मेघो दशार्णाभिधः ।
श्रीमंतः करकंडुमुख्ययतयः कुर्वंतु मे मंगलम् ॥ १० ॥
श्रीजंबुप्रभवः प्रभुर्गतभवः शय्यंभवः श्रीयशो-
भद्राख्यः श्रुतकेवली च चरमः श्रीभद्रबाहुर्गुरुः ।
शीलस्वर्णकषोपलः सुविमलः श्रीस्थूलभद्रः प्रभुः
सर्वेऽप्यार्यमहागिरिप्रभृतयः कुर्वंतु मे मंगलम् ॥ ११ ॥
स्यामार्यार्यसमुद्रमंगुसमिताः श्रीभद्रगुप्तादयः
श्रीमान् सिंहगिरिस्तथा धनागिरिः स्वामी च वैराभिधः ।
श्रीवैरो मुनिरार्यरक्षितगुरुः पुष्पो गुरुः स्कंदिलः
श्रीदेवर्द्धिपुरःसराः श्रुतधरा कुर्वंतु मे मंगलम् ॥ १२ ॥
तीतानागतवर्त्तमानविषयाः सर्वेऽपि तीर्थेश्वराः ।
सिद्धाः सूरिवराश्च वाचकवराः सर्वेऽपि सत्साधवः ।
धर्मः श्रीजिनपुंगवैर्निगदितो ज्ञानादिरत्नत्रयं
संघः श्रीजिनसिद्धसाध्वतिशयाः कुर्वंतु मे मंगलम् ॥ १३ ॥
शाश्वताशाश्वतान्येव चैत्यानि पुरुषोत्तमाः ।
भयेभ्यो मंगलं दधुः स्तुताः श्रीधर्मसूरिभिः ॥ १४ ॥

**Dharmalakshana begins:**

धर्मार्थं क्लिश्यते लोको न च धर्मं परीक्ष्यते ।
कृष्णं नीलं सितं रक्तं कीदृशं धर्मलक्षणम् ॥ १ ॥

**Dharmalakshana ends:**

एष दशलक्षणो धर्मः सर्वज्ञैः परिकीर्त्तितः ।
ज्ञात्वा चैव हि कृत्वा च गच्छंति परमां गतिम् ॥
इति श्रीसर्वज्ञोक्तदशविधधर्मलक्षणं समाप्तम् ॥

Samitiprakarana begins:

अट्ठपवयणमायाउ समिती गुत्ती तहेव य ।

पंचेव य समिईउ तउ गुतीउ आहिया ॥ १ ॥

Samitiprakarana ends:

पवयणमाया जे संमं आयरे मुणी ।

संखिप्पं सव्वसंसारा विप्पमुच्चइ पंडिए त्ति बेमि ॥ २१ ॥

समितीउ समत्ताउ ॥ २४ ॥

Mahabhayaharaparsvanathastava begins:

नमिऊण पणयसुरगणचूडामणिकिरणरंजियं मुणिणो ॥

Mahabhayaharaparsvanathastava ends:

नामंपि य मंतसमं इय नाह थुणामि भत्तिए ॥ २९ ॥

Danasilatapobhavanakulaka begins:

ओं नमः सर्वज्ञाय ॥

नमविउ[उ]सभाइचउवीसतित्थंकरे

Danasilatapobhavanakulaka ends:

कम्मखवेविणु मुत्तिसुखलीलइं लहउ ॥ २४ ॥

दानशीलतपोभावनाकुलं समाप्तम् ॥

Mithyatvakulaka begins:

नमिऊण महावीरं मिच्छत्तमहंधयारदिणणाहं ।

मिच्छत्तकारणाइं कइवइ थूलाणि ए भणामि ॥ १ ॥

Mithyatvakulaka ends:

सिद्धिपुरभवणट्ठाणं लहंति जीवा सुहनिहाणं ॥ ३० ॥

मिथ्यात्वकुलकं समाप्तमिति ॥

Dhammovaesamalapagarana begins:

सिज्झउ मज्झवि सुयदेवि तुज्झ भरणाउ सुंदरा ज्झत्ति ।

धम्मोवएसमाला विमलगुणा जयपडाइव्व ॥ १ ॥

जिणसिद्धसूरिउवज्झायसाहुसुयदेविसंघनाणाणि ।
धम्मोवएसमालं थोऊण भणामि सुयविहिणा ॥ २ ॥

Dhammovaesamalapagarana ends:

मइभेदा पुव्वग्गहसंसग्गीए य अभिनिवेसे य ।
चउहा खलु मिछत्तं एगयरं संगमे जत्थ ॥ १०२ ॥

धम्मोवएसमालापगरणं समत्तंति ॥

Chaurangijja begins:

चत्तारि परमंगाणि दुलहाणि इ जंतुणो ।
माणुसत्तं सुई सद्धा संजयंमि य वीरियं ॥ १ ॥

Chaurangijja ends:

चउरंगं दुलहं मत्ता संजमं पडिवज्जिया ।
तवसा धुय कम्मं से सिद्धे हवइ सासए त्ति बेमि ॥ २०

चाउरंगिज्जं समत्तं ॥

Jivavichara begins:

सिरिवीरजिणं नमिउं वोच्छं बत्तीसजीवपरिमाणं ।
भव्वजणजाणणट्ठं रुक्खट्ठं अप्पसरणट्ठं ॥ १ ॥

Jivavichara ends:

इय जीवाण विचारं भव्वा नाऊण जे य रक्खंति ।
पावंति एए सिग्घं मढं मुत्तिपयं पंति ॥ २८ ॥

जीवविचारप्रकरणं समाप्तम् ॥

Navatattvavicharasaroddhara begins:

अरहंता भगवंता सव्वे उप्पण्णदिव्ववरनाणा ।
सव्वजीवाण हियट्ठं जीवाइपए परूविंसु ॥ १ ॥

Navatattvavicharasaroddhara ends:

कालो य ९ अंतरं ६ भाग ८ अप्पाबहुं चेव ॥ ९ ॥

इति संक्षेपतो नवतत्वविचारसारोद्धारः ॥

Mithyaduhkritakulaka begins:

जो कोइ य पाणिगणो दुक्खे ठवितो मए भमंतेण ।

सो खमउ मज्झ सव्वं मिच्छामि ह दुक्कडं तस्य ॥ १ ॥

Mithyaduhkritakulaka ends:

मिच्छादुक्कडकुलयं अहवा सत्ताण खामणा रइया ।

अहवा भावणकुलयं सम्मदिट्ठिस्स जीवस्स ॥

मिथ्यादुःकृतकुलकं समाप्तम् ॥

---

No. 88. A Manuscript containing,

1. Sahityaslokah [साहित्यश्लोकाः],
2. Strinirvanaprakarana [स्त्रीनिर्वाणप्रकरणम्],
3. Yogavidhiprakarana [योगविधिप्रकरणम्],
4. Chelapratishthaprakarana [चेलप्रतिष्ठाप्रकरणम्],
5. Kevaliprakarana [केवलिप्रकरणम्].

Sahityaslokah begins:

इह ते जयंति कइणो जयंमि णमो जाण सयलपरिणामं ।

वायासुवियं दीसइ आमोयघणं व तुच्छं व ॥ १ ॥

Sahityaslokah ends:

महधूमलया एयस्स सुचरिया इय इय सणाहस्स ।

सुरकारिणो व हलमयं वुसामला सहइ सरणिवु ॥ १७६ ॥

Strinirvanaprakarana begins :

इह ये स्त्रीनिर्वाणं प्रति विप्रतिपद्यंते त एवं वाच्याः ॥

Strinirvanaprakarana ends :

स्यात्पुंवत्स्त्रीणां सिद्धौ नापर्याप्तादिवद्बाधेति । कृतं विस्तरेण ।

Yogavidhiprakarana begins :

अथ योगविधिप्रकरणम् । आगमग्रंथार्थयोगहेतुत्वाद्योगा आचाम्लनिर्वि-कृतिकल्पास्तपोविशेषास्ते च द्विधा । आगाढा अनवगाढाश्च उत्तराध्ययन-भगवतीप्रश्नव्याकरणमिश्रागाढाः शेषास्त्वनागाढाः ॥

Chelapratishthaprakarana begins :

इह च केचिन्मिथ्यात्वाकुलितचेतसः इदमित्थमिति महार्थकर्मप्रवादं पूर्वोद्धृ-तप्रस्तुताध्ययनाधीतमपि सचेलत्वं ।

Chelapratishthaprakarana ends :

चेलप्रतिष्ठाप्रकरणं समाप्तमिति ॥

Kevaliprakarana begins :

सिद्धमेवं केवलज्ञानं किंतु कतरं पूरुषमेतदास्पदीकरोतीत्यत्राहुः ।

Kevaliprakarana ends :

एवमुत्तरचरादिकमपि न केवलित्वेन विरुध्यत इति स्थितं केवलाहारसर्व-ज्ञत्वयोरविरोधादिति हेतुः सिद्धिवधूसंबंध इति ।

No. 89. **Raghuvilasanataka,** by Ramachandra [रघुविलास-नाटकम्—रामचन्द्रः].

Leaves 1 to 184 Incomplete, a few leaves at the end being wanting.

Begins :

॥ अर्हं ॥—सतां यः केवलां दृष्टिं हतामत्युग्रकर्मणा ।

तीर्त्वा मोहाब्धिमानैषीद्वीरवास्मै नमो मम: ॥ १ ॥

नांद्यंते सूत्रधारः ।—सप्रमोदम् ।

सीतां काननतो जहार विहितच्छद्मजः पुरा रावण-

स्तं व्यापाद्य रणेषु तां पुनरथो रामः समानीतवान् ।

एतस्मै कविसूक्तिमौक्तिकमणिश्रेणीसमे सूर्भुवः-

स्वर्व्यामोहनकार्मणाय सुकथारत्नाय नित्यं नमः ॥ २ ॥

भवतु तावदहं सामाजिकादेशमनुतिष्ठामीति परिक्रामति ।

प्रविश्य—चंद्रकः ।

भाव । कथं विस्मयांकुरितरोमांचकोरकदंतुरो विलोक्यसे ।

सूत्र०—

मारिष । सामाजलोकस्य प्रबंधरामणीयकविशेषपरिज्ञानचातुरीसंपदा चमत्कृतोस्मि ।

चंद्र०

भाव । समिद्धरसानुबंधे कुत्र प्रबंधे समलंकृतसंपदां सभासदां चेतः ।

सूत्र०

मारिष—श्रीसिद्धहेमचंद्राभिधानशब्दानुशासनाविधानवेधसः श्रीमदाचार्य-हेमचंद्रस्य शिष्यं रामचंद्रमासि जानासि ।

चंद्र०

साक्षेपम्—

पंचप्रबंधमिषपंचमुखानकेन
विद्वन्मनःसदसि नृत्यति यस्य कीर्तिः ।
विद्यात्रयीचणमचुंबितकाव्यतंद्रं
कस्तं न वेद सुकृती किल रामचंद्रम् ॥ ९ ॥

किं तु द्रव्यालंकारनामा प्रबंधोनाभिनेयत्वेन तावदास्ताम् । अपरेषां राघवाभ्युदययादवाभ्युदयनलविलासरघुविलासानां चतुर्णां रमणीयतमसध्यंगनिवेशानां विशदप्रकृतीनां पुनर्मध्ये कुत्र प्रजानामनुरागः ॥

नेपथ्ये ।

प्रजानां प्रथमे कैकेय्याः पुनर्द्वितीये ।

सूत्र०

सरोषं कोयमावयोरंतराले प्रलपति ।

चंद्र०

कृतममुष्य वातकिनः प्रलापेषु संरंभेण । प्रस्तुतमभिधीयताम् ।

सूत्र०

प्रजानां रघुविलासनामनि चतुर्थे प्रबंधे अनुरागः ।

चंद्र०

रामचंद्रसूक्तेषु कमसाधारणं गुणं संभावयति भावः ।

सूत्र०

व्युत्पत्तिर्मुखमेव नाटकगुणन्यासे तु किं वर्ण्यते
सौरम्यप्रसवा नवा भणितिरप्यस्त्येव काचित्काचित् ।
यं प्राणान् दशरूपकस्य स करोत्क्षेपं समाचक्षते
साहित्योपनिषद्विदः स तु रसो रामस्य वाचां परम् ॥

आपि च ।

रामात्पूर्वं मधुरा व्यक्तं वाचो वपुष्मतां नासन् ।
कथमन्यथा सुधार्थं ममंथुरमृतांधसः सिंधुम् ॥

नेपथ्ये—अत्यल्पमभिदधासि ।

नयविनयक्रमविक्रमादयोपि महापुरुषगुणा रामात्पूर्वं वपुष्मतां नासन् ।

सूत्र०—सरोषम् ।

मारिष, कोयं पुनःपुनरस्मानंतरयति ।

चंद्र०

ननु कथितं वातकी कोप्येषः ।

पुनर्विमृश्य—भाव ।

अमी कृतज्ञविज्ञचूडामणयः सभासदो भवदीयस्य नाट्यकलाकौशल्यपात्रं नापरे ।

सूत्र०—मारिष ।

हृदयंगममभिदधासि ।

यतः—

उच्चरणलब्धकीर्तेराज्ञारहितस्य लक्ष्मणयुतस्य ।
रामस्य वनं शरणं जितपरकलभस्य शरभस्य ॥

नपथ्ये ।

आः क्रूरनटखेट किमिदं राज्याभिषेकपर्वणि रामस्य वनप्रस्थानमावेदयसि ।

सूत्र०

विलोक्य । कथमयं गंधर्वकभूमिकावाही कुशीलवः पुनःपुनरस्मानंतरितवान् । तदेहि मारिष करणीयांतरमनुतिष्ठामः । इति निःक्रांतौ प्रस्तावना । ततः प्रविशति कंचुकी गंधर्वकः ॥

**No. 90. Yogasara** [योगसार].

Leaves 1 to 9. Dated Samvat 1192. = A. D. 1136.

Begins:

ॐ नमो वीतरागाय ॥

विश्वप्रकाशिमहिमानममानमेकमोमक्षराद्यखिलवाङ्मयहेतुभूतम् ।

यं शंकरं सुगतमीशमनीशमाहुरर्हन्तमूर्जितमहं तमहं नमामि ॥ १ ॥

Ends:

श्रीजयकीर्त्तिसूरीणां शिष्येणामलकीर्त्तिना ।

लेखितं योगसाराख्यं विद्यार्थिवामकीर्त्तिना ॥ १ ॥

संवत् ११९२ ज्येष्ठशुक्लपक्षे त्रयोदश्यां पंडितसाल्हणेन लिखितमिदमिति ।

---

**No. 91. A Manuscript containing,**

1. **Pramanamimansa,** by HEMACHANDRA, with author's Commentary [प्रमाणमीमांसा—सटीका—द्वयोः —हेमचन्द्रः].

2. **Vitaragastotra,** by HEMACHANDRA, with a Commentary by PRABHANANDA [वीतरागस्तोत्रं—सटीकम्—मू. हेमचन्द्रः —टी. प्रभानन्दः].

3. **Ajitasantistava,** by NANDISHENA, with a Commentary by JINAPRABHA [अजितशान्तिस्तवः सटीकः—मू° नन्दिषेणः—टी° जिनप्रभः],

4. **Bhayaharastotra,** with a Commentary by JINAPRABHA [भयहरस्तोत्रं-सटीकम्—मू° टी° जिनप्रभसूरिः].

Leaves 1 to 108, 109 to 235, 236 to 277.

Begins:

ॐ अर्हं ॥

अनंतदर्शनज्ञानवीर्यानंदमयात्मने ।

नमोर्हते कृपाकृष्टधर्मतीर्थाय तायिने ॥ १ ॥

बोधिबीजमुपस्कर्तुं तत्त्वाभ्यासेन धीमताम् ।
जैनसिद्धांतसूत्राणां तेषां वृत्तिर्विधीयते ॥ २ ॥

ननु यदि भवदीयानीमानि जैनसिद्धांतसूत्राणि तर्हि भवतः पूर्वं कानि किमियानि वा तान्यासन्निति । अत्यल्पमिदमन्वयुङ्क्थाः पाणिनिपिंगलकणादाक्षपादादिभ्योपि पूर्वं कानि किमियानि वा व्याकरणादिसूत्राणि ते तदपि पर्यनुयुङ्क्ष्व । अनादय एवैता विद्याः संक्षेपविस्तरविवक्षया नवनवीनवंति तत्तत्कर्तृकाश्चोच्यन्ते । किं नाश्रौषीर्न कदाचिदनीदृशं जगदिति । यदि वा प्रेक्षस्व । वाचकमुख्यविरचितानि सकलशास्त्रचूडामणिभूतानि तत्त्वार्थसूत्राणीति यद्येवमकलंकधर्मकीर्त्यादिवत्प्रकरणमेव किं नारभ्यते किमनया सूत्रकारत्वाहोपुरुषिकया । मैव वोचः । भिन्नरुचिर्ह्ययं जनस्ततो नास्य स्वेच्छाप्रतिबंधो लौकिकराजकीयं वा शासनमस्तीति यत्किंचिदेतत्तत्र वर्णसमूहात्मकैः पंचभिरध्यायैः शास्त्रमेतदारचयदाचार्यः । तस्य च प्रेक्षावत्प्रवृत्त्यंगमभिधातुमिदमादिसूत्रम् । अथ प्रमाणमीमांसा । अथेत्यस्याधिकारार्थत्वात् ॥ ..

इत्याचार्यश्रीहेमचंद्रविरचितायाः प्रमाणमीमांसायास्तद्वृत्तेश्च प्रथमाध्यायस्य प्रथमाह्निकम् ॥

Ends :

अयं च प्रागुक्तश्चतुरंगो वादः । कदाचित्पत्रालंबनमप्यपेक्षतेऽतस्तल्लक्षणमत्रावश्याभिधातव्यम् । यतो नाविज्ञातस्वरूपस्यास्यावलंबनं जयाय प्रभवति । नचाविज्ञातस्वरूपं परतंत्रं भेत्तुं शक्यमित्याह । प्रमाणमीमांसातर्कोऽयम् ॥

Commentary begins :

ॐ नमः परमात्मने ॥
अनंतदर्शनज्ञानवीर्यानंदचतुष्टयम् ।
संस्मृत्य परमात्मानमनाहतमहःश्रियम् ॥ १ ॥

अनल्पमतिभिः साध्यमल्पधीरपि भक्तितः ।
ब्रुवे विवरणं किंचिद्वीतरागस्तवानुगम् ॥ २ ॥

Commentary ends:

इति वीतरागस्तोत्रे विंशतितमस्याशीःस्तवस्य पदयोजना ॥
चांद्रे कुलेस्मिन्नलघुश्चरित्रैः प्रभुर्बभूवाभयदेवसूरिः ।
नवांगवृत्तिच्छलतो यदीयमद्यापि जागर्ति यशःशरीरम् ॥ १ ॥
तस्मान्मुनींदुर्जिनवल्लभोथ तथा प्रथामाप निजैर्गुणौघैः ।
विपश्चितां संयमिनां च दुर्गे धुरीणता तस्य यथाधुनापि ॥ २ ॥
तेषामन्वयमंडनं समभवत्संजीवनं दुःषमा–
मूर्च्छालस्य मुनिव्रतस्य भवनं निःसीमपुण्यश्रियः ।
श्रीमंतोभयदेवसूरिगुरवस्ते यद्विशुक्लैर्गुणै–
र्द्रष्टुं तादृशमाश्रयांतरमहो दिग्चक्रमाक्रम्यते ॥ ३ ॥
यतिपतिरथ देवभद्रनामा समजनि तस्य पदावतंसदेश्यः ।
दधुरधरितभावरागयोगाज्जगति रसायनतां यदीयवाचः ॥ ४ ॥
तदीयपट्टे प्रतिभासमुद्रे श्रीमत्प्रभानंदमुनीश्वरोऽभूत् ।
स वीतरागस्तवनेष्वमीषु विनिर्ममे दुर्गपदप्रकाशम् ॥ ५ ॥
एवं सपादशतयुतविंशतिशतपरिमितः प्रबंधोयम् ।
प्रथमादर्शे गणिना लिखितो हर्षेंदुना शमिना ॥ ६ ॥
सोमसुंदरसूरिभ्यो नमः ॥

---

**No. 92. A Manuscript containing,**

1. **Narachandrajyotisha** [नारचन्द्रज्योतिषम्],
2. **Kammapayadisangahini** [कम्मपयडिसंगहिणी],
3. **Pavayanasandohapagarana** [पवयणसंदोहपगरणं],
4. **Jivadayapagarana** [जीवदयापगरणं],
5. **Gahakosa** [गाहाकोस],
6. **Sammatakulaka,** by AMARACHANDRASURI [सम्मत्तकुलयं —अमरचन्द्रसूरिः].

Leaves 1 to 152.

Pavayanasandohapagarana begins :

नमिऊण वद्धमाणं ववगयमाणं सुरेहि कयमाणं ।
चउगइनिवुड्डाणं ताणं सत्ताण भवियाणं ॥ १ ॥
पवयणलवाउ केई उवलहिऊणं गुरुसयासाउ ।
कहयामि संगहेऊ भवियाण अणुग्गहट्ठाए ॥ २ ॥

Pavayanasandohapagarana ends :

पवयणसंदोहपगरणस्स छट्ठं पयं ॥

Jivadayapagarana begins :

संसयतिमिरपयंगं भवियाण कुमुयपुण्णिमायंदं ।
कामगयंदमयंदं जगजीवहियं जिणं नमिउं ॥ १ ॥
पंचमहव्वयगुरुभारधारए पंचसमिए तिगुत्ते ।
नमिऊण सयलसमणे जीवदयापगरणं वोच्छं ॥ २ ॥

Jivadayapagarana ends :

जं कल्ले कायव्वं अज्जं चिय तं करेह तुरमाणो ।
बहुविग्घो हु मुहुत्तो मा अवरण्हं पडिक्खाहि ॥ ११६ ॥
जीवदयापरणं ॥

Gahakosa begins :

निज्जरियजरामरणं वंदित्ता जिणवरं महावीरं ।

छप्पन्न य गाहाउ वोच्छं सुयणस्स जोग्गाउ ॥ १ ॥

Gahakosa ends :

एयं गाहाकोसं जो पढइ वियड्ढविरइयं लोए ।

सो होइ विउलबुद्धी जणंमि सोहग्गयं लहइ ॥ १५३ ॥

गाहाकोसं सम्मत्तं ॥

Sammatakulaka begins :

देवो धम्मो मग्गो साहू तत्ताणि चेव सम्मत्तं ।

तव्विवरियं मिच्छत्तदंसणं देसियं समए ॥ १ ॥

Sammatakulaka ends :

जीवाइनवपयत्थे जो जाणइ तस्स होइ सम्मत्तं ।

भावेण सद्दहंते अयाणमाणे वि सम्मत्तं ॥ ३९ ॥

श्री अमरचंद्रसूरिविरचितं सम्यक्त्वकुलकं समाप्तम् ॥

---

**No. 93. Sarasvataprakriya,** by ANUBHUTISVARUPACHARYA [सारस्वतम्—अनुभूतिस्वरूपाचार्यः].

# APPENDIX II.

## Extracts from Paper Manuscripts preserved in the Dhandharavada Bhandar at Anhilwad Patan.

# Patan Paper Manuscripts.

**No. 1. Aptaparikshatika,** by VIDYANANDA [आप्तपरीक्षा—विद्यानन्दः]·

**Leaves 1 to 16.**

**Begins:**

प्रबुद्धाशेषतंत्रार्थबोधदीधितिमालिने ।

नमः श्रीजिनचंद्राय मोह--प्रभेदिने ॥ १ ॥

कस्मात्पुनः परमेष्ठिनः स्तोत्रं शास्त्रादौ शास्त्रकाराः प्राहुरित्यभिधीयते ॥

श्रेयोमार्गस्य संसिद्धिः प्रसादात्परमेष्ठिनः ।

इत्याहुस्तद्गुणस्तोत्रं शास्त्रादौ मुनिपुंगवाः ॥ २ ॥

**Ends:**

श्रीमत्तत्त्वार्थशास्त्राद्भुतसलिलनिधेरिद्धरत्नोद्भवस्य

प्रस्थानारंभकाले सकलमलभिदे शास्त्रकारैः कृतं यत् ।

स्तोत्रं तीर्थोपमानं प्रथितपृथुपथं स्वामिमीमांसितं त-

द्विद्यानंदैः स्वशक्त्या कथमपि कथितं सत्यवाक्यार्थसिद्धये ॥

इति तत्त्वार्थशास्त्रादौ मुनींद्रस्तोत्रगोचरा ।

प्रणीताप्तपरीक्षेयं विवादविनिवृत्तये ॥

विद्यानंदहिमाचलमुखपद्मविनिर्गता सुगंभीरा ।

आप्तपरीक्षा टीका गंगावच्चिरतरं जयतु ॥

भास्व--निर्दोषा कुमतमलध्वांतभेदनप्रतिष्ठा ।

आप्तपरीक्षालंकृतिराचंद्रार्कं चिरं जयतु ॥

स जयतु विद्यानंदो रत्नत्रयभूरिभूषणः सततम् ।

तत्त्वार्थार्णवतरणे सदुपायः प्रकटितो येन ॥

---

**No. 2. Dhaturatnakara,** by SADHUSUNDARA, with author's Commentary [धातुरत्नाकरः सटीकः—मू० टी०—साधुसुन्दरः].

Commentary begins :

श्रीमान्स श्रीसुमतिजिनपो बुद्धिसौभाग्यदाता
कल्याणालीं वितरतु सतां विश्वविश्वोपकारी।
यस्मिन्गर्भे स्थितवति प्रसूः प्रज्ञया स्त्रीद्वयस्य
जाता वादापघनपटुर्हर्षयंती जनौघम् ॥ १ ॥

अगणितमहिमार्घ्यो देवनागेन्द्रपुंभिः प्रकटमभयदेवाचार्यवर्यैः सुनुत्या ।
प्रकटितवरबिंबः पापतापापहारी विदलतु दुरितौघं स्तंभनाधीशपार्श्वः ॥ २ ॥
या ध्याता योगींद्रैर्नमस्कृतानेकबुधजनैः सततम् ।
इन्मुखकमलनिवासं करोतु मम भारती सार्घ्या ॥ ३ ॥

दुर्वादिमत्तद्विपकेसरिभ्यो विद्यावशावल्लभवल्लभेभ्यः ।
श्रीसाधुकीर्त्याह्वयपाठकेभ्यो नमामि मद्दीक्षकशिक्षकेभ्यः ॥ ४ ॥
स्मृत्वैवं स्मरणीयांघ्रीन् क्रियाकल्पलताभिधा ।
स्वोपज्ञधातुपाठस्य वृत्तिर्वर्या विधीयते ॥ ५ ॥

तत्रादौ ग्रंथकृदुचितेष्टदेवतां परमज्योतीरूपमविघ्नेन चिकीर्षितपरिसमाप्तये शिष्टाचारपरिपालनाय च भव्याशीर्वाददाने स्मरति ।

Text begins :

श्रीदं स्तात्परमं ज्योतिः शब्दब्रह्मैककारणम् ।
योगिवर्यैः सदा ध्येयं चिंतितार्थसमर्थकम् ॥ १ ॥

॥ सुगमम् ॥ न वरं शब्दब्रह्मैककारणं शब्दज्ञानस्य मुख्यहेतुः ॥ १ ॥
अथ पूर्वाचार्याज्ञयवादेन प्रीणयति ॥

इंद्रश्चंद्रः काशकृत्स्न्यापिशली शाकटायनः ।
पाणिन्यमरजैनेंद्रा जयंत्याष्टादिशाब्दिकाः ॥ २ ॥

सुगमम् ॥ नवरं काशकृत्स्निश्च आपिशलिश्चेति द्वंद्वे काशकृत्स्न्यापिशली।
इकारांताविमौ शब्दौ। शाब्दिकाः शब्दज्ञातारः ।
अथ ग्रंथनाम ग्रंथस्वरूपं च प्ररूपयति।

वीक्ष्यानेकान्धातुपाठानाद्यंते मातृकाक्रमः ।
धातुरत्नाकरो नाम धातुपाठो विधीयते ॥ ३ ॥

सुगमम् ॥

Commentary ends:

इति श्रीवादींद्रश्रीसाधुकीर्त्युपाध्यायशिष्यलेशवाचनाचार्यसाधुसुंदरगणिविरचिते क्रियाकल्पलतानाम्नि स्वोपज्ञधातुरत्नाकरधातुपाठवृत्तिः समाप्ता ॥

अथ प्रशस्तिः ॥

पूर्वं कौटिकनाम्नि धाम्नि महसां गच्छे जिनाज्ञातरो-
र्गुच्छे चांद्रकुले कलाभिरमले सद्वृत्ततामंजुले।
आसीदुद्यतसंयतोचितविधिः श्रीवर्द्धमानोपमः
संसेव्यो धरणोरगाधिपतिना श्रीवर्द्धमानः प्रभुः ॥ १ ॥

तच्छिष्यस्समभूज्जिनेश्वरगुरुस्संख्यावतामग्रणी-
र्यो भूवल्लभदुर्लभस्य परिषन्मध्ये मुनिर्व्यंसकान्।
निर्जित्यागमयुक्तिभिः खरतरख्यातिं नृपख्यापितां
लेभे बिंदुकुलाद्रिदिक्पतिमिते वर्षे पुरे पत्तने ॥ २ ॥

आसंस्तत्र युगप्रधानपदवीसीमंतिनीनायकाः
श्रीमच्छ्रीजिनचंद्रसूरिप्रमुखाः श्रीसूरयो भूरयः।
येषां कीर्तिनटी कृतामरतटीस्नाना प्रधाना गुणै-
रारूढा सुरशैलवंशशिखरेष्वद्यापि या खेलति ॥ ३ ॥

ततश्च ॥

तीर्थोर्व्वीकरमोक्षसिंधुझषगोरक्षा कुशास्त्रप्रति-
सर्वावाप्यजिनेशशासनयतित्राणाव्ददाताक्षरैः ।
चंद्रे चिन्हमिषान्निनां सदभिधामारोपयामास यो
जज्ञेऽसौ जिनचंद्रसूरिसुगुरुस्साहिप्रबोधप्रदः ॥ ४ ॥

तत्पट्टे जिनसिंहसूरिरुदगाद्भास्वानिवानंदयन्
लोकान्साहिसरोरुहं निजगवा प्रोद्बुध्य भास्वत्प्रभः ।
आषण्मासममारिघोषपटहामोदैः सवासा दिश-
श्चक्रे वक्रनतिप्रवादिनिकरध्मातावलीध्वंसकः ॥ ५ ॥

गंगोत्तुंगतरंगभंगिविलसच्छोभाधिसंस्पर्धिनि
स्वर्गंगापुलिने सुनेत्रनलिने चांद्रे मृगे मोहनम् ।
कुर्वंत्योऽप्सरसो विशेषितरसा गायंति येषां गुणां-
स्तत्पट्टे जिनराजसूरिगुरवो भुंजंति राज्यश्रियम् ॥ ६ ॥

अंबिकालब्धवरप्रसादाश्चारित्रलक्ष्मीविपुलप्रसादाः ।
प्रतिष्ठित... जिनप्रसादा जयंतु पूज्या विगतावसादाः ॥ ७ ॥

अश्रेयः– – –प्र... मधुरीपीयूषपु... त्किराः
कामोन्मादहराः कृपार...ना आनंदकंदांकुराः ।
श्रुत्वा सज्जनमानसानि ... हृष्यंति येषां गिर-
स्तत्पट्टे जिनसागरा अपि दधुराचार्यसंज्ञं पदम् ॥ ८ ॥

येषामेष गुणान्पुराणपुरुषो वक्त्रैश्चतुर्भिः स्फुर-
ज्जिव्हाकैर्वदनैरनिंद्यरदनैर्गौरीवरः पंचभिः ।
षाड्भिः षण्मुख एष दोषरहितं गायंति ते जज्ञिरे
शाखायां जिनभद्रसूरिगणपा आद्या नमन्नाकिनः ॥ ९ ॥

तच्छिष्याः समजायताक्षयजया मध्येसभं वाग्मिनां
श्रीपद्मादिम–कवाचकवरा ग्रंथावलीवाचकाः ।

यद्वाचो यमकादिचित्ररचिता भावैर्नवैः प्लाविताः
श्रुत्वाद्यापि जनस्य कस्य हृदयं चित्रीयते नो इह ॥ १० ॥

शिष्यस्ततोभून्मतिवर्धनोस्य विद्याप्रदानान्मतिवर्द्धनो यः।
विनेयवर्ग्येषु निसर्गवाग्मी न स्पर्द्धनं येन चकार वाग्मी ॥ ११ ॥

दुष्टव्यंतरसंगसज्जितबला मारिर्मदा व्यंतरी
सात्रैवापुरि वारिता निजतनुं दत्त्वार्दयंती जनान्।
येन श्रावकलोकरक्षणकृते भूपालवंद्यक्रमो
विद्यादानजनिष्ट मेरुतिलकस्तस्यांतिषद्वाचकः ॥ १२ ॥

निर्विकारसदाचारदयाकलशसन्निभाः।
तत्सतीर्थ्यो यथार्थाख्या दयाकलशवाचकाः ॥ १३ ॥

मतिमदमरमाणिक्याभिधानाः प्रधानाः प्रगुणगुणसमूहैर्वाचनाचार्यधुर्याः।
समजनिषत जाग्रत्साधुमार्गाधिकारा दलितमदनसारास्ताद्विनेया उदाराः॥१४॥

तत्पादपंकेरुहचंचरीका रूपश्रिया मोहितसुंदरीकाः।
श्लाघाविधानोद्यतकिन्नरीकाः श्रीसाधुकीर्त्याह्वयका बभूवुः ॥ १५ ॥

ख्याताकब्बरपादसाहिपरिषन्मध्ये विदां साक्षिकं
कृत्वा वादमखर्वगर्वचटितं निर्जित्य दुर्वादिनम्।
आविष्कृत्य --- पौषधविधौ मेत्यक्षरं ह्यागमे
वादींद्रं बिरुदं नृपादकबराल्लेभे समं कौविदैः ॥ १६ ॥

शास्त्राध्यापनसत्रसत्रनियतं थैर्मंडितं भूतले
पायंपायमपायदोषविकलं विद्यारसं पूरुषाः।
आघ्राता इव नापरत्र विदधुस्तत्प्रार्थनं वाग्मिनां
शृंगारोपमसाधुकीर्त्तिगणयः श्रीपाठका जज्ञिरे ॥ १७ ॥

विमलतिलकनामा तद्विनेयेषु मुख्यः
स्वगुरुपरमभक्तश्चारुचारित्रयुक्तः ।
इह हि विजयतेऽसौ ज्ञातसिद्धांतयुक्तिः
सततमधिकमस्मद्भक्तिभावं दधानः ॥ १८ ॥
तच्छिष्योस्ति च साधुसुंदर इति ख्यातो द्वितीयो भुवि
तेनैषा विवृतिः कृता मतिमतां प्रीतिप्रदा सादरम् ।
स्वोपज्ञोत्तमधातुपाठविलसत्सद्धातुरत्नाकर-
ग्रंथस्यास्य विशिष्टशाब्दिकमतान्यालोक्य संक्षेपतः ॥ १९ ॥
व्योमसिद्धिरसक्षोणीमितेऽब्दे विवृतिः कृता ।
क्रियाकल्पलतानाम्नी शुभे दीपालिकादिने ॥ २० ॥
गुरुभक्तिप्रतिष्ठेन विद्वद्विमलकीर्त्तिना ।
ग्रंथोयं प्रथमादर्शे सुविविच्य निवेशितः ॥ २१ ॥
अधिकविषममेतद्धातुरूपस्वरूपं
किमपि लिखितमत्र श्रेष्ठशास्त्रानुसारात् ।
भवति हि यदशुद्धं पाणिनीयैः प्रसद्य
तदिह विबुधमुख्यैः शोध्यमेषोंजलिर्वः ॥ २२ ॥
यावद्व्योम्नि निशा शशांकधवला ताराकुलैराकुला
यावद्भानुरनूनभानुभिरसौ ध्वांतं निहंति स्फुटम् ।
यावत्तिष्ठति पुष्पदंतसहितं हेमाचले भूतले
तावच्छास्त्रमिदं विदंभहृदये जागर्तु विद्यावताम् ॥ २३ ॥
इति क्रियाकल्पलतानाम्नी वृत्तिः समाप्ता ।

**No. 3. Panchavastutika,** by HARIBHADRA [पञ्चवस्तुटीका—हरिभद्रः].

**Begins :**

प्रणिपत्य जिनं वीरं नृसुरासुरपूजितम् ।
व्याख्या शिष्यहिता पंचवस्तुकस्य विधीयते ॥ १ ॥

इह हि पंचवस्तुकाख्यं प्रकरणमारब्धुकाम आचार्यः शिष्टसमयप्रतिपालनाय विघ्नविनायकोपशांतये प्रयोजनादिप्रतिपालनार्थं चादावेवेदं गाथासूत्रमुपन्यस्तवान् ।

**Ends :**

गाहग्गं पुण इत्थ णवरं गणिऊण ठाविअं एअं ।
सीसाण हिअट्ठाए सत्तरससयाणि माणेण ॥ १७१४ ॥

समाप्ता चेयं पंचवस्तुकसूत्रटीका शिष्यहिता नाम कृतिर्धर्मतो याकिनीमहत्तरायाः सूनोराचार्यहरिभद्रस्येति ।

कृत्वा टीकामेनां यदवाप्तं कुशलमिह मया तेन ।
मात्सर्यदुःखविरहाद्गुणानुरागी भवतु लोकः ॥

ग्रंथाग्रं श्लोकतः ॥ ६७०९ ॥

---

**No 4. A Commentary on the Gachchhacharaprakirnaka,** by VIJAYAVIMALAGANI [गच्छाचारपईन्नावृत्तिः—विजयविमलगणिः].

Leaves 1 to 109.

**Begins :**

भट्टारकप्रभुश्री६आनंदविमलसूरिगुरुभ्यो नमः ॥

उद्द्योतं विदधेज्जगामिव भव्यशरीरिणाम् ।
गोविलासैर्जिनेन्द्रोऽसौ जीयाद्वीरविभिश्चिरम् ॥ १ ॥

पद्पद्मं स्वगुरूणां सदा सदाचारचरणचंचूनाम् ।
नत्वा विदधे विवृतिं गच्छाचाराख्यसूत्रस्य ॥ २ ॥

**Ends :**

इति तपागच्छनभोनभोमणि कलिकालगौतमावतारभट्टारकपुरंदरश्री ६ आनंदविमलसूरीश्वरचरणसरसीरुहरजश्चंचरीकायमाणपं०श्रीविजयविमल-गणिविरचितायां गच्छाचाराभिधप्रकीर्णकटीकायां श्रीगुरुपर्वक्रमवर्णनाधि-कारः समाप्तः ॥ ग्रंथाग्रम् ॥ ९८९०

---

**No. 5. Visvalochanakosha** [ विश्वलोचनः ]

Leaves 1 to 99.

**Begins :**

जयति भगवानाप्तानां धर्मः प्रसीदतु भारती
वहतु जगती प्रेमोद्गारं तरंत्वशुभं जनाः ।
अयमपि मम श्रेयान्गुम्फस्तनोतु मनोमुदं
किमधिकमितस्त्यक्तावेगा भवंतु विपश्चितः ॥ १ ॥
सेनान्वये सकलसत्वसमर्थितश्रीः श्रीमानजायत कविर्मुनिसेननामा ।
आन्वीक्षिकी सकलशास्त्रमयीव विद्या यस्यां सवादपदवीव दवीयसीव ॥ २ ॥
तस्मादभूदखिलवाङ्मयपादृदृश्वा विश्वासपात्रमवनीतलनायकानाम् ।
श्रीश्रीधरः सकलसत्कविगुंफतत्वपीयूषपानकृतिनिर्जरभारतीकः ॥ ३ ॥
तस्यातिशायिनि कवेः पथि जागरूको धीलोचनस्य गुरुशासनलोचनस्य ।
नानाकवींद्ररचितानभिधानकोशानाकृष्य लोचनमिवायमदीपि कोशः ॥ ४ ॥
साहित्यकर्मकवितागमजागरूकैरालोकितः पदविदां च पुरे निवासी ।
वर्त्मन्यधीत्य मिलितः प्रतिभान्वितानां चेदस्ति दुर्जनवचोरहितं तदानीम् ॥ ५ ॥
यत्नो ममायमनपायमशेषविद्याविद्याधरीपरिवृढस्य मतौ नियोक्तुम् ।

त्यक्त्वा पुनर्विमलकौस्तुभरत्नमन्यो लक्ष्मीविनोदरसिको रसिकोस्ति धन्यः ॥६॥
नागेंद्रसंग्रथितकोशसमुद्रमध्ये नानाकवींद्रमुखसूक्तिसमुद्भवेयम् ।
विद्वद्ग्रहादमरनिर्मितपट्टसूत्रे मुक्तावली विरचिता हृदि संनिधातुम् ॥ ७ ॥
वीतरागस्य सुरभेर्यशःकुसुमशालिनः ।
श्रितोस्मि चरणस्थानं यः पुंनागत्वमागतः ॥ ८ ॥
स्वरकादिक्रमादादिर्निर्णीतोन्तश्च कादिभिः ।
द्वितीयेप्यत्र वर्णेस्ति नियमः काद्यनुक्रमात् ॥ ९ ॥
अथानेकार्थशब्दसंग्रहः क्रियते ॥

Ends :

इति विश्वलोचनाभिधानकोशेऽव्ययकांडः समाप्तः ॥
समाप्तं चेदं विश्वलोचनाभिधानशास्त्रम् ॥

---

**No. 6. Pradyumnacharitamahakavya,** by RATNASINHA [प्रद्युम्नचरितमहाकाव्यम्—रत्नसिंहः].

Begins :

श्रीमान्नाभिभवः स्वामी श्रियै दिशतु देहिनाम् ।
सर्वज्ञः पुंडरीकाक्षः प्रबुद्धः पुरुषोत्तमः ॥ १ ॥

Ends :

इति श्रीमत्तपागच्छाधिराजहेमसोमसूरिविजयराज्ये प्रद्युम्नचरिते महाकाव्ये कृष्णावसानबलस्वर्गगमनश्रीनेमिनिर्वाणवर्णनो नाम अष्टादशः सर्गः ॥ १८ ॥ ...

श्रीविक्रमात् शशधराद्रिरसक्षमांकसंख्यासु संप्रतिगतासु समासु सम्यक् ।
मासेश्विने स्मरतिथावसिते सुरेज्ये वारे स्मरस्य चरितं रचितं सुचारु ॥ १८ ॥
इति प्रशस्तिः ॥

---

**No. 7. Upadesamalavachuri** [उपदेशमालावचूरिः]

Leaves 1 to 15.

Ends:

उपदेशमालाप्रकरणावचूरिः समाप्ता—लिखिता श्रीतपागच्छाधिराजसोमसुंदरसूरिशिष्यपंडितविवेकसमुद्रगणिशिष्याणुनामरचंद्रेणगणिना स्वपरोपकाराय संवत् १९१८ वर्षे फाल्गुन ११ दिने बुधवारे कर्करामहानगरे ॥ श्रीश्रमणसंघस्य श्रीरस्तु ॥

उपदेशमालाप्रकरणं श्रीधर्मदासगणिना स्वपुत्रप्रतिबोधायकृतमित्याम्नायः ॥ स चैवम्

विजयविजयपुरे विजयसेनो राजा तस्य जयाजयौ देव्यौ जयादेव्या रणसिंहपुत्रो दीक्षां जग्राह। स च जातमात्र एव अजयादेव्या छद्मना त्याजितः। कतिचिद्वत्सरांते ज्ञातो अजयावृत्तांतः। पुत्रं राज्ये संस्थाप्य संजातवैराग्यो विजयसेनराजा जयादेवी भ्रातृविजयसहितः श्रीमहावीरपार्श्वे दीक्षां जग्राह। एकादशांगीमधीतवान्। अत्युग्रतपोविशेषाद्विजयसेनराजर्षेरवधिज्ञानमुत्पेदे। धर्मदासगणिर्लोके नाम प्रसिद्धम्। तेन च स्वपुत्रस्य रणसिंहस्य प्राप्तस्वराज्यस्य कलिच्छलनायालोक्येदं प्रकरणं चक्रे तस्य पठनाय। ततश्च पुत्रमातुलस्य विजयर्षेः सर्वं संभाल्य प्रोक्तं। यत्प्रस्तावे त्वयैतत्प्रकरणपठनोपदेशपूर्वं रणसिंहो बोधनीयः। अन्यदा। विजयमहार्षिर्जयासाध्वीयुतस्तीर्थयात्रां कुर्वन् विजयपुरे समायातः। तमागतं श्रुत्वा रणसिंहनृपो मुनिं वंदितुं गतः। स च तेन पितृवृत्तांतभवनपूर्वमुपदेशमालां श्रावितः, सकृच्छ्रवणेपि तस्य कंठगता जाता। ततश्चार्थं परिभावयतस्तस्य वैराग्यं जातं क्रमेण दीक्षां लात्वा शिवं जगामेति वृद्धाम्नायः ॥ इति श्रीउपदेशमालोत्पत्तिप्रबंधः।

---

**No. 8. The Mulasuddhiprakarana or Sthanakani,** by PRADYUMNASURI, with a commentary by DEVENDRACHARYA [मूलशु॰ द्धिप्रकरणं सटीकम्— मू॰ मा॰ प्रद्युम्नसूरि:—टी॰ देवचन्द्राचार्यः].

Leaves 1 to 384.

Commentary begins:

ॐ नमः सर्वज्ञाय ।

बाल्त्वे शैलराजं चलदखिलधरामंडलं कंपयित्वा
शुद्धं सम्यक्करत्नं सुरविसुरपतेर्मानसे यश्चकार ।
तं नत्वा वर्द्धमानं चरमजिनपतिं मूलशुद्धेः स्वशक्त्या
स्पष्टां व्याख्यां विधास्ये निजगुरुचरणद्वंद्वसद्भक्तियोगात् ॥ १ ॥

तत्र श्रीसुगृहीतनामधेयो भगवान् श्रीमत्प्रद्युम्नसूरिः श्रमणोपासकप्रतिमासंक्षिप्तस्वरूपावबोधशुद्धिश्रावकप्रार्थनातः संक्षेपत एव तत्स्वरूपमभिधातुकामो मिथ्यात्वांधकारबहलपटलांतरितदर्शनान् भूरिभव्यजीवानपि भगवत्सर्ववेदिप्रभुप्रणीतप्रवरवचनप्रतिपादितप्रकरणोपलंभतदवबोधकं दिनकर इव भास्वरकरनिकरमादित्य एव दर्शनप्रतिमायां किंचिद्विशेषस्वभावाविर्भावकं मूलशुद्ध्यभिधानं स्थानकानीत्यपरनामकं प्रकरणमारब्धवान् ।

Commentary ends:

इति श्रीदेवचंद्राचार्यविरचितमूलशुद्धिस्थानकविवरणं समाप्तम् ॥
आसीच्चंद्रकुलांबरैकशशिनि श्रीपूर्णतल्लीयके
गच्छे दुर्धरशीलधारणवरैः संपूरिते संयतैः ।
निःसंबंधविहारहारिचरितश्चंचच्चरित्रः शुचिः
श्रीसूरिर्मलवर्जितोर्जितमतिप्राद्युम्नदेवाभिधः ॥ १ ॥
तच्छिष्यश्री(धर)गणिरभव - - - - - - - - मन्वितः ।
नरनायका - - - - - - निर्मुक्तः ॥ २ ॥

सूरिस्ततोभूद्गुणरत्नसिंधुः श्रीमान्यशोभद्र इति -संज्ञः ।
विद्वान् क्षितीशैर्नतपादपद्मः स नैष्ठिको निर्मलशीलधारी ॥ ३ ॥
निरागोपि विधानतो निजजनुः संशिल्य सर्वादरात्
सर्वाहारविवर्जनादनशनं कृत्वोज्जयंते गिरौ ।
कालेप्यत्र कलौ त्रयोदश दिनान्याश्चर्यहेतु --
शंस्यं पूर्वमुनीश्वरस्य चरितं संदर्शयामास यः ॥ ४ ॥
तच्छिष्यो भूरिबुद्धिर्मुनिवरनिकरैः सेवितः सर्वकालं
सच्छास्त्रार्थप्रबंधप्रवरवितरणाल्लब्धविद्वत्सुकीर्त्तिः ।
तेनेदं स्थानकानां विरचितमनघं सूत्रमत्यंतरम्यं
श्रीमत्प्रद्युम्नसूरिर्जितमदनभटोभूःसतामग्रगामी ॥ ५ ॥
राद्धांतस्तर्कसाहित्यशब्दशास्त्रविशारदः ।
निरालंबविहारी च यः शमांबुमहोदधिः ॥ ६ ॥
सिद्धांतदुर्गमसहोदधिपारगामी कंदर्पदर्पदलनोनघकीर्त्तियुक्तः ।
-.-.-
ग्रंथाग्रं १३०००

---

**No. 9. Sarasvatatika,** by Punjaraja [सारस्वतटीका—पुञ्जराजः].

Begins :

आनंदैकनिधिं देवमंतराय तमोरविम् ।
दयानिलयनं वंदे वरदं द्विरदाननम् ॥ १ ॥
इति प्रसन्नया वाचा विविच्यार्थमशंसयम् ।
टीकासारस्वतस्येयं यथामति विनिर्मिता ॥ १ ॥
हिमालयादामलयाचलं यो विशोभयामास महीं यशोभिः ।
आसीन्नृपालस्पृहणीयसंपत्साधुः सदेपाल इति प्रसिद्धः ॥ २ ॥
आर्येषु वर्यः परकार्यधुर्यः स्मर्यः सतां पौरसरोजसूर्यः ।
तत्सूनुरौदार्यनिधिर्बभूव कोराभिधो दुर्द्दवार्यधैर्यः ॥ ३ ॥

तत्सेवितो ललितलक्षणकांतमूर्तिराशाप्रसादनकरः सदनं कलानाम् ।
जैवातृकः कुवलयप्रथितोपकारः पामाभिधान उदियाय ततो नृसोमः ॥ ४ ॥
प्रथितविपुलश्रीश्रीमालान्ववायविशेषकः
सकलजगतीजाग्रत्कीर्तिः सुधीरनसूयकः ।
अमितविभवो गोवासाधुस्ततोऽजनि जानकी-
रमणचरणप्रेमानंदादुदंचितसात्त्विकः ॥ ५ ॥
तत्सुतः सुकृतशोभितसंपत्प्रीणितावनिवनीपक आसीत् ।
वैभवेप्यविकृतो भुवि मूर्तः पुण्यराशिरिव यांपचसाधुः ॥ ६ ॥
अभूत् कुटुंबस्थितिभारधारिणी मदी यदीया सहधर्मचारिणी ।
सदान्नदानावृतदीक्षया जनं कुशेशयाकारशया पुपोष या ॥ ७ ॥
तन्नंदनौ सुमतिसाधितपौरुषार्थावापन्निमग्नजनतोद्धरणे समर्थौ ।
ख्यातौ गणौ जगति जीवनमेघसंज्ञावाज्ञावशीकृततनू सरूपावभूताम् ॥ ८ ॥
श्रीविलासवतिमंडपदुर्गे स्वामिनः खलचित्ताहिगयासात् ।
प्राप्य मंत्रिपदवीं भुवि याभ्यामर्जितोर्जितपरोपकृतिश्रीः ॥ ९ ॥
जीवनो भुवनपावनकीर्त्तिः मंत्रिभारमनुजे विनिवेश्य ।
ब्रह्मवित् स जगदीश्वरपूजाकौतुकेन समयं समनैषीत् ॥ १० ॥
नमदवनसमर्थस्तत्त्वविज्ञानपार्थः
सुजनविहिततोषः श्रीनिधिर्वीतदोषः ।
अवनिपतिशरण्यात्प्रौढधीर्मेघमंत्री
मफरलमलिकाख्यां श्रीगयासादवाप ॥ ११ ॥
पतिव्रती जीवनधर्मपत्नी धन्या मकूनाम कुटुंबमान्या ।
श्रीपुंजराजाख्यमसूत पुत्रं मुंजं च लैस्तैश्चरितैः पवित्रम् ॥ १२ ॥
जयति मदनमुद्रः मज्जनप्रेमसांद्रः
सगुणमणिसमुद्रः कीर्त्तिविद्योतचंद्रः ।

नयविनयविनिद्रः पुण्यलक्ष्मीसमुद्रः
समरसमयरुद्रः पुंजराजो नरेंद्रः ॥ १३ ॥
यस्याभाति सभातिरस्कृतमदप्रह्वप्रभावोद्धुर-
क्षोणीमंडनमंडलेश्वरमहाराजन्यमान्यान्विता ।
विद्यावृंदविनोदमोदविभवद्रोमांचविद्वद्वचो-
जाग्रद्गीःसरस्वतीनिवसतिर्लक्ष्मीविलासायिता ॥ १४ ॥
अनुजे गुणवत्युदारचित्ते गुरुदेवद्विजभक्तिभाजि मुंजे ।
य उपाहितराजकार्यभारः प्रभुतासौख्यमनाकुलं बिभर्त्ति ॥ १५ ॥
रसोल्लसितया गिरा चतुरचित्तमानंदयन्
कलासु सकलासु यः कलितकेलिकौतूहलः ।
विमत्सरतया दधन्निखिलशास्त्रतत्वज्ञतां
करोति करुणाकरो वनमनीषिसंमाननाम् ॥ १६ ॥
प्रतिगृहमभिगम्य स्वर्णनिष्कान्विताना-
मुपचितकृतकानां मोदकानां प्रदानैः ।
विदलितदुरवस्थान् लक्ष्यसंख्यान् गृहस्थान्
अतुलितमहिमा यः क्षामकालेऽप्यनंदत् ॥ १७ ॥
अनिवारितवांछितार्थदानैरतिदुर्भिक्षबुभुक्षयार्दितानाम् ।
गणशः समुपेयुषां जनानामकरोज्जीवितरक्षणं यदेकः ॥ १८ ॥
अनेकशो येन विधीयमानैस्तुलादिदानैरुपलब्धसंपत् ।
विद्वज्जनो दीव्यति विंदमानः श्रीभारतीसंनिधिसख्यसौख्यम् ॥ १९ ॥
विबुधानभिनंदतो विपक्षक्षितिभृज्ज्ञातपराक्रमस्य (तस्य)।
उदयद्युधिचापताम्बु शंसत्यरिनारीनयनेषु भूरिवर्षम् ॥ २० ॥
योयं रुचिरचरित्रो गुणैर्विचित्रैरपि प्रसभम् ।
दिग्दंतावलदंतावलीव लक्षं यशस्तनुते ॥ २१ ॥

सोयं टीकां व्यरचयदिमां चारुसारस्वतस्य
व्युत्पित्सूनां समुपकृतये पुंजराजो नरेंद्रः ।
गंभीरार्थे रुचितविवृतैः स्वीयसूत्रैः पवित्रा-
मेनामभ्यस्यत इह मुदा शारदा सुप्रसन्ना ॥ २२ ॥
इति श्रीमालकुलश्रीमालभारश्रीपुंजराजविनिर्मिता सारस्वतटीका संपूर्णा ॥

---

**No. 10. Suktidvatrinsikavivarana** [ सूक्तिद्वात्रिंशिकाविवरणम् ].

**Begins :**

श्रीपार्श्वजिनमानम्य पूर्वं दिग्व्याकृतां स्वयम् ।
सूक्तिद्वात्रिंशिकां भावभेदतो विवृणोम्यहम् ॥ १ ॥

**Ends :**

अथ कदायं ग्रंथः संजात इति शंकानिराकरणाय विवरणांतश्लोकानाह—
पंचाशन्नृपसंख्यांके वर्षे विक्रमवत्सरात् ।
चैत्रशुक्लत्रयोदश्यां ग्रंथोयं रचितो मुदा ॥ १ ॥
द्वात्रिंशता दोधकानां वृत्तैरन्यात्मबोधये ।
विवृतोपि स्वयं शीघ्रं विशोध्योतिविचक्षणैः ॥ २ ॥
श्रीजाबालपुरे प्राज्यं राज्यं शासति शक्तितः ।
गजनीयवनाधीशे तरुणं तरुणिप्रभे ॥ ३ ॥
यावच्छशिरविदीपे मणी भांतो नभस्तले ।
तावद्दोधकवृत्तानीमानि नंदंतु सन्मुखे ॥ ४ ॥

इति श्रीसूक्तिद्वात्रिंशिकाविवरणं समाप्तमिति ॥ वृत्तिग्रंथसंख्या १९८-श्लोक ४ संवत् १६९१ श्रावणशुदि १४ शुक्रे पत्तने गुणजी ---

---

**No. 11. Vakyapradipa,** by HARIVRISHABHA [वाक्यप्रदीपः—हरिवृषभः].

Begins:

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।

विवर्त्ततेर्थभावेन प्रक्रिया जगतो यतः ॥ १ ॥

Ends:

अर्थप्रतिपत्तिरभ्यासाद्वा प्रमत्तानामक्षिनिकोचनादिवत्संप्रत्ययशब्दमात्रं जायते।

इति श्रीहरिवृषभमहावैयाकरणविरचिते वाक्यप्रदीपे आगमसमुच्चयो नाम ब्रह्मकांडः समाप्तः ॥

ग्रं० १००० श्रीमत्संवत् १६७९ वर्षे प्रथम---

---

**No. 12. Jainadharmavarastavana,** by BHAVAPRABHASURI--with Author's Commentary [जैनधर्मवरसंस्तवनं—सटीकम् द्वयोः भावप्रभसूरिः].

Commentary begins:

नत्वा पार्श्वजिनेंद्राय गुरवे वाणयेपि च।

कल्याणमंदिरांत्यांघ्रिसमस्यारचनाश्रितम् ॥ १ ॥

जैनधर्मवरस्तोत्रं कृतं यन्मयका मुदा।

तस्य च क्रियते वृत्तिः श्रीभावप्रभसूरिणा ॥ २ ॥

Text ends:

इति श्रीकल्याणमंदिरांत्यपादसमस्यामयं श्रीजैनधर्मवरसंस्तवनं श्रीभट्टारकश्रीश्रीभावप्रभसूरिणा विरचितं सूत्रतो वृत्तितश्च संपूर्णम् ॥

शुभं भवतु ॥ कल्याणमस्तु ॥

Commentary ends:

चंद्रनवसप्तैकमिते १७९१ वर्षे मार्गशीर्षशुक्लपक्षाष्टम्यां तिथौ संपूर्णा जाता पंडितजनैर्विशोधनीया मयि कृपां कृत्वा संवत्१७९१ चैत्रवदि चतु-

ध्यां तिथौ चंद्रवारे अणहिलपुरपत्तने ढंढेरपाटके श्रीभावप्रभसूरिचरणसरोजरोलंबायमानशिष्यपुण्यरत्नेन प्रथमादर्शे लिखितं पुस्तकमिदम् ॥ वाच्यमानं चिरं नंद्यात् ॥ श्रीः ॥

# APPENDIX III.

## Extracts from MSS. purchased for Government.

# Extracts from MSS. purchased for Government.

**No. 52. Rudrasutra,** by ANANTADEVA [रुद्रसूत्रम्—अनन्तदेवः].

**Begins:**

सिद्धिबुद्धिप्रदातारं विघ्नव्यूहविदारणम् ।
महागणपतिं वन्दे भक्तकल्पमहीरुहम् ॥ १ ॥
श्रीनृसिंहं रमानाथं सच्चिदानन्दविग्रहम् ।
विधीन्द्रादिभिराराध्यं भक्तकामदुघं भजे ॥ २ ॥
सच्चिदानन्दरूपाय शिवादेहार्द्धधारिणे ।
नम ॐकारवाच्याय शिवायाभीष्टदायिने ॥ ३ ॥
याज्ञवल्क्यमुनीन्नत्वा कात्यायनमुनींस्तथा ।
श्रीगुरून्पितरौ रुद्रग्रन्थकर्तॄंस्तथा परान् ॥ ४ ॥
श्रुतिं शतपथं वीक्ष्य बृहत्पाराशरीं स्मृतिम् ।
बौधायनमुनेः सूत्रं श्रीमदुद्धवसूनुना ॥ ५ ॥
तन्यतेऽनन्तदेवेन रुद्रकर्मप्रकाशकम् ।
उपकाराय सर्वेषां सूत्रं वाजसनेयिनाम् ॥ ६ ॥
अथातः पचाङ्गरुद्राणां न्यासपूर्वकजपविधिं व्याख्यास्यामः ॥

**Ends:**

श्रीमदुद्धवपुत्रेण काशीपुरनिवासिना ।
धीमतानन्तदेवेन श्रुतिस्मृतिसमुद्धृतम् ॥ १ ॥
त्रैवेद्यमोढसंज्ञेन रुद्रसूत्रं समार्पितम् ।
मदीयनामयोर्विष्णुवन्द्ययोः शिवपादयोः ॥ २ ॥
मुहुर्मुहुः प्रार्थयेहं सज्जनान् शुद्धमानसान् ।
ममोक्तमिह संशोध्यं विचार्य सदसच्च यत् ॥ ३ ॥

यश्च श्रमः समुत्पन्नो ग्रन्थस्यास्य विलेखने ।

सर्वात्मानेन विश्वेशः प्रीयतां परमः शिवः ॥ ४ ॥

श्रीमदुद्धवात्मजानन्तदेवविरचितं रुद्रप्रसादकाख्यं रुद्रसूत्रं संपूर्णम् ॥ ॥

---

**No. 73. Sarvanukramanipaddhati,** by YAJNIKASHRIDEVA [सर्वानुक्रमणीपद्धतिः—याज्ञिकश्रीदेवः].

**Begins:**

अथ वाजसनेयावान्तरभेदमाध्यंदिनीयाख्ययजुर्वेदसंहितामन्त्राणामृषिश्छन्दांस्यभिधीयन्ते । ते च मन्त्रा द्विविधा ऋग्रूपा यजूरूपाश्च । तत्र नियताक्षरपादावसाना ऋगित्युच्यते । अनियताक्षरपादावसानं यजुरिति ॥

**Ends:**

तेजोमयो ब्रह्ममयोऽमृतमयो भूत्वा ब्रह्मैवाभिगच्छति ॥

इति श्रीत्रिरग्निचित्सम्राट्स्थपतित्रिंशत्क्रतुकृन्महायाज्ञिकश्रीप्रजापतिसुतेनाग्निचित्सम्राट्स्थपतिपञ्चदशक्रतुकृद्याज्ञिकदेवकृतायां सर्वानुक्रमणीपद्धतौ चतुर्थोऽध्यायः ॥

समाप्ता चेयं सर्वानुक्रमणीपद्धतिः ॥ संवत् १७८७ वर्षे भाद्रपदे सोमवारे द्वितीयायां लिखितम् ॥ ॥

---

**No. 96. Grahamakhatilaka,** by MADHAVA [ग्रहमखतिलकः—माधवः].

**Begins:**

स्वस्ति श्रीगणेशाय नमः ॥ अथ ग्रहमखतिलको लिख्यते ॥

गगनगगणपेनांभोजयोन्यब्धिवासो-

भृदधिपतिसुतेनानन्दन्तिवक्त्रं च धीदान् ।

गुहमपि विधिपुत्रीं सिद्धयेऽहस्करादी-
न्गगनगमनवर्यान्बुद्धिवृद्धयै समीडे ॥ १ ॥
कृपा यदीया शरणागतानामुन्मूलिनी जाड्यमहाद्रुमस्य ।
सुदुस्तरेऽस्मिन्भवसागरे नौर्नमोस्तु तेभ्यः सततं गुरुभ्यः ॥ २ ॥
नानाविधग्रंथगतं हि सारमेकत्र कृत्वा तिलको ग्रहाणाम् ।
मखस्य लोकोपकृतिं विधातुं विरच्यतेऽयं कविमाधवेन ॥ ३ ॥

Ends :

आसीदाचार्यवंशे धरणिसुरवरः श्रीभरद्वाजगोत्रे
कृष्णाचार्यः प्रसिद्धः शिवभजनरतो विश्वमित्रः पवित्रः ।
तत्पुत्रो माधवाख्यः कृतिकृतविविधग्रंथसारं गृहीत्वा
चक्रे लोकोपकृत्यै ग्रहमखतिलकं सर्वसारं सुबोधम् ॥ १ ॥
इति श्रीमाधवाचार्यविरचितो ग्रहमखतिलकः संपूर्णः ॥

---

**No. 109. Danapanjika,** by SURYAKARASARMA [ दानपञ्जिका— सूर्यकरशर्मा ].

Begins :

नीवीबन्धविधूननोद्यतकरो राधारतेरिच्छया
कृष्णस्तत्क्षणमागतामभिमुखीं दृष्ट्वा यशोदां नुदन् ।
हे मातर्निजगोप गोपवनिता मत्कन्दुकं वाससी-
त्येवं व्याजमुदीरयन्हरतु वः पापानि धूर्त्तक्रियः ॥ १ ॥
द्रोणवंशसमुत्पन्नो देवसिंहतनूद्भवः ।
धर्मकर्मरतः श्रीमान् नरराजो विराजते ॥ २ ॥
श्रीमता नरराजेन सर्वपापप्रणाशिनी ।
क्रियते दानपञ्जीयं कलौ गङ्गेव निर्मला ॥ ३ ॥

नानापुराणमालोक्य सारमुद्धृत्य यत्नतः ।
कृतासौ द्विजमुख्येन श्रीसूर्यकरशर्मणा ॥ ४ ॥

Ends:

बल्किर्दानैर्जितो येन येन कर्णोऽप्यधः कृतः ।
तेन श्रीनरराजेन येन पङ्क्ती प्रचारिता ॥
महादानपङ्क्ती नरराजदेवेनालोकिता वाक्यपरंपराभिः ।
सा शुद्धवाणी हृदि कामिनीव स किन्नराणां मुदमातनोतु ॥

इति समस्तप्रक्रियाविराजमानमहाराजाधिराजश्रीमत्कीर्तिसिंहदेवानामाज्ञया दानवाक्यस्य पुस्तकं समाप्तमिति ॥ ॥ सं. १८७२ ॥

---

No. 139. **Vaishnavadharmasuradrumamanjari,** by SANKARSHANA [वैष्णवधर्मसुरद्रुममञ्जरी—संकर्षणः].

Begins:

सर्वज्ञो जगतः कर्ता भक्ताभीष्टप्रदो विभुः ।
यः केशवो नमामस्तं शरण्यं भक्तवत्सलम् ॥ १ ॥

Ends:

पूर्वाचार्यैः सदाचारादिग्रन्थेषु सर्वविधोक्तधर्माणां विस्तरेण निरूपितत्वादिह मन्दमतीनामुपकाराय संक्षेपः कृतः ॥

सद्धर्मसेविनः पुंसो भगवान् भक्तवत्सलः ।
स्वपदं प्रापयत्येव माधवस्तं सदा श्रये ॥ १ ॥
श्रीनिम्बार्कपदाम्भोजस्मरणोद्बुद्धबुद्धिना ।
संक्षिप्तोऽयं शास्त्रसारो जिज्ञासूनां हिताय वै ॥ २ ॥

इति श्रीभगवन्निम्बादित्याचार्यमतानुवर्तिकाश्मीरिकेशवभट्टानुयायिना संकर्षणशरणेन विरचिता वैष्णवधर्मसुरद्रुममञ्जरी समाप्ता ॥ ॥

---

**No. 210. Nyayasiddhantadipa,** by Sasadhara, with the Commentary of Seshananta [न्यायसिद्धान्तदीपः—सटीकः मू० शशधरः टी० शेषानन्तः].

Begins:

दृष्ट्वा कौस्तुभादिव्यदर्पणमुरः सासूयमुत्क्षिप्तया
दृष्टया कामपि पूर्वपक्षरचनामालक्ष्य लक्ष्म्या हरेः ।
जीयासुः प्रतिबिम्बिमुत्तरयितुं मुक्तां विवाहोत्सवे
तस्याः स्वप्रतिबिम्बिचुम्बिनि कुचद्वन्द्वे कटाक्षच्छटाः ॥ १ ॥
स्तनकलशतटीनटीं विपश्चोमुचितपदे परितोषयन्त्यपाङ्गैः ।
दलयति दुरितानि तन्निनादप्रमदविकम्पितकुण्डला मृडानी ॥ २ ॥
स्वप्रभूतप्रतापेन शेषक्लेशजिहीर्षया ।
जमदग्निकुले जज्ञे पद्मनाभः किल प्रभुः ॥ ३ ॥
ॐकारः पितृपूजनोपनिषदामाश्चर्यकर्मोचितः
सत्कारः फणिरत्नसूचिशिखरप्रान्ते नटन्त्या भुवः ।
न्यक्कारो बलिनः कुले द्विजकुलप्राचीनपुण्याङ्कुर-
प्रस्तारः स हरेः सहस्रकरजिह्लीलावतारः परः ॥ ४ ॥
अलंकरिष्यन् स महेन्द्रपीठमुत्कण्ठया भक्तजनस्य भूयः ।
वियोज्यमानाक्षितिखेदशांत्यै प्रतापनाम्नावतरं बभार ॥ ५ ॥
स्वर्गापवर्गफल — — — — — दद्वा
यज्ञाशनो — — हिताः स्वहितानुरागात् ।
तत्पूजनोपनिषदः कलिकालसिन्धौ
यः कर्णधार इव ताः पुनरुद्दधार ॥ ६ ॥
सदा सेव्यः स्वादुः परमचपलाल्लङ्घनलघुः
श्रुतीनामध्वानं जल्कलकलेनाविदलयन् ।

निबन्धो यस्योच्चैर्विविधविधिरत्नौघसुभगः
परीहासः सिन्धोरतिविशदबन्धो विजयते ॥ ७ ॥
साहित्यभक्तिरसरङ्गयदुक्तिभङ्गे
झंपानिपातविधिना वसुधां विहाय ।
पातालसीमानि भुजंगसमर्पिताङ्गी
स्वर्गं सुधापि चकमे न पुनर्धरित्रीम् ॥ ८ ॥
ज्ञानाध्वानं शशधरकृतिव्याकृतिव्यक्तयुक्ति-
प्रत्यापन्ने द्रढिमवपुषा तर्कतन्त्रेण सम्यक् ।
व्यक्तीकर्तुं सदुपकृतये सप्रतापावनीन्द्रः
शेषानन्तप्रणयकवि – – – – – – निबंधम् ॥ ९ ॥
सोयं शशधराचार्यकृतिव्याकृतिकेतवान् [ कैतवात् ] ।
ततः शार्ङ्गधरादिष्टपुष्टिधीरुपतिष्ठते ॥ १० ॥
उचितमनुचितं वा कर्म निर्मातुमेकः
प्रभवति नरवीरस्तत्र धीरः स रामः ।
इति कृतिषु न युक्ता वक्तुमौचित्यनिष्ठा
तदपि गुरुकृपायामस्ति नः प्रत्ययोपि ॥ ११ ॥

ॐ विशिष्टशिष्टाचारानुमिते श्रुत्युपदिष्टाभीष्टोपायताकमिष्टदेवतानमस्कारं शिष्यशिक्षायै निबध्नन्प्रेक्षावत्प्रत्यपेक्षितमनुबन्धचतुष्टयं सूचयन्नेव चिकीर्षितं प्रतिजानीते ॥ ध्वंसितेत्यादिना ॥

Ends:

इति श्रीसकलसामन्तचक्रचूडामणिमरीचिमञ्जरीपरागपिञ्जरितचरणकमलकलिकर्णावतारश्रीमत्प्रतापराजोद्योजितशेषानन्तविरचितायां न्यायसिद्धान्तदीपप्रभायामीश्वरप्रकरणम् ॥

शशधरग्रन्थस्य व्याख्यानमालम्ब्य संप्रत्यचीक्लृपत् ।

षट् सहस्रा शतान्यष्टौ शेषा – – – – वादि – – – – – – ॥

संवत् १६२६वर्षे कार्तिकशुदि १४दिने० ॥

---

**No. 274. Bhagavannamakaumudi,** by Lakshmidhara [भगवन्नामकौमुदी—लक्ष्मीधरः].

Begins:

अंहः संहरदखिलं सकृदुदयादेव सकललोकस्य ।

तरणिरिव तिमिरजलधिं जयति जगन्मङ्गलं हरेर्नाम ॥ १ ॥

कारुण्यामृतनिर्झरः सुरसरिज्जन्माकरः श्रीवधू-

लीलाब्जं व्रजकामिनीकुचतटीकस्तूरिकास्थासकः ।

उत्तंसः सुरयोषितां मुनिमनोवश्यौषधीपल्लवो

यस्याङ्घ्रिः सुखल्लभः स जयति श्रीपुण्डरीकाप्रियः ॥ २ ॥

करुरुहकुलिशैर्द्विषतां चरणाम्बुजनखकान्तिभिर्भजताम् ।

हृदयग्रन्थीन्भिन्दन्मनासि नृसिंहः समुल्लसतु ॥ ३ ॥

यदङ्घ्रिरेणुबीजानि जनैरुप्तानि मूर्द्धसु ।

सद्यः सुरद्रुमायन्ते श्रीधरः स श्रियेऽस्तु नः ॥ ४ ॥

उल्लसति लोचनाग्नौ जगदवदानानि जुह्वतो यस्य ।

प्रथमाहुतिर्मनोजः स जयति देवः पुरां भेत्ता ॥ ५ ॥

यत्पादपद्मनखकान्तितरंगजीर्येजम्बालजाङ्घिकधियां न धियामभूमिः ।

निःसीमसौख्यजलधिर्जयतादनन्तः सोऽस्मद्गुरुर्जगदनुग्रहजागरूकः ॥ ६ ॥

अपि च ॥

अधीशं निःस्वानां शमदमतटीषु प्रवसता-
मशेषाणामाद्यं गुणगरिमनिर्मुक्तमपि यम् ।
मृषा मानाद्दूरं श्रुतिरुपचरन्ती सविनयं
शनैर्यत्नादन्तर्नयति सुभगानां परिवृढम् ॥ ७ ॥
चेतश्चकोरसंतोषपीयूषाम्बुधिवृद्धये ।
इयं विस्तार्यते श्रीमद्भगवन्नामकौमुदी ॥ ८ ॥
अत्र श्रीभगवन्नाममाहात्म्यप्रतिपादकानि पुराणवचनान्युदाहृत्य विचार्यते ॥

Ends:

इति श्रीमदनन्तानन्दरघुनाथपरमहंसपरिव्राजकाचार्यपादपद्मोपजीविनः श्रीमन्नृसिंहसूनोर्लक्ष्मीधरस्य कृतौ भगवन्नामकौमुद्यां नामकीर्त्तनस्य केवलस्यैव पुरुषार्थत्वप्रतिपादनं नाम तृतीयः परिच्छेदः ॥ समाप्तोऽयं ग्रन्थः ॥

---

**No. 307. Rijuvimala** by SHALIKANATHAMISRA [ऋजुविमला नाम पञ्जिका—शालिकनाथमिश्रः].

Begins:

आम्नायस्य क्रियार्थत्वात् । उक्तं कार्यमर्थं प्रतिपादयतो वेदस्य प्रामाण्यम् ॥ अस्यार्थः । कार्यमर्थं प्रधानतया प्रतिपादयतो वेदस्य प्रामाण्यमुक्तम् । प्रामाण्यव्युत्पत्तेर्व्युत्पत्त्यायत्तत्वाच्च तस्येति सहेतुकं प्रामाण्यमनुभाष्य पूर्वपक्षमिदानीमाह । यस्य पुनः कार्येऽर्थेऽन्वयो नावगम्यते । अकार्यतया तस्य कथं प्रामाण्यम् ।

पत्रे १९—महामहोपाध्यायश्रीशालिकनाथमिश्रकृतायामृजुविमलाख्यायां पञ्चिकायां प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः॥ ...

**Ends:**

सामसु अत्र कालविधानमेव मन्वानो न शक्नोति पूर्वपक्षयितुं विकृताभावार्थविधानात्। दर्शनग्रहाधिकरणवदप्रतिपक्षत्वाच्च भावार्थविधानस्येत्युक्तम्। अनेकगुणश्रवणाच्चेत्यपि द्रष्टव्यम्। अतः स्तुत्यन्तरमेवेदम्। सामविशिष्टं विधीयते दानवद्दानान्तरकार्ये स्तुतिरपि स्तुत्यन्तरकार्ये वर्त्तेत इति पूर्वपक्षयति समानजातीयत्वात्स्तुतिः स्तुत्यन्तरकार्ये वर्त्तेत इति शक्यते वक्तुमिति प्राकृतस्तुतिनिवृत्तिः राद्धान्तस्तु स्यादेतदेवं। यदि गुणमात्रविधिः स्यात्क्रौञ्चादिवत्। इह तु विशिष्टविधानं अन्यथा यदि विशिष्टविधानं नाश्रीयते तदा यथाश्रुतान्वयानुपपत्तिः देशविशिष्टस्याप्यन्वयावगमात्। ततः किं यदि विशिष्टविधानं न स्तुत्यन्तरकार्ये वर्त्तेत इति शक्यते वक्तुम्। अदृष्टार्थत्वात्स्तुतीनां दानेन दृष्टार्थतया युक्तो दानान्तरेण वैकृतेन प्राकृतदानप्रत्याम्नायः। न तु भाष्यकारेण साम्नां निवृत्तिरित्युक्तं न स्तुत्यन्तरेण स्तुतीनां निवृत्तिरित्युक्तं अतो भाष्यविरोधः उत्तरं फलतस्तद्वत्।

---

No. 308. **Tripadinitinayanam** by MURARI [त्रिपादीनीतिनयनम्—मुरारिः].

**Begins:**

ॐ नमः सरस्वत्यै॥

॥ आम्नायस्य॥ १।२।१। उक्तं कार्यमर्थं प्रतिपादयतो वेदस्य प्रामाण्यं न चार्थवादानां कार्यार्थता विधिना सहैकवाक्यत्वे प्रमाणाभावात्। तस्मादप्रामाण्यमिति परेषां पूर्वपक्षः। ननु तेषां सिद्धेऽपि व्युत्पत्तेः कथं कार्या-

र्थत्वमेव, तत्राध्ययनविधिबलात् सिद्धस्यार्थस्य निष्प्रयोजनत्वादिति केचित्त-दयुक्तम्। तथा सति तद्बलादेवैकवाक्यत्वप्रसङ्गात्। तस्माद्धर्मप्रामाण्यासिद्धार्थतया न संभवति तच्चिन्तनीयमित्यभिप्रायः। कथमेकवाक्यताविरहः कार्यस्य कार्येण सहान्वयात् अर्थवादार्थस्य च सिद्धत्वात् कथं तर्हि नियोज्यान्वयो नियोज्यस्याकार्यत्वात् तत्र निरूढे नियोगेन सिद्धार्थान्वयो नियोज्यान्वयस्तु अनिरूढ एवार्थ इति केचित्। तत्र निर्युक्तिकत्वात्। तथाप्यर्थवादानामनिरूढ एवान्वयोस्त्विति बोधानिवृत्तेः अनिर्वाहकत्वाद-निरूढिदशायां नान्वय इतिवत्। एवं तर्हि न सिद्धत्वे हेतुः स्यात् तथापि निरूढिदशायामनन्वये सिद्धत्वं हेतुरिति चेत् न कालादेरप्यन्वयदर्शनात्। तेषामपि क्रियानिवेशेन साध्यतेति चेत् न अन्योन्याश्रयापत्तेः॥ क्रियान्वये साध्यता साध्यत्वे च क्रियान्वयः इति तस्मादेवं वाच्यम्। कृत्यनुरञ्जनयोग्यं कार्यमत्राभिप्रेतं तच्च द्वयं नियोज्यकोटिर्विषयकोटिश्च। कोटिद्वयबहिर्भूतं सिद्धमभिप्रेतम्। न चातीतस्य चोदनादेर्वर्त्तमानस्यच वायुक्षेपिष्ठत्वादेःकोटिद्वये योग्यता विद्यत इति नैकवाक्यत्वम्। राद्धान्तस्तु। यद्यप्येकवाक्यता न प्रतीयते तथाप्यध्ययनविधिना सार्थस्य वेदस्य प्रयोजनवदर्थपरत्वापादनात्।

**Ends:**

इदं तु वाच्यम् मत्वर्थोपलक्ष्यमाणः केन लक्ष्यते। यदि प्रातिपदिकेन ततः पशुना यजेतेति वाक्ये पशुपदेन पशुमद्यजेर्लक्षितत्वात् करणैकत्वे पशुमद्यागे स्याताम्। गङ्गायामिवेत्यत्र तीरगतमधिकरणत्वं न तु जलगतम्। अथ पशुपदेन यागवान् स्वार्थो लक्ष्यते धवपदेन खादिरवान् स्वार्थो न तु पशुमान् यागः। ततः पशुगत एव करणत्वे उच्यते। तन्न। तथापि तादृशेन गुणेन यजिनान्विताभिधानं कर्तव्यमिति। तं प्रति साध्यत्वेनार्थोप्रणीय इति कुतो न वैरूप्यम्। न चैवं पशुपदेन मत्वर्थलक्षणा स्यात्। मतुपः प्रातिपदिकार्थमुक्तार्थप्रातिपादकत्वात्। अथ यजिपदे मत्वर्थलक्षणा तदा

तस्य विधायकत्वं मत्वर्थलक्षकत्वं चेति विरोधः । तत्र केचिद्याजिपद-मेव लक्षकमाहुः । ननु ततः परोत्पन्नो मतुप्प्रत्ययः किं नु पशु-मान्याजिरिति लक्षणार्थः । तदा च पशुपदमर्थवादः । तस्य तु यादृशमुपनेयं तद्वतो याजिना स्वार्थस्य लक्षणात् । पशुपदमेव पश्वाभिकरणेति विचारि-तम् । अत एव पाञ्जिकायामुद्भिन्नत्वेति मत्वर्थलक्षणा दर्शिता । याजि-नैव तादृशस्य लक्षणात् । न च लाक्षणिकत्वे विधायकत्वं न भवतीति वा-च्यम् । प्रत्यायकस्य विधायकत्वात् । अन्ये तु पशुपदमेव लक्षकं किं तु न प्रातिपदिकमात्रम् । ततश्च विभक्तिमुख्यानुगतमेव स्वार्थमाह । प्रत्ययार्थ-युक्तश्च प्रातिपदिकार्थो निष्पन्नः समासपदस्यापि लक्षकत्वात् । तस्मात्प-शुनेति पद एव लक्षणा नष्टेति वाच्यम् । समासपदस्यापि लक्षकत्वात् । तस्मात्पशुनेति पद एव लक्षणा मत्वर्थस्य । न तु प्रातिपदिकमात्र एव अत एवाह ।

मत्वर्थो वाक्यवेलायामात्मवाक्यवशाद्भवेत् ।
एकार्थपदवेलायां गृह्यमाणो हि दुर्वचः ॥

तस्मात्सिद्धमुद्भिदादीनां तद्वयान्नामधेयत्वमिति ॥

इति महामहोपाध्यायमिश्रमुरारिकृतौ त्रिपादीनीतिनयनं समाप्तमिति ॥

---

**No. 309. Vidhirasayanam** by Appyadikshita [विधिरसायनम्—अप्यदीक्षितः].

Begins :

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥ १ ॥

जन्मस्थेमलयं समस्तजगतां यस्यैव लीलायितं
यस्मिन्नायतते भवस्थिरमहारोगक्षयः प्राणिनाम् ।
तद्ब्रह्मादिभिरप्यगम्यविभवं विश्वाधिकं शाश्वतं
साम्बब्रह्मरसालमूलरसिकं साक्षात्क्रियासं सदा ॥ २ ॥
यत्कुमारिलमतानुसारिणा निर्मितं विधिरसायनं मया ।
पद्यरूपमनतिस्फुटाशयं तत्सुखावगतये विविच्यते ॥ ३ ॥

प्रारिप्सितप्रकरणस्याविघ्नपरिसमाप्तये सूत्रकारस्य महर्षेश्चरणस्मरणरूपं मङ्गलमाचरन्नेव प्रकरणारम्भं तावदाक्षिप्य परिसमाधत्ते ॥

विख्याता मुनिवर्यसूक्तिषु विधाश्रितस्रो विधिस्रोतसा-
माचार्यैर्विशदं विविक्तविषयास्ताश्च व्यवस्थापिताः ।
किं तत्रास्ति विचार्यमार्यमथिते मार्गे निसर्गोज्ज्वले
नानोदाहरणैस्तु ताः प्रविशदीकर्तुं प्रवर्तामहे ॥ १ ॥

मुनिवर्यस्य भगवतो जैमिनेः सूत्रेषु विधिर्वा स्यादशपूर्वत्वात् । नियमार्था वा श्रुतिरुच्यते । परिसंख्या इत्येवमादिषु त्रयो विधिप्रकाराः प्रसिद्धाः अपूर्वविधिः । नियमविधिः । परिसंख्याविधिश्चेति । ते च भट्टपादैः परस्परासंकीर्णविषयतया स्पष्टमेवोपपादिताः ॥

Ends:

॥ ४१ ॥ यदि प्राकृतहविषामविशेषेणाभ्युदयेष्टिदेवताभ्यो विभजनमिति मतं तदा दधिशृतयोरपि सर्वदेवतान्वयः स्यात् । उत्तरत्र तयोर्विशिष्य संकीर्त्तनं स्थविष्ठैरनिष्ठैश्च तंडुलैः सहस्रपणानियमार्थं स्यात् । अथ वक्ष्यमाणप्रकारेण विभजनविधिस्त्रेधा तण्डुलान् विभजेदिति वाक्येऽङ्गीक्रियते । तथा च दधिशृतयोर्वक्ष्यमाणदेवताविशेषव्यवस्था न भज्यत इति मतं तदोपांशुयाज्ये वक्ष्यमाणे देवतान्वयप्रकारो नास्तीति विभजनवाक्यं तद्विषयवेनार्थवन्न भवेत् । तण्डुलदधिशृतेषु तु तत्तद्वाक्यैरेव तथा तथा

विभजनं सिद्धमिति । सर्वथा व्यर्थमेव त्रेधा तण्डुलानीति वाच्यम् । अतस्तण्डुलशब्दलक्षणाक्लेशेपि तद्वैयर्थ्यानपायात्तस्य यथाशृतानुवादकत्वमेव युक्तमिति तत्र विध्यभावात्तद्विध्यव्याप्तिवर्णनमप्यसमञ्जसमिति भावः ॥ आक्षेपः समाप्तः ॥ ॥

एवमाक्षिप्तेष्वपूर्वविध्यादीनां लक्षणेषूदाहरणेषु च लक्षणानि व्यवस्थापयितुं नियमपरिसंख्यालक्षणसंग्राह्यसंदेहपदानि निर्धारयन्नेव लक्षणव्यवस्थापनं प्रतिजानीते ॥

---

**No. 341. Gitagovindatika** by SANKARAMISRA [ गीतगोविन्दटीका—शंकरमिश्रः].

( आदिर्नास्ति )

Ends :

एतत्काव्यविलोचनप्रणयिनां यत्संशयोन्मूलनात्
पुण्यं यच्च हरिस्मृतेः प्रतिपदव्याख्यासु मे संचितम् ।
तेन प्रीतमनास्तनोतु सततं श्रेयो मम श्रीपतिः
शश्वद्विद्वदशोच्यताप्रतिभुवः श्रीशालिनाथस्य च ॥

इति श्रीगीतगोविन्दे स्वाधीनभर्तृकावर्णने सुप्रीतपीताम्बरो नाम द्वादशः सर्गः ॥

इति श्रीमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीशालिनाथकारितायां गीतगोविन्दटीकायां रसमञ्जरीनामधेयायां द्वादशः सर्गः ॥ व्याख्यानं समाप्तम् ॥

---

**No. 352. Natyadarpana** by RAMACHANDRA [ नाट्यदर्पणः—रामचन्द्रः ].

Begins:

चतुर्वर्गफलं नित्यं जैनीं वाचमुपास्महे ।
रूपैर्द्वादशभिर्विश्वं यया न्याय्ये धृतं पथि ॥ १ ॥
अभिनेयस्य काव्यस्य भूरिभेदभृतः कियत् ।
कियतोऽपि प्रसिद्धस्य दृष्टं लक्ष्म प्रचक्ष्महे ॥ २ ॥
नाटकं प्रकरणं च नाटिका प्रकरण्यथ ।
व्यायोगः समवस्कारो भाणः प्रसहनं डिमः । ३

Ends:

सूत्री भावोनुगेनासौ तेन मार्षसमः सखा ।
शिष्यात्मजानुजाः पुत्रो वात्सो तातो जरन्नपि ॥
सौम्यो भद्रमुखश्चेति नीचो हंडे तु पामरैः ।
येन कर्मादिना यस्तु ख्यातः स तदुपाधिकः ॥
शूरे विक्रमसंसूचि कल्पं नामाथ वाणिजे ।
दत्तान्तं प्रायशो विप्रे गोप्यकर्मानुरूप्यतः ॥
नृपस्त्रियां शुभंदत्ता सेनान्तं पणयोषिति ।
पुष्पादिवाचकं चेट्यां चेटे मङ्गलकीर्त्तनम् ॥
रूपस्वरूपं विज्ञातुं यदीच्छत यथास्थितम् ।
सन्तस्तदानीं गृह्णीत निर्मलं नाट्यदर्पणम् ॥

इति श्रीरामचन्द्रगुणचन्द्रविरचिते नाट्यदर्पणसूत्रे सर्वरूपकसाधारण-लक्षणानिर्णयो नाम चतुर्थो विवेकः समाप्तः ॥ ॥

**No. 398, Sinhasanadvatrinsaka** by KSHEMANKARAMUNI
[सिंहासनद्वात्रिंशका—क्षेमंकरमुनिः]·

Begins:

अनन्तशब्दार्थगतोपयोगिनः पश्यन्ति पारं न हि यस्य योगिनः ।
जगत्त्रयाशेषतमोविनाशकं ज्योतिः परं तज्जयति प्रकाशकम् ॥ १ ॥
अनेकवैचित्र्यमयं जगत्त्रयं प्रयाति साक्षात्प्रतिबिम्बरूपताम् ।
यस्यानिशं ज्ञानमयैकदर्पणे प्रणौमि तं श्रीभगवन्तमादिमम् ॥ २ ॥
ये पूजनीयाः सुमनःसमूहैस्ते सन्तु मे श्रीगुरवः प्रसन्नाः ।
सदा नवो यत्प्रतिभाप्रकर्षः पुनन्तु ते श्रीकवयश्च वाचम् ॥ ३ ॥

सकलसुरासुरनरनिकरनायकप्रणतपादारविन्दश्रीसर्वज्ञशासनप्रभावकस्य परमगुरुश्रीसिद्धसेनदिवाकरप्रणीतोपदेशपेशलविवेकस्य जगद्दुर्यधैर्यगाम्भीर्यपरमौदार्यादिगुणगणालंकृतस्य विक्रमाक्रान्तत्रिविक्रमस्य श्रीविक्रमनरेश्वरस्य काश्चित्प्रबन्धः प्रारभ्यते । तस्यायं पूर्वकविसंप्रदायः । यत्पूर्वं देवताधिष्ठितचन्द्रकान्तरत्नमयसिंहासनस्थद्वात्रिंशत्पुत्रिकाभिः प्रवरराज्यलक्ष्मीनिवासाम्भोजस्य श्रीभोजनरेश्वरस्य पुरतो महाश्चर्यमयद्वात्रिंशत्कथानकैः श्रीविक्रमादित्यस्य गुणोत्कीर्त्तनं चक्रे ॥

तत्र केपि जिज्ञासवः कथयन्ति कस्य तत्सिंहासनं, केन कस्य अर्पितं, कथं भोजेन लब्धं, कानि तानि कथानकानीति । तत्सर्वमावेद्यमानं श्रूयताम् ॥

Ends:

श्रीभोजस्तु जलनिधिमेखलाया अखण्डशासनश्चिरं रराज राजलक्ष्म्याः
इति सिंहासनद्वात्रिंशका समाप्ता ॥
श्रीविक्रमादित्यनरेश्वरस्य चरित्रमेतत्कविभिर्निबद्धम् ।
परा महाराष्ट्रचरिष्टभाषामयं महाश्चर्यकरं नराणाम् ॥

क्षेमङ्करेण गणिना वरगद्यपद्यबन्धेन युक्तिकृतसंस्कृतबन्धुरेण ।
विश्वोपकारविलसद्गुणकीर्तनाय चक्रेऽचिरादमरपण्डितहर्षहेतुः ॥
॥ ग्रं० १९६७ ॥

---

**No. 404. Halayudhakosha,** by Halayudha [हलायुधकोशः कविरहस्यापरनामा—हलायुधः].

Begins :

जयन्ति मुरजित्पादनखदीधितिदीपिकाः ।
मोहान्धकारविध्वंसान्मुक्तिमार्गप्रदर्शिकाः ॥ १ ॥
लोकेषु शास्त्रेषु च ये प्रसिद्धाः काव्येषु ये सत्कविभिः प्रयुक्ताः ।
ताश्चिन्त्यतां चित्तविनोदनाय शब्दानहं धातुभिरुद्धरामि ॥ २ ॥
एकार्था एकशब्दाश्च नानार्थाश्चैकवाचकाः ।
सदृशार्थाभिधानाश्च नानार्थाः सदृशाक्षराः ॥ ३ ॥
एकार्थास्तुल्यशब्दाश्च निबध्यन्तेऽत्र धातवः ।
धातुपारायणाम्भोधिपारोत्तीर्णधिया मया ॥ ४ ॥
अस्त्यगस्त्यमुनिज्योत्स्नापवित्रे दक्षिणापथे ।
कृष्णराज इति ख्यातो राजा साम्राज्यदीक्षितः ॥ ५ ॥
गोपायति क्षितिमिमां चतुरब्धिसीमां
पापाज्जुगुप्सित उदारमतिः सदैव ।
वित्तं जुगोपयति यस्तु वनीपकेभ्यो
धीरो न गुप्यति महत्यपि कार्यजाते ॥ ६ ॥

Ends :

एजते राजचिह्नैर्य एजत्येतद्भयाज्जगत् ।
इन्धे युद्धेषु यत्तेज एधते यः श्रियाधिकम् ॥ २०६९ ॥

यः सीढति मृषाध्वानं तं रीडति निरीक्ष्य सः ।
प्रतिषेधति यः शत्रून् कार्यं तस्याशु सिद्ध्यति ॥ २०७० ॥
नयन्ते तद्गुणाः सर्वे यस्तान्नयति दिङ्मुखम् ।
श्रिया मृडति यो नित्यं सरस्वत्या च संपदा ॥ २०७१ ॥
इति समस्तमवाप्तगुणोदयं कविरहस्यमिदं रसिकप्रियम् ।
तदभिधाननिधानहलायुधद्विजवरस्य कृतिः सुकृतात्मनः ॥
इति श्रीहलायुधकोशोऽयं समाप्तः ॥ संवत् ॥ १७८६ ॥

---

**No. 421. Vagbhattalankaravyakhya,** by SINHADEVA [वाग्भट्टालंकारव्याख्या—सिंहदेवः].

Begins:

श्रियं दिशतु वो देवः श्रीनाभेयजिनः सदा ।
मोक्षमार्गं सतां ब्रूते यदागमपदावली ॥ १ ॥
श्रीवर्द्धमानजिनपतिरनन्तविज्ञानसंततिर्जयति ।
यद्गीः प्रदीपकलिका कलिकालतमः शमं नयति ॥ २ ॥
वाग्भट्टकवीन्द्ररचितालंकृतिसूत्राणि किमपि विवृणोमि ।
मुग्धजनबोधहेतोः स्वस्य स्मृतिबीजवृद्ध्यै च॥ ३ ॥

Ends:

इति सिंहदेवकृतायां वाग्भट्टालंकारव्याख्यायां पञ्चमः परिच्छेदः संपूर्णः ॥
लाटी हास्यरसे प्रयोगनिपुणै रीतिः प्रबन्धे कृता
पाञ्चाली करुणाभयानकरसे शान्ते रसे मागधी ।
गौडी वीररसे च रौद्रजरसे वत्सोमदेशोद्भवा
बीभत्साद्भुतयोर्विदर्भविषया शृङ्गारभूते रसे ॥ १ ॥

द्वित्रिपदा पाञ्चाली लाटीया पञ्चसप्तावयवैवत् [सप्तावयवा चेत्]
शब्दाः समासवन्तो भवति यथाशक्ति गौडीया ॥ २ ॥
प्रथमपदा वत्सोमी त्रिपदसमासा च मागधी भवति ।
उभयोरपि वैदर्भी मुहुर्मुहुर्भाषणं कुरुते ॥ ३ ॥
इति रीतिस्वरूपम् ॥...
इति श्रीवाग्भट्टालंकारव्याख्या संपूर्णा ॥

---

**No. 448 Chhandahkosha,** by RATNASEKHARA. With the Commentary of CHANDRAKIRTISURI [छन्दःकोशः-सटीकः मू० मा० रत्नशेखरसूरिः-टी० चंद्रकीर्तिसूरिः].

Begins :

नमामि परमं ज्योतिस्तमःपारे प्रतिष्ठितम् ।
यत्र विश्वावकाशस्य तमसो नास्ति गोचरम् ॥ १ ॥
छन्दःकोशाभिधानस्य सूरिश्रीरत्नशेखरैः ।
कृतस्य क्रियते टीका बोधनायाल्पमेधसाम् ॥ २ ॥

तत्रादौ शास्त्रकारो निर्विघ्नेन शास्त्रपरिसमाप्त्यर्थं स्वाभिमतदेवतास्तुतिपूर्वकं ग्रन्थमारभते ॥ तत्रेयमार्या ॥

आजोयणठ्ठिआणं सुरनरतिरिआण हरिससंजणणी ।
सरसक्खरवन्नछंदा सुमहत्था जयउ जिणवाणी ॥ १ ॥
इय पाइ (य) छंदाणं कइवइनामाइ सुप्पसिद्धाइं ।
भणियाइ लक्खलक्खणजुयाइं इह छंदकोसम्मि ॥ ७६ ॥

Commentary ends :

इति पूर्वोक्तप्रकारेण छन्दसां कतिपयनामानि कतिचिदभिधानि सुप्रसिद्धानि विदितानि इह छन्दःकोशाभिधाने छन्दःशास्त्रे भणितानि । श्रीम-

नागपुरीयतपागच्छगगनमण्डनभोमणिश्रीवज्रसेनसूरिशिष्यश्रीहेमतिलकसूरिपट्टप्रतिष्ठितश्रीरत्नशेखरसूरिभिः कथितानीति । कीदृशानि तानि लक्ष्यलक्षणयुतानि । लक्ष्याणि छन्दांसि लक्षणानि गणमात्रादीनि ततो लक्ष्यैर्लक्षणैश्च युतानि सहितानीति ॥

समाप्ता चेयं श्रीरत्नशेखरसूरिसंतानीयभट्टारकश्रीराजरत्नसूरिपट्टस्थितश्रीचन्द्रकीर्तिसूरिविरचिता छन्दःकोशनामग्रन्थस्य टीका ॥ लि. सं. ॥ १६९७ ॥

---

**No. 449. Chchandahkaustubha,** with a commentary by VIDYABHUSHANA [छन्दःकौस्तुभः-सभाष्यः ].

Begins:

अचिंतनयनानन्द[दो]राधादामोदरो गुरुर्जीयात् ।
विवृणोमि यस्य कृपया छन्दःकौस्तुभमहं मितवाक् ॥ १ ॥

अथ श्रीनयनानन्दपदारविन्दसेवासादितनिखिलशास्त्रार्थश्छन्दोविद्वद्वन्द्यः । श्रीराधादामोदराभिधकान्यकुब्जविप्रवंशावतंसो महत्तमकविश्छन्दःकौस्तुभं नाम छन्दःशास्त्रं प्रणयन् सर्वैश्छन्दःप्रगेयचरितं श्रीकृष्णं प्रणमति । छन्दोभिरिति ॥

छन्दोभिर्विततार्ङ्गैः कवयो यस्यानुकीर्तयन्ति गुणान् ।
स जयति गोकुलवनिताजितान्तरः श्यामसुन्दरो भगवान् ॥ १ ॥

Ends:

द्विजकुलतिलकः श्रीमान् राधादामोदरो हरेः प्रेष्ठः ।
स्वर्णैः सूत्रैर्ग्रथितं छन्दःकौस्तुभममुं व्यतनोत् ॥ १४ ॥
वेदर्तुपक्षसंख्याताश्छन्दसां व्यक्तयोऽत्र याः ।
लिखिताः सन्ति ताः सन्तः कलयन्तु कृपाकुल ॥ १५ ॥

इति छन्दःकौस्तुभे मात्राप्रस्तारो नाम नवमी प्रभा ॥ ९ ॥

श्रीराधादामोदरशिष्यो विद्याभूषणो नाम्ना ।
छन्दःकौस्तुभशास्त्रे भाष्यमिदं संप्रति व्यदधात् ॥

इति श्रीविद्याभूषणविरचिते छन्दःकौस्तुभभाष्ये मात्राप्रस्तारविवरणं नवमी प्रभा ॥ ९ ॥ संवत् १८३९ शाके १७०० मार्गशीर्षे १४।३० शुक्रवासरे लिखितम् ॥ ॥

---

**No. 450. Chhandahpiyusha,** by JAGANNATHA [छन्दःपीयूषः—जगन्नाथः]

Begins:

न्यायव्याकरणादिशास्त्रमखिलं संक्षुण्णमेवास्ति हि
प्रायः प्राक्तननूतनैः सुकृतिभिश्छन्दस्तु नैवेत्यतः ।
श्रीकण्ठस्मरणादवाप्य सुमतिं प्रीत्यै मया धीमतां
सत्सूत्रं गुरु तत्कृतं लघु पुनस्तस्याथ सारं ब्रुवे ॥ १ ॥
सालंकारगणं विदोषमपि यच्छब्दार्थयुग्मं बुधा-
स्तत्काव्यं यशआद्यनेकफलकं कार्यं मतं धीमताम् ।
छन्दःशास्त्रनिबन्धना खलु भवेत्तत्रोपयुक्ता यति-
श्छन्दोभङ्गविहीनवाक्यरचनानेकप्रकारप्रथा ॥ २ ॥
सूत्रं संग्रहवाक्यमात्रमिह वै कर्तुं न कः शक्नुया-
त्तस्मिल्लाघवतोऽनुवृत्तिरचना स्पष्टा परं कौशलम् ।
मात्सर्यं परिहाय तत्सुमतिभिर्निर्दिष्टमत्रादरा-
त्तत्राप्यन्तरनुप्रविश्य विपुलस्यार्थस्य यद्वर्णनम् ॥ ३ ॥
शुद्धस्वानुभवप्रसिद्धविषयेऽप्येलन्मुनिर्नाब्रवी-
देतद्वै मनुरब्रवीदिति जडाः श्रद्धानिबद्धाग्रहाः ।

स्युः पञ्च द्विगुणा दशेति कथने किं मुग्धमुग्धोर्भिदा ।
यः सद्वस्तु वदेत्तमेव सुमतिं विज्ञा मुनिं मन्वते ॥ ४ ॥

ज्ञाता दानदयादमा निजनिजाभिप्रायसाहायका-
त्प्राजापत्यवरैर्नरासुरसुरैः स्रष्टुर्दमात्रोक्तितः ।
तस्मात्स्वाशयपाशवर्तिनि जने कस्मै किमाख्यायतां
बालक्रीडनतो जगज्जनयिता तुष्येन्मनुष्येषु कः ॥ ५ ॥

पूर्वाचार्यकृतच्छन्दःशास्त्रेणापरितुष्यन्मिश्रजगन्नाथस्तत्सूत्राणि प्राणैषीत् ।
तत्रेदमादिमं शास्त्रारम्भसूत्रं प्रेक्षावतः प्रवर्त्तयितुम् ॥ अथ छन्दोऽनुशा-
सनम् ॥ छन्दोऽनुशिष्यते येन तच्छास्त्रं प्रारभ्यत इत्यर्थः ॥

Ends:

सूत्राण्यशीतिः प्रथमे द्वितीये द्वासप्ततिः षण्णवतिस्तृतीये ।
तुर्ये शते द्वे नवतिस्तथेत्थं पञ्च शतान्यष्टात्रिंशच्च (six)
शिष्टप्रयुक्तं यदतिप्रसिद्धं छन्दश्च वृत्तं च तदुक्तमत्र ।
ग्रन्थस्य भीत्या बहुविस्तरस्य कृतो हि सोऽन्यत्र तदिच्छुतुष्ट्यै ॥ १ ॥

श्रीरामात्तनयं यमिष्टविनयं विद्याधरस्यात्मजा-
ल्लेभे श्रीहरिकृष्णदेवदुहिता साध्वी सुभद्राभिधा ।
गोपालीदयितेन तेन हि जगन्नाथेन संलोडिता-
च्छन्दःशास्त्रमहाम्बुधेर्मतिमथा पीयूषमेतद्धृतम् ॥ २ ॥

यत्पाण्यम्बुजसङ्ग एव शिरसो बालोऽपि संप्राप्तवान्
वाग्देवीकरुणाकटाक्षपदवीं सत्साधनैर्दुर्लभाम् ।
वागीशा अपि यद्गुणानवसितेर्वाचंयमत्वं श्रिता
वन्दे श्रीहरिकृष्णनाममहितं मातामहं तं सदा ॥ ३ ॥

ये तस्मिन्नपि नीललोहितपुरे संसत्सु संख्यावतां
श्रीमद्बुद्धिमदाख्ययाखिलविदो भूतार्थया विश्रुताः ।
यत्पादाम्बुजदर्शनादमलधीर्निस्तीर्णमोहार्णवो
निस्त्रैगुण्यसुनिष्ठितश्च सततं तेभ्यो गुरुभ्यो नमः ॥ ४ ॥
यस्मिन्नस्तगतिः समस्तकरणग्रामो यतश्चेष्टते
स्वप्नो जागरणं सुषुप्तिरिति वै यत्साक्ष्यतः सिध्यति ।
यस्मात्सर्वमनन्यदेतदुदितं यत्सर्वतोऽन्यन्मतं
शेषाशेषकथापथातिगमथालम्बे परं तन्महः ॥ ५ ॥
जीवाख्या प्रकृतिः परा निगदिता यस्यापरा चाष्टधा
खं वायुर्ज्वलनो जलं क्षितिरहंकारो मनो धीरिति ।
यो वेद्यो निगमैः क्षराक्षरपरो वेदान्तकृद्वेदवि-
त्तस्य श्रीपुरुषोत्तमस्य करुणामालोचयामोऽनिशम् ॥ ६ ॥
इति मिश्रजगन्नाथकृतच्छन्दःपीयूषे वृत्तनिरूपणश्चतुर्थोऽध्यायः ॥ ४ ॥

समाप्तोयं ग्रन्थः ॥ संवत् १८४९ कार्तिकमासे शुक्लपक्षे सप्तम्यां तिथौ लिपीकृतम् ॥

---

**No. 461. A commentary on the Vrittaratnakara, by** SRIKANTHA [वृत्तरत्नाकरस्य वृत्तिः—श्रीकण्ठः].

Begins:

देहावलम्बितव्यालं नत्वा सुरगणस्तुतम् ।
गणेशं क्रियते वृत्तिर्वृत्तरत्नाकराश्रया ॥ १ ॥

Ends:

इदानीं वृत्तिकारो वृत्तिस्वरूपमुक्त्वा आत्मनो नाम कथयति ॥

विस्पष्टपदविन्यासा श्रोतृसंदेहवल्लभा ।
वृत्तरत्नाकरव्याख्या कृता श्रीकण्ठसूरिणा ॥
कृत्वा वृत्तिमिमां पुण्यं यदिहार्जितं मया ।
तेनोल्लसन्तु लोकानामतीव मतयोऽमलाः ॥

इति श्रीकण्ठपण्डितविरचितायां वृत्तरत्नाकरच्छन्दोवृत्तौ षष्ठोऽध्यायः समाप्तः ॥

---

**No. 511. Ramalarkaprakasa,** by Govinda [रमलार्कप्रकाशः- गोविन्दः].

**Begins:**

प्रणम्य शिरसा देवं सर्वज्ञं प्रियवादिनम् ।
रमलार्कप्रकाशं तु वक्ष्ये पूर्वैः कृतं यथा ॥ १ ॥
रमलं विमलं शास्त्रं नियोलेन निर्मितम् ।
ज्योतिर्विदां प्रीतिकरं प्रश्नं सर्वाङ्गसिद्धिदम् ॥ २ ॥

**Ends:**

श्रीमत्कौत्सस्य वंशे हरिचरणयुगाराधनैकाग्रचित्ता
विप्रा श्रीरामनामा इतिपठितजनस्याघसंघान् हरन्ति ।
तेषां दासो विराटे प्रवरगुणवतां प्राञ्जलिर्नान्यचेता
गोविन्दाख्यः प्रशस्तो मृदुवररमलार्कप्रकाशे सुबोधः ॥ १ ॥
विलोक्य चिन्तामणिभिः प्रणीतं विद्वद्रमण्यादिकृतं च शास्त्रम् ।
दाऊदखानस्य मतं हि सम्यक् शिष्यप्रबोधाय विरच्यतेऽयम् ॥ २ ॥
सच्छिष्याय विनीताय देयमेतत्सुखावहम् ।
दुर्विनीताय चेद्देयं दह्यते तत्क्षणाद्ध्रुवम् ॥ ३ ॥

प्राचीमाब्धितटात्तथा वरुणादिग्वारांनिधेर्याम्यादिक्-
शैलाद्धैमगिरेर्विलम्बितयशा उर्वीशसद्धर्मवित् ।
छत्री श्रीमाहिमन्तसाहिप्रबलो दिल्लीश्वराधीश्वरः
श्रीमद्विक्रमवर्षखाश्वगजभूपौषेऽसितैकादशी ॥ ४ ॥
इन्दुप्रकाशे रमलं सदृशं नैव दृश्यते ।
तस्मादर्कप्रकाशेपि यादृगेव प्रपश्यताम् ॥ ५ ॥
इति श्रीरमलार्कप्रकाशनामशास्त्रं संपूर्णम् ।

---

**No. 592. Mundamalatantra** [मुण्डमालातन्त्रम्]

**Begins:**

ॐ नमः श्रीचंडिकायै ॥
सर्वानंदमयीं नित्यां सर्वाम्नायनमस्कृताम् ।
सर्वसिद्धिप्रदां देवीं नमामि परमेश्वरीम् ॥ १ ॥
देव्युवाच ॥
देव देव महादेव परमानंदनंदन ॥
प्रसीद गुह्यचक्रं ते कथय स्वप्रियं वद ।
सर्वतंत्रेषु मंत्रेषु गुप्तं यत्पंचवक्त्रतः ।
तत्प्रकाशय गुह्याद्यं यद्यहं तव दुर्लभा ॥

**Ends:**

गोप्तव्यं तत्प्रयत्नेन यस्मै कस्मै न विन्यसेत् ॥
इति षष्ठः पटलः ॥ समाप्तेयं मुंडमाला ॥
इति मुंडमालातंत्रे — — —
शोधितमल्पंतमात्मनामुना ॥

**No. 625. Anandasundara,** by SARVAVIJAYA [आनन्दसुन्दर :—सर्वविजय : ].

Begins :

पूर्वं पाणिगृहीतकङ्कणकसत्कौसुम्भवासोवधू-
युग्मात्पल्लवितोऽभिषेकविधिना वृद्धिं परां प्राप यः ।
संजातः शतशाख एष तनुजैः श्रीनाभिभूभूरुहः
सुच्छायः सुमनोमनोहरतनुस्तन्यात्कलं वः फलम् ॥ १ ॥

प्राञ्चत्पञ्चफणामणिच्छलधराः पञ्चापि दीपाङ्कुराः
शोभन्ते शिवपत्तनोत्कमनसां मिथ्यात्वरात्रावपि ।
पञ्चाचारपथानिव प्रथयितुं यन्मूर्ध्नदेशे स्थिराः
श्रीमानेष जिनश्चिनोतु परमं पृथ्वीसुतः प्रार्थितम् ॥ २ ॥

नीलाम्भोधरसोदरद्युतिजुषः स्वश्रीमुखे श्रीपतेः
शंखः पूरयितुं कुतूहलरसावेशेन येनाहितः ।
धत्ते नित्यसलीलनीलकमलक्रीडन्मरालोपमां
नेमिर्नेमिनराम्नरायणनतो नेतावताद्दुःकृतात् ॥ ३ ॥

यन्नामापि समार्पिताखिलविपद्व्यापारमाकारणं
श्रीणामत्र परत्र मन्त्रमयतां निर्विघ्नमास्तिघ्नुते ।
सार्वः सर्वजनीनसर्वमहितो माहात्म्यकेलीगृहं
द्विश्चिन्तामणिरेष शेषरवरो विश्वेषु पार्श्वः श्रिये ॥ ४ ॥

जन्मस्नानमहे महेन्द्रनिवहैर्निर्मीयमाणे मुहुः
कालेयद्रवपिञ्जरैर्जलभरैः किंपातिमानं गतः ।
मेरुः काञ्चनसानुरित्थमधिकां प्रापत्प्रसिद्धिं पुरः
श्रीवीरः परमेश्वरः प्रणमतां पुष्णातु पुण्यानि सः ॥ ५ ॥

मण्डपदुर्गशृङ्गाराः पञ्चाप्येते जिनेश्वराः ।
शास्त्रादौ जावडेन्द्रस्य प्रसन्नाः सन्तु संततम् ॥ ६ ॥

तपागच्छाधिपाः श्रीमत्साधुसुन्दरसूरयः ।
मुनिसुन्दरसूरीन्द्रा जयचन्द्राश्च सूरयः ॥ ७ ॥

श्रीरत्नशेखराचार्याः श्रीलक्ष्मीसागराः परे ।
जयप्रतिभवः सन्तु जावजे [जावडे] मी युगोत्तमाः ॥ ८ ॥

ततश्च ॥

सुमतिसाधुगुरुस्तपगच्छपः स्वपदशावितमालवमण्डलः ।
कलयति स्म स विस्मयकारणैः सकलसूरिशिरोमणितां गुणैः ॥ ९ ॥

पूर्वं श्रेणिकभूपतिर्जिनपतेर्वीरस्य सेवापरः
तस्मात्संप्रतिमेदिनीपतिरभूच्छ्राद्धः सुहस्तिप्रभोः ।
श्रीहेमस्य कुमारपालनृपतिर्भक्तेर्यथामस्तथा
जीयाज्जावड एष शेखरतया सुश्रावकाणां गुरोः ॥ १० ॥

ख्यातश्रीमालभूपालबिरुदः श्रावकाग्रणीः ।
कालेऽस्मिन् शालिभद्रस्य सादृश्यो दृश्यते हि यः ॥ ११ ॥

तस्याभ्यर्थनया ग्रन्थः श्रीमानानन्दसुन्दरः ।
क्रियतेऽसौ मया सर्वविजयेन यथाश्रुतम् ॥ १२ ॥

Ends:

एवं दशश्रावकसच्चरित्रं शृण्वन्ति ये पुण्यकथापवित्रम् ।
तेषामशेषाः सुखसंपदोपि पदेपदे स्युः प्रभुपार्श्वभक्तेः ॥ ६६ ॥

श्रीमालोज्ज्वलवंशमौक्तिकमणेः श्रीजावडस्यार्थनां
मत्वा मालवदेशमण्डनकरे श्रीमण्डपक्ष्माधरे ।

विद्वत्पुंगवतुङ्गसर्वविजयो जज्ञेधिकारे क्रमा-
दानन्दादिमसुन्दरेत्र सुकृतग्रन्थेष्टमो जेजिनात् [अजीजमत्] ॥ १७ ॥

इति श्रीमालकुलश्रीमालभारिमालवेश्वरश्रीखलचीगयासदीनगुरुनरेन्द्रगञ्जाधिकारिव्यवहारिशिरोरत्नानुकारिलघुशालिभद्रेतिविरुदधारिसुपुत्रश्रीहीरजी भ्रातृ सं० लीलाप्रमुखपरिवारपरिवृतसंघपतिश्रीजावडसमर्थाभ्यर्थनावशवर्त्तिसांप्रतीनकविचक्रचक्रवर्त्तिमहापण्डितप्रष्ठश्रीमत्सर्वविजयगणिवरविजयगणिवरविधीयमाने श्रीवर्द्धमानदेशनारसनिधाने श्रीमदानन्दसुन्दराभिधान नवमदशमश्रावककिंचिद्गुणलवव्यावर्णनो नामाष्टमोधिकारः ॥

---

**No. 645. Upadesachintamani,** by JAYASEKHARASURI [उवएससारचिन्तामणिः—जयशेखरसूरिः].

Begins:

तित्थयरे भयवंते परमगुरू गरुय अइसयसमिद्धे ।
धम्मपहपत्तवरसिरिमाहिंदवंदियगुणे वंदे ॥ १ ॥
पुव्ववहा पुण्णपया तिमग्गगा सायरे ठिया धम्मे ।
अवणेउ पावपंकं जिणवाणी तियससरिय व्व ॥ २ ॥
चिंतियसुहयं सुहयं जणाण सुरसत्थसंगयं वोच्छं ।
गुरुवयणेणं चिंतामणिं च उवएससारमहं ॥ ३ ॥

Ends:

एसा उवएसाली साली विव विबुहहियियठाणेसु ।
सुभभावसलिलसित्ता फलेउ मणवंछियफलेण ॥ ९६ ॥
कुंजरनयरविसेसाऽऽहवसरसपसूणवरिसमज्झाण ।
सरिसक्खरनामेणं रइयमिणं सपरबोहत्थं ॥ ९७ ॥

जाव सिरिवीरतित्थं ताव इमा पंडियाण हिययम्मि ।
महरयणा रयणा वलिसरिसा सरिसाहणी होउ ॥ ९८ ॥
इति श्रीधर्मोपदेशचिन्तामणिप्रकरणम् ॥

---

**No. 730. A Durgapadavyakhya** on the Commentary on the **Nandisutra**, by SRICHANDRASURI [नन्दिसूत्रटीकायां दुर्गपदव्याख्या— श्रीचन्द्रसूरिः].

**Begins:**

श्रीधनेश्वरसूरीणां पादपद्मोपजीविना ।
नन्दिवृत्तौ कृता व्याख्या श्रीमच्छ्रीचन्द्रसूरिणा ॥

**Ends:**

समाप्ता चेयं नन्द्यध्ययनटीकायां श्रीशीलभद्रप्रभुश्रीधनेश्वरसूरिशिष्यश्रीचन्द्रसूरिविरचिता दुर्गपदव्याख्या । स तं नंदिसमत्तेति वचनादाचार्यपदस्थापनायामनुयोगमनुयोगानुज्ञाविषयेयं नन्दिरेतावत्प्रमाणा समर्थितेति ॥

इत ऊर्ध्वं, से किं तमनुण्ण इत्यादिग्रन्थपद्धतिर्या किलापरा दृश्यते सा गणानुज्ञाविषया सा लघुनन्दिरिति संभाव्यतेऽस्या अपि गमनिका काचिदुच्यते ॥......

आद्यगाथायां चतुर्दशानुज्ञाभिधानानि । द्वितीयायां षट् । सर्वाणि २० ॥ तद्यथा अनुज्ञा १ उन्नमनी २ नमनी ३ नामनी ४ स्थापना ५ प्रभवः ६ प्रभावना ७ प्रचारः ८ तदुभयं ९ हितं १० मर्यादा ११ न्याय १२ मार्ग १३ कल्प १४ संग्रह १५ संवर १६ निर्जर १७ स्थितिकरण १८ जीवाति [जीवित] वृद्धिपदं १९ पदप्रवरं २० इति विंशतिरेतेषां च पदानामर्थः संप्रदायाभावान्नोच्यते ॥

इति समाप्ता श्रीशीलभद्रप्रभुश्रीधनेश्वरसूरिशिष्यश्रीचन्द्रसूरिविरचिता नन्दिटीकायां दुर्गपदव्याख्या ॥

स्वे कष्टेभिनिधाय कष्टमधिकं मा मेऽन्यदा जायतां
व्याख्यानेऽस्य तथाविधे कुमनसामल्पश्रुतानाममुम् ।
इत्यालोचयता तथापि किमपि प्रोक्तं मया तत्र च
दुर्व्याख्यानविशोधनं विदधतु प्राज्ञा परार्थोद्यताः ॥ १ ॥
॥ इति श्रीनन्दिटिप्पनिका संपूर्णा ॥

---

**No 752. Parsvanathacharitra,** by BHAVADEVASURI [पार्श्वनाथचरित्रम्— भावदेवसूरिः].

Ends:

इति श्रीकालिकाचार्यसंतानीयश्रीभावदेवसूरिविरचिते श्रीपार्श्वनाथचरित्रे महाकाव्ये अष्टमसर्गे भावांके भगवद्विहारनिर्वाणवर्णनो नाम अष्टमः सर्गः ॥

कलिकुण्डे मथुरायां स्तम्भनके चारुवप्रशङ्खपुरे ।
नागह्रदे लाटह्रदे स्वर्णगिरिप्रमुखतीर्थेषु ॥ १ ॥
कलिकलुषगर्वसर्वंकषनखमणिकिरणसजलपदपीठः ।
एकातपत्रमहिमा जयति श्रीपार्श्वनाथजिनः ॥ २ ॥ युग्मम् ॥
कलास्थानकभावेन कलिमानकदर्थनः ।
कजार्वेनकवित्वेन कल्पिता नजते जिनः ॥ ३ ॥
कलात्वेनं कवित्वेन कल्तिानेजते जिनः
आसीत्स्वामिसुधर्मसंततिभवो देवेन्द्रवन्द्यक्रमः
श्रीमान् कालिकसूरिरद्भुतगुणग्रामाभिरामः पुरा ।
जीयादेष तदन्वये जिनपतिप्रासादतुङ्गाचल-
भ्राजिष्णुर्मुनिरत्र गौरवनिधिः खंडिल्लगच्छाम्बुधिः ॥ ४ ॥
तस्मिंश्चांद्रकुलेऽभवत्कुवलयोद्बोधैकबन्धुर्यशो-

ज्योत्स्नापूरितविष्टपो विधुरिव श्रीभावदेवो गुरुः ।
यस्याख्यानसमानमेष बहुशो व्याचक्ष्यमाणोऽधुना
गच्छोगच्छदतुच्छगुर्जरभुवि प्रष्ठां प्रतिष्ठामिमाम् ॥ ५ ॥

मनसि घनविवेकस्नेहसंसेकदीप्तो
द्युतिमतनुत यस्य ज्ञानरूपप्रदीपः ।
अममतमतमांसि ध्वंसयन्नञ्जसाऽसौ
न खलु मलिनिमानं किं तु कुत्रापि चक्रे ॥ ६ ॥

श्रीमांस्ततो विजयसिंहगुरुर्मुनीन्द्र-
मुक्तावलीविमलनायकतां ततान ।
ज्योतिस्तदुज्ज्वलतरं विकिरन् धरित्र्यां
चित्रं न यस्तरलतां कलयांचकार ॥ ७ ॥

दाक्षिण्यैकनिधिर्व्यधान्न सहजे देहेऽप्यहो वांछितं
कारुण्यामृतवारिधिर्विनिदधे गुप्तौ स्वकीयं मनः ।
शान्तात्मानुचरं चिरस्य विनिजग्राहेन्द्रियाणां गणं
यो विज्ञातसमस्तवस्तुरभवत्तुल्यश्च हेमाश्मनोः ॥ ८ ॥

तदीयपट्टेऽजनि वीरसूरिर्यन्मानसे निर्मलदर्पणाभे ।
निरूपयामास सरस्वती सत्त्रैविध्यविद्यामयमात्मरूपम् ॥ ९ ॥

सदाभ्यासावेशप्रथितपृथुमन्थानमथिता-
दवाप्तं तर्काब्धेर्विबुधपतिसिद्धेशमहितम् ।
यदीयं वाग्ब्रह्मामृतमकृत दर्पज्वरभर-
प्रशान्तिं निःशेषक्षितिवलयवादीन्द्रमनसाम् ॥ १० ॥

तस्मादभूत्संयमराज्यनेता मुनीश्वरः श्रीजिनदेवसूरिः ।
यो धर्ममारोप्य गुणे विशुद्धध्यानेषुणा मोहरिपुं बिभेद ॥ ११ ॥

आद्यनामक्रमेणैव प्रसर्पति गुरुक्रमे ।
पुनः श्रीजिनदेवाख्या बभूवुर्वरसूरयः ॥ १२ ॥

येषां पादारविन्दानरुणनखशिखारागभूयोऽतिराज-
ल्लक्ष्मीलीलानिवासान् विमलगुणभृतो भेजिरे राजहंसाः ।
आकृष्टानेकलोकभ्रमरकृतनमस्कारझंकाररम्यो
येषामद्यापि लोके स्फुरति परिमलोऽसौ यशोनामधेयः ॥ १३ ॥

तेषां विनेयविनयी बहु भावदेव-
सूरिः प्रसन्नजिनदेवगुरुप्रमोदात् ।
श्रीपत्तनाख्यनगरे रविविश्ववर्षे
पार्श्वप्रभोश्चरितरत्नमिदं ततान ॥ १४ ॥

समीक्ष्य बहुशास्त्राणि श्रुत्वा श्रुतधराननात् ।
ग्रन्थोऽयं ग्रन्थितः स्वल्पसूत्रेणापि मया रसात् ॥ १५ ॥

क्वापि दृष्टान्तमात्रस्तु यः कोपि कथितो मया ।
स्वस्तये सोऽपि जैनाज्ञानुसारेण गुणेच्छुना ॥ १६ ॥

चरितं कल्पितं चापि द्वेधोदाहरणं मतम् ।
परस्मिन्साधनीयार्थस्यौदनस्य यथेन्धनम् ॥ १७ ॥

अनादिनिधने काले जीवानां चित्रकर्मणाम् ।
संविधानं हि तन्नास्ति संसारे यन्न संभवेत् ॥ १८ ॥

अस्मिन् ग्रन्थेऽथ यन्न्यूनमधिकं वा कृतं मया ।
तदप्यनेनाधारेण तत् क्षन्तव्यं ममाखिलम् ॥ १९ ॥

श्रीपार्श्वचरितं तैस्तैर्वर्णितं यन्महात्मभिः ।
इत्थं मयापि यत्तत्रोपक्रान्तं धाष्टर्यमेव तत् ॥ २० ॥

किंच ॥ उत्तुङ्गचङ्गचैत्यानि महेभ्यैः कारितानि चेत् ।
तद्देवकुलिकामल्पधनो न विदधाति किम् ॥ २१ ॥
पूजिता यदि देवेन्द्रैर्जिना मन्दारदामभिः ।
पूजयन्ति न किं तत्तान्मर्त्या म–चकादिभिः ॥ २२ ॥
अध्वानमवतीर्णा यं गुरुगत्या महागजाः ।
न संचरति किं तत्र करिपोतः स्वलद्गतिः ॥ २३ ॥
तन्मयापि प्रभोर्भक्तिप्रकर्षवशचेतसा ।
चरित्रं रचितं संघानुमतं च न दुष्यति ॥ २४ ॥
यदत्र किञ्चिन्मूढत्वादलीकं प्रथितं भवेत् ।
सर्वं मयि कृपां कृत्वा संशोध्यं तन्मनीषिभिः ॥ २५ ॥
निशम्य सम्यक् श्रीपार्श्वस्वामिनश्चरितं वरम् ।
भविकैस्तत्तात्पर्यार्थो धारणीयः सदा हृदि ॥ २६ ॥
गुरुमेघवर्नी बिभ्रत्सरोवत्कमलोज्ज्वलः ।
दृश्यते स्फुटमुत्तानः स्थलवत्तु रजोमयः ॥ २७ ॥
अङ्कं लवादपि यथा पटुतां सुधायाः
कल्याणतां भजति सिद्धरसस्य लोहम् ।
सच्चन्दनस्य हिमतामतितप्ततैलं
जीवस्तथा जिनमतस्य हि सिद्धभावम् ॥ २८ ॥
दशभववरपत्रं पार्श्वभर्तुश्चरित्रं
कमलमुदयनालं पुण्यलक्ष्मीविशालम् ।
प्रमुदितमुनिभङ्गं सौरभोद्गारचङ्गं
विलसतु बुधचेतःपल्वले नित्यमेतत् ॥ २९ ॥
इति श्रीपार्श्वनाथचरित्रं समाप्तम् ॥

**No. 779. Bhaktamarastotravritti**, by GUNAKARA [भक्तामरस्तोत्रवृत्तिः—गुणाकरः].

**Begins:**

पूजाज्ञानवचोपायापगमातिशयाद्भुतम् ।
श्रीनाभेयं नमस्कुर्वे सर्वकल्याणकारणम् ॥ १ ॥

**Ends:**

इति चतुश्चत्वारिंशद्वृत्तार्थः ॥ संपूर्णेयं भक्तामरस्तववृत्तिः ॥
सप्रभावककथानिकामसंयुक्ता ॥
गिरां गुम्फधात्री कवीन्द्रेषु वाणी चतुर्वर्णसंघश्चतुर्वर्णसंघः ।
गुरुश्चानुशास्ता सुधीः श्रोतृवर्गो जयेयुर्जगत्याममी आसमुद्रम् ॥ १ ॥
श्रीचन्द्रगच्छेऽभयसूरिगच्छे श्रीरुद्रपल्लीयगणाब्धिचन्द्राः ।
श्रीचन्द्रसूरिप्रवरा बभुस्ते यद्भ्रातरस्ते विमलेन्दुसंज्ञाः ॥ २ ॥
तत्पट्टे जिनभद्रसूरिगुरवः सल्लब्धिलब्धप्रभाः
सिक्तां तां बुद्धि [सिद्धान्ताम्बुधि] कुम्भसंभवनिभाः—
जातः श्रीगुणशेखराभिधगुरुस्तस्मात्तपोनिर्मलः
शीलश्रीतिलको जगत्तिलक इत्यासीद् गुरुग्रामणीः ॥ ४ ॥
सद्गद्यपद्यसुकविः सुकवित्वधाता चारित्रचारुकरणः करणात्तकामः ।
तत्पट्टभूषणमणिर्गतदूषणोऽभूच्छ्रीमान्मुनीन्द्रगुणचन्द्रगुरुर्गरिष्ठः ॥५॥
संप्रत्यवनौ जयिनां निर्देशादभयदेवसूरीणाम् ।
गुणचन्द्रसूरिशिष्योऽणुगुणाकरः सूरिरल्पमतिः ॥ ६ ॥
अद्भुतमहतीर्बहुश्रुतमुखश्रुताः प्रभावककथाः ।
भक्तामरस्तवस्याभिनवां वृत्तिं व्यधादेनाम् ॥ ७ ॥

वर्षे षड्विंशाधिकचतुर्दशशतीमिते च वर्षतौ ।
मासि नभस्ये रचिता सरस्वतीपत्तने वृत्तिः ॥ ८ ॥
यद्गदितमर्थकूटं यल्लक्षणशब्दतश्च दुष्टमिह ।
तत्साधुभिः सुधीभिः शोध्यं सद्यः प्रसद्य मयि ॥ ९ ॥
भक्तामरस्तवाक्षरविवृतिं कृत्वा यदर्जितं सुकृतम् ।
तेनासौ सुकृतिजनो निरामयः स्यात्सदानन्दो ॥ १० ॥
पञ्चदश शतान्यत्र द्वासप्ततिसमधिकानि गणितानि ।
निश्शेषवर्णवृन्दान्यनुष्टुपां प्रायशः सन्ति ॥ ११ ॥
इति भक्तामरस्तववृतिः ॥

---

**No. 856. Shrichandracharitra,** by SILASINHAGANI [श्रीचन्द्रचरित्रम्-प्रशस्तिसहितम्—मू॰ शीलसिंहगणिः—प्र॰ शीलहंसः ].

**Ends :—**

॥ ९६७ ॥ इति श्रीआगमगच्छाधिराजश्रीजयानन्दसूरीन्द्रचरणारविन्दचञ्चरीकायमानेन श्रीगुरुप्रसादितपण्डितेत्युल्लापनेन शीलसिंहगणिना विरचिते पवित्रे श्रीचन्द्रचरित्रे श्रीचन्द्रनृपप्राग्भवत्रिखण्डराजाधिराजत्वतीर्थयात्रादिधर्मकृत्यदीक्षाज्ञाननिर्वाणवर्णनो नाम चतुर्थोऽध्यायः समाप्तः ॥

इति श्रीश्रीचन्द्रकेवलिचरित्रं संपूर्णम् ॥

॥ अथ प्रशस्तिः ॥

श्रीवीरार्हद्गौतमसुधर्मजम्बू प्रभव [ प्रभृति केवलिनः ]
( प्रभवः श्रुत ) केवलिनः प्रभवाद्याः स्थूलभद्रान्ताः ॥ १ ॥
तत एवायं महागिरिसुहस्तिमुख्याश्च वज्रपर्यन्ताः ।
दशपूर्वधरा अभवंस्तस्माच्छ्रीवज्रसेनगुरुः ॥ २ ॥

तच्छिष्याश्चत्वारश्चन्द्रो नागेन्द्रनिर्वृती अपरौ ।
विद्याधरस्त्वमीभ्यो गच्छचतुष्कं प्रवृत्तमिह ॥ ३ ॥
नाइलपरनाम्नः श्रीचन्द्रगुरोर्विजयसेनसूरिरभूत् ।
सातिशयोऽशिवशामनकृतान्यसामन्तभद्राख्यः ॥ ४ ॥
तत्पट्टे श्रीविजयप्रभसूरिरभूच्च सूरिजयचन्द्रः ।
श्रीदेवचन्द्रसूरिः श्रीधर्मसमुद्रसूरिरितः ॥ ५ ॥
दुःषमसमयातिशयात् प्रायस्तनुमानसौजसोर्हान्या ।
षष्ठाशक्तेः कैश्चिच्चतुर्दशी पाक्षिकमकारि ॥ ६ ॥
पञ्चत्रिंशदधिकशतं सूरियुजा येन नो परं मुमुचे ।
राकापाक्षिकमर्हत्प्रणीततिथ्या अधिकरागात् ॥ ७ ॥
मूलविधेरत्यागात्प्रीतैर्विबुधैर्धनैर्जनैर्यस्य ।
सुविहितविरुदमदायि श्रीधर्मसमुद्रसूरिरसौ ॥ ८ ॥
कुशलप्रभसूरिरथो श्रीरत्नप्रभगुरुर्जिनेन्द्राभः ।
सूरिश्चारित्रप्रभगुरुरुदयप्रभगुरुः श्रीमान् ॥ ९ ॥
श्रीशालवाहननृपोपरोधतोऽकारि कालिकाचार्यैः ।
पर्युषणा च चतुर्थ्यां यदैव समये पुनस्तस्मिन् ॥ १० ॥
अजनि श्रीदेवचन्द्रप्रभसूरिः पर्व वार्षिकं येन ।
नाचीर्णं च चतुर्थ्यां जयद्रथोत्तरपुरस्थेन ॥ ११ ॥
सूरिः कुमारधर्मो जिनदेवगुरुर्यशोदेवः ।
श्रीविजयचन्द्रसूरिः सूरक्ष्मापप्रबोधकरः ॥ १२ ॥
श्रीविमलप्रभसूरिः पुण्यप्रभसूरिरथ च (ज) यघोषः ।
सूरिस्तु विजयघोषः सूरिश्रीविजयधर्मगुरुः ॥ १३ ॥

श्रीकुमुदचन्द्रसूरिर्भव्यकुमुदबोधकरणचन्द्रसमः ।
षड्विकृतिपरित्यागी दत्तिचतुष्काशनग्राही ॥ १४ ॥
आशाम्बरैः साकमथोज्जयन्ते तीर्था(र्थे)वादेम्बिकया प्रदत्ते ।
साहाय्यके जैनसुरामरीणां वात्सल्यकृत्वाज्जिनशासनस्य ॥ १५ ॥
तुर्यस्तुतेराचरणा च चक्रे श्रीबप्पभट्टिप्रमुखैर्मुनीन्द्रैः ।
मेने न येनागमयुक्तिरागात्ततोऽजनि त्रिस्तुतिकप्रसिद्धिः ॥ १६ ॥
चतुर्थवर्षे विधिपक्षकर्त्तेत्येतस्य दत्तं बिरुदं सुजातात् ।
गुणानुरागात्पुन (रेव) राज्ञा श्रीज्ञानचन्द्रः स च सूरिवर्यः ॥ १७ ॥
तदीयपट्टे गुणचन्द्रसूरिर्येन प्रबोध्यावनिपं हि भीमम् ।
पापर्द्धिमांसाशनरात्रिभोज्यपराङ्गनानां नियमाः प्रदत्ताः ॥ १८ ॥
तत्पट्टगः श्रीगुरुशीलधर्मः क्रमेण शीलप्रभशीलरत्नौ ।
सूरी ततः श्रीगुरुशीलचन्द्रः श्रीवीरचन्द्रो गुरुशीलसुन्दरः ॥ १९ ॥
श्रीधर्मरत्नो गुरुरेवसूरिः श्रीधर्मसिंहो गुरुसिद्धसिंहः ।
कुमारसेनो नृपजः सगर्भैणहाऽथ भीतो हि ततः प्रबुद्धः ॥ २० ॥
स चाभवच्छीलगणाह्वसूरिः(सूरिः) पदेऽस्याजनि देवभद्रः ।
यस्योचिवानागमिकाह्वयं श्रीकुमारपालः स्वगुरोः समक्षम् ॥ २१ ॥
श्रीमान् जिनप्रभ इति द्वितीयोऽस्य सूरि-
र्वैराङ्गिकोऽजनि यकोऽनशनं चिकीर्षुः ।
भावी प्रभावक इति त्रिविधं न्यषेधि
सूर्योऽतिभक्तिपरया जिनशानस्य ॥ २२ ॥
षण्मासतीर्थनतिविघ्नकरीं प्रबोध्य
व्याघ्रीं तपोऽतिशयतः सुगतिं तु नीत्वा ।

अष्टादशाब्दसमयावधि यश्चकार
नानातपःकरणतो विमली [विमलेन्द्र] सेवाम् ॥ २३ ॥

नव्यस्तवेन नवचैत्यनतिं सदा य-
श्चक्रे जिनप्रभविभुः स महांस्तृतीयः ।
जज्ञेऽथ मुक्तमदचैत्यनिवासविद्या-
नन्दाह्वसूरिरतिधर्ममतिः प्रबुद्धः ॥ २४ ॥

तुर्योऽथ शीतलविहारनिवारणर्यः [णैर्यः]
संवेगवारिधिरभूद्गुणसेनसूरिः ।
चत्वार एव चतुरा अभवन्गणेऽस्मिन्
सूरीश्वरा गुणगणप्रथितास्तदैव ॥ २५ ॥

अष्टादशोरुशतमानमुनीश्वराणां
वैरङ्गिकः परिकरः प्रवरस्तदासीत् ।
सूरिभ्य एभ्य उरुसंयमिसाधुसारं
शाखाचतुष्टयमथ क्रमशो बभूव ॥ २६ ॥

॥ अथार्याः ॥

श्रीदेवप्रभसूरेः पदेऽभूच्छ्रीजिनप्रभयतीन्द्रः ।
तत्पट्टे पुनरजानि श्रीमान्गुणसेनसूरीशः ॥ २७ ॥

प्रतिषेधे क्रियमाणे स्वाचरणादाष्टिराग्गिगीतार्थैः ।
सूत्रोदितकातिवार्षिकपर्वादिकमूलमार्गाणाम् ॥ २८ ॥

कर्णावत्यां भूपतिसाक्षिकमस्थापि येन सुविधिः ।
श्रीगुणसेनगुरुपदे श्रीकीर्तिसमुद्रसूरिरिह सोऽभूत् ॥ २९ ॥

॥ गीतिः ॥ युग्मम् ॥

तत्पट्टाम्बुजतरणिः शिवसुखसरणिरनेकभव्यानाम् ।
विद्योदधिः शमनिधिः श्रीहेमसमुद्रगुरुरासीत् ॥ ३० ॥

श्रीहेमचन्द्रसूरिर्बीजापुरवासिपेथडमहिभ्यः ।
यद्देशनाप्रबुद्धोऽकारयदुरुचैत्यसुचतुष्कम् ॥ ३१ ॥

सप्तसहजसुकृताप्त्यै सार्कं तैः सप्तविमलगिरियात्राः ।
स चकार च दुःसमये सत्रागारे घनान्नमदात् ॥ ३२ ॥

स्वसमयसकलश्रवणे वीरार्हदागौतमाभिधार्चातः ।
तै रूप्यटंककैः स च चक्रे चित्कोशसुत्रितयम् ॥ ३३ ॥

सोऽर्बुदशैले गर्भालयं सबिम्बं व्यधापयच्चैत्यम् ।
सचित्तादननियमीत्यादिबहुसुकृततातिमकरोत् ॥ ३४ ॥

॥ गीतिः ॥ ॥ अथ वृत्तानि ॥

तदनु मनुशताब्दे सूरिरत्नं गणेऽभूत्
सुगुरुजयसमुद्रः सर्वसूत्रेष्वधीती ।
मुनि ७ शतलिपिपाठादेकघस्रेऽसृजंस्तत्
समयकविनिबद्धग्रन्थशुद्धिं व्यधाद्यः ॥ ३५ ॥

वर्षे षट्शरवेदशीतगुमिते देवालय- - -
- - - - -साधुसंघपतिना सार्द्धं महर्द्धिप्रथः ।
आसोको व्यवहच्चकार महतीं यात्रां यदाङ्घ्रिद्वयी-
संसेवी चतुरस्तथैव चतुरः सूरीन्मुदाऽस्थापयत् ॥ ३६ ॥

रसकरमनुवर्षे लब्धपादोदयश्रीः
कमलतिलकसूरिस्तत्पदेऽभून्महाश्रीः ।
तप ( उप ) शमरूपं ज्योतिराबिभ्रतोद्यत्-
तपनहिमरुची तौ निर्जितौ येन सद्यः ॥ ३७ ॥

यत्पादाम्बुजभक्तिभृद् (भृ) गुपुरावासी विशुद्धार्द्धिमान्
प्राग्वाटो भटसिंहठक्कुर इति श्राद्धो जिनोक्तार्थवित्।
कारुण्याम्बुनिधिः सुधासमगिरा भूमीभुजो रञ्जयन्
देशेषु प्रवरेष्वमारिकरणघाटौ [णात्पुण्यौ] घमासूत्रयत्॥ ३८॥

ततोऽभवत्पुण्यदशाभिरामः श्रीमान् जयानन्दगुरुः सदाभः।
दीपायितं येन बहुप्रमादतमोमये गच्छगृहाङ्गणेऽस्मिन्॥ ३९॥

श्रीश्रीमालकुले सुधांशुविमले योऽजायत प्रोज्ज्वले
बर्षे सप्तमके विबेककलितः श्रीस्तम्भतीर्थे पुरे।
आदाय व्रतमद्भुतैकधिषणो वर्षे जनेर्द्वादशे
व्याख्यां संघपुरश्चकार शरभू १९ वर्षे पदस्थोऽभवत्॥ ४०॥

द्वाविंशेऽजनि वत्सरे रसशराब्धीन्दुः १४९६ प्रमे वैक्रमे
वर्षे सूरिवरो बभूव नगरे श्रीक्षेत्रसंज्ञे च यः।
आसासंघपनन्दनेभ्यकरणे श्रीदेनक्लृप्तोत्सवः
पश्चात्तत्सकुटुम्बमेव शशिभूबर्षे मुदाऽदीक्षयत्॥ ४१॥

विद्वान् व्याकरणे बुधः परमते सिद्धान्ततत्त्वे सुधी-
श्छन्दोलंकृतिकाव्यनाटककथातर्केषु बाढं दृढः।
मेधावी गणितानुयोगविषये किंवा बहूक्तैरसौ।
सूरीन्द्रोऽत्र कलंदिकाकुलगृहं निर्द्वन्द्वमेव क्षितौ॥ ४२॥

आलोक्य स्वगणं क्रियासु शिथिलं मग्नं प्रमादाम्बुधा-
वुद्दध्रे किल बोधसद्गुणयुजा चारित्रपोतेन यः।
तत्पापश्रुतदुर्घनोपधिसुखं चोज्झांचकार क्षणात्
श्राद्धान् शुद्धनिधिं जिनागमाविधिं चाबूबुधत्स्वं सुधीः॥ ४३॥

प्रवचनरथस्थितो यः श्रुतदिव्यास्त्रः सुशीलसन्नाहः ।
एकोपि किल रिपुचमूं जित्वाभूद्भुवनविख्यातः ॥ ४४ ॥

येषां पाणितलं सरोजविमलं सत्पुण्यगन्धाकुलं ।
तेनात्तं किल गन्धचूर्णमभवन्माहात्म्यसौरभ्यभाक् ।
क्षिप्तं मण्डलिकेन्द्रमौलिमाभि यत् सम्यक्त्वसंघेशता–
प्रस्तावे किमु वर्ण्यमत्र भुवनान्यद्यापि तद्वासयेत् ॥ ४५ ॥

अकृत स नवजीर्णचैत्यकृत्यं चितिकोशं बहुदानधर्मशालाः ।
मुनिनगमनु १४७७ वत्सरे सुयात्रां व्यवहरमण्डलिकश्च येषु भक्तः ॥४६ ॥

श्रीमान्मेलिगदेवरम्य [त्न] हरिराजश्चेति तद्बान्धवौ
येषां वाक्यरसायनोर्जितगुणौ तद्बाहुदण्डाविव ।
जातौ तद्वदनेकपुण्यनिपुणावन्येऽपि सुश्रावकाः
साभाभीममुखाः सुकृत्यकरणैः संपन्नलक्ष्मीफलाः ॥ ४७ ॥

श्रीदेवरत्नसूरिप्रवरास्तत्स्यापिता गुरुगुणाढ्याः ।
गुरुसेविनो जयन्ति प्रथितानेकोत्तरग्रन्थाः ॥ ४८ ॥

तेषां सतीर्थ्य एषां बिभ्रन् शिष्यत्वमस्ति पण्डितकः ।
नामार्थशीलसिंहो यो भट्टं वादिनं जितवान् ॥ ४९ ॥

तेनोदधिनिधिवेदेन्दु १४९४मिते माधवोज्ज्वलचतुर्थ्याम् ।
रविवारे रचितमिदं श्रीचन्द्रचरित्रमतिरुचिरम् ॥ ५० ॥

एतद्रचनापुण्यात् स्तात् सुलभं कर्तृभव्यजीवानाम् ।
बोधि च सुवाच्यमानं विबुधैरिदमिह रिरञ्जयतु ॥ ५१ ॥

श्रीशीलसिंहपण्डितशिष्येण कृता च शीलहंसेन ।
जितगर्वस्त्रकगुरुगणभक्त्या विपुला प्रशस्तिश्रीः ॥ ५२ ॥

इति प्रशस्तिः ॥ ॥ ग्रन्थाग्रं ३६७२ अक्षर ९ श्रीरस्तु ॥
संवत १६६२ वर्षे आश्विनमास शुक्लपक्षे एकादशीवारशुक्रे शुभयोगे श्रीमत्पत्तनमहानगरमध्ये श्रीश्रीचन्द्चरित्रं लिखितम् ॥

---

**No. 880. Sanghapattaka** by JINAVALLABHASURI, WITH THE COMMENTARY OF HARSHARAJA [संघपट्टकः सटीकः—मू॰—जिनवल्लभसूरिः—टी॰ हर्षराजः].

Commentary begins:

वन्दे शान्तिजिनं शान्तिकरं कर्मोत्करोज्झितम् ।
महोदयेन्दिरोदारं विघ्नसंघातघातकम् ॥ १ ॥

भित्वा दुःकर्मदुर्गं शमदमबलतः साधिकद्वादशाब्दै-
र्लेभे तीर्थकरश्रीः सदतिशयवती लीलया येन नृभ्यः ।
भक्तेभ्यश्च प्रदत्ता ससुरमणिरहो इष्टदस्त्वं हि सार्व-
स्तेनालं मां कुरुष्व स्वविमलकमलालंकृतं वर्धमानः ॥ २ ॥

जिनवल्लभसूरीन्द्रैः कृतः श्रीसंघपट्टकः ।
तद्व्याख्यामल्पधीः कुर्वे बृहट्टीकानुसारतः ॥ ३ ॥

अथ संघपट्टक इति कः शब्दार्थः, उच्यते ॥ संघस्य ज्ञानादिगुणसमुदायरूपस्य साध्वादेश्चतुर्विधस्य पट्टको व्यवस्थापत्रं । यथा राजादयः स्वानियोगिभ्यो व्यवस्थापत्रं प्रयच्छन्त्यनया व्यवस्थया युष्माभिर्व्यवहर्त्तव्यमिति एवमिहापि साक्षाद्विपक्षदोषदर्शनद्वारेण स्वपक्षसु संघस्य व्यवस्था वक्ष्यमाणा दर्श्यते इति संघपट्टकः ॥ तत्रादिवृत्तम् ॥ वह्निज्वालावलीढम् ॥ २ ॥

Ends:

श्रीमति खरतरगच्छे श्रीजिनभद्राभिधा गणाधीशाः ।
सिद्धान्तरुचिप्रौढानूचानाः सन्ति तच्छिष्याः ॥ १ ॥

श्रीमदभयसोमास्तूपाध्यायास्तद्विनेयविख्याताः ।
तच्छिष्यहर्षराजोपाध्यायेन हि कृता वृत्तिः ॥ २ ॥
लघ्वी वाग्गुरुभद्रोदयसाहाय्याच्च संघपट्टस्य ।
श्रीमज्जिनपतिसूरीश्वरकृतसद्बृहट्टीकातः ॥ ३ ॥
यदत्र हर्षराजेन लिखितं मतिमान्द्यतः ।
विरुद्धं च तदुत्सूत्रं बुधैः शोध्यं सुबुद्धिभिः ॥ ४ ॥
इति श्रीसंघपट्टकलघुवृत्तिः संपूर्णा ॥

---

**No. 909. Sthulabhadramunicharitra,** by JAYANANDASURI [स्थूलभद्रमुनिचरित्रम्—जयानन्दसूरिः].

**Begins:**

वीरो वर्यश्रिये वोऽस्तु जिनेन्द्रो जगदर्चितः ।
रागादिरोधको विश्वबोधको बुद्धविष्टपः ॥ १ ॥
श्रीवीरशासनाम्भोजभासैनकनभोमणिः ।
स्थूलभद्रमुनींद्रस्य चरित्रं किमपि ब्रुवे ॥ २ ॥
एवं श्रीस्थूलभद्रप्रवरजिनपतेः पुण्यलावण्यकीर्तेः
सर्पत्कंदर्पवीरप्रकटपटुजयप्राप्तसुप्राज्यकीर्तेः ।
एवं चित्रं चरित्रं कृतसुकृतिजनं श्रीजयानन्दसिद्धि
शश्वद्भव्यव्रजानां प्रथयतु परमां शुद्धशीलप्रसिद्धिम् ॥ २ ॥
इति श्रीस्थूलभद्रमुनीन्द्रचन्द्रचरित्रं शुचि शीलगुणपवित्रं समाप्तम् ॥ ॥

---

**No. 920. A commentary on the Ashtasahasri,** by LAGHU-SAMANTABHADRA. [अष्टसहस्रीविषमपदतात्पर्यटीका—लघुसमन्तभद्रः].

**Begins:**

ॐ नमो वीतरागाय नमः ॥ श्रीसरस्वत्यै नमः ॥

॥ श्रीमद्विशालकीर्तिमुनये नमः ॥

इह हि खलु पुरा स्वकीयनिरवद्यविद्यासंयमसंपदा गणधरप्रत्येकबुद्धश्रुतकेवलिदशपूर्वाणां सूत्रकृन्महर्षीणां महिमानमात्मसात्कुर्वाद्भिर्भगवद्भिरुमास्वातिपादैराचार्यवर्यैरासूत्रितस्य तत्त्वार्थाधिगमस्य मोक्षशास्त्रस्य गंधहस्त्याख्यं महाभाष्यमुपनिबध्नंतः स्याद्वादविद्याग्रगुरवः श्रीस्वामिसमंतभद्राचार्यास्तत्र किल मंगलपुरस्सरस्तवाविषयपरमात्मगुणातिशयपरीक्षामुपाक्षिप्तवंतो देवागमाभिधानस्य प्रवचनतीर्थस्य सृष्टिमापूरयांचाक्रिरे। तदनु सकलतार्किकचक्रचूडामणिमरीचिमेचकितचरणनखकिरणो भगवान् भट्टाकलंकदेवस्तदेतस्याष्टशत्याख्येन भाष्येणोन्मेषमकार्षीत्। तदेवं महाभागैस्तार्किकार्कैरुपज्ञातां श्रीमता वादीभसिंहेनोपलालितामाप्तमीमांसामलंचिकीर्षवः स्याद्वादोद्भासिसत्यवाक्यमाणिक्यमकरिकाघटनवैकटकाराः सूरयो विद्यानंदस्वामिनस्तदादौ भगवदर्हदाचार्यप्रवचनप्रणामोपासनकृतेन सुकृतेन निष्प्रत्यूहप्रसरां गिरां चातुरीमाविर्भावयंतः प्रतिज्ञाश्लोकमेकमाह ॥ श्रीवर्द्धमानमित्यादि। अस्यार्थः। अलं क्रियते बिभूष्यते केन मया विद्यानंदसूरिणा। अनेनालंकारस्य महत्त्वमुद्योतितम्। का कृतिः संदर्भः। किंरूपा शास्त्रावताररचितस्तुतिगोचराप्तमीमांसितं। विशेष्यविशेषणयोराविष्टलिंगत्वादयं निर्देशो यथा रमणीरत्नमुर्वशीति। कस्य। अस्य स्वामिसमंतभद्राचार्यस्य। अनेनालंकार्यस्य माहात्म्यमावेदितम् ॥...

शास्त्रावताररचितस्तुतिगोचराप्तमीमांसितमिदं शास्त्रं देवागमाभिधानमित्युक्ते तद्गुणातिशयपरीक्षातदाप्तमीमांसितयोरेकत्वे साधिते तदाप्तमीमांसितमपि देवागमाभिधानं भविष्यत्येवेति मनसिकृत्य तयोरेकत्वसमर्थनार्थमाह ॥ मङ्गलपुरस्सरेत्यादि। ननु च मीमांसितं परीक्षाविचार इत्यनर्थान्तरं तत्र च वादिप्रतिवादिभ्यां भवितव्यं तथा च सति समन्त-

भद्राचार्यस्य महावादिनः प्रतिवादी न कश्चिन्मनुष्यमात्रः संभवत्येव ततः कथमाप्तमीमांसनविधानमुपपद्यत इति पृष्टस्सन्नाचष्टे तदेवमित्यादि ॥ इति समन्तभद्रकृतिव्याकृतिः समाप्ता ॥

देवं स्वामिनममलं विद्यानन्दं प्रणम्य निजभक्त्या ।
विवृणोम्यष्टसहस्रीविषमपदं लघुसमन्तभद्रोऽहम् ॥ १ ॥

॥ श्रीवर्द्धमानमित्यादि ॥ अस्मिन् श्लोके पूर्वार्द्धेन भाष्यादिपद्यद्वयार्थः । उत्तरार्द्धेन प्रथमभाष्यार्थश्च संगृहीतः ॥ ...

इति समंतभद्रमुनींद्रकृतायामष्टसहस्रीविषमपदतात्पर्यटीकायां प्रथमः परिच्छेदः ॥ १ ॥ ...

इति द्वितीयपरिच्छेदः समाप्तः ॥ १० ॥

